लोकप्रियसाहित्यग्रन्थमाला - २१

महामहोपाध्यायश्रीगोकुलनाथविरचितं

# शिवशतकम्

विद्यावतीसुतरमाकान्तप्रणीतया पदार्थप्रकाशिकाख्यव्याख्यया
भाषानुवादेन च सनाथितम्

प्रधानसम्पादकः
**प्रो. राधावल्लभत्रिपाठी**

टीकाकारः सम्पादकोऽनुवादकश्च
**डॉ.रमाकान्तपाण्डेयः**
राष्ट्रियसंस्कृतसंस्थानम् , (मानितविश्वविद्यालयः)
जयपुरपरिसरः, त्रिवेणीनगरम्, जयपुरम्

**राष्ट्रियसंस्कृतसंस्थानम्**
**मानितविश्वविद्यालयः**
**नईदिल्ली**

प्रकाशकः
कुलसचिवः
राष्ट्रियसंस्कृतसंस्थानम्, (मानितविश्वविद्यालयः)
५६-५७, इन्स्टीट्यूशनल एरिया
जनकपुरी, नवदेहली-११००५८
दूरभाषक्रमाङ्कः - २८५२०९७६
टेली-फेक्स् - २८५२४५३२
e-mail : rsks@nda.vsnl.net.in
website : www.sanskrit.nic.in

© राष्ट्रियसंस्कृतसंस्थानम्

ISBN : 978-93-86111-53-1

संस्करणम् : २०१०

मूल्यम् : ₹ १०० /-

मुद्रकः
अमर प्रिंटिंग प्रेस, दिल्ली-११०००९
e-mail : amarprintingpress@gmail.com

# पुरोवाक्

विदन्त्येव विज्ञा यद् विश्वस्य ज्ञान-विज्ञान-विमर्शपरम्परासु अतिमहदवदानं वरीवर्ति भारतीयप्रज्ञायाः। अस्याः प्रज्ञायाः परमप्रकर्षं विभावयामः शास्त्राणां काव्यानां च परम्परासु। एताश्च शास्त्रकाव्यपरम्परा आवेदेभ्यः प्रसृता अद्यावधि विकासं यान्तीति न संशीतिः। एतासां परम्पराणामैतिह्यम् आविर्भावकालो विस्तारकालः समृद्धिकालश्चेति त्रिषु चरणेषु प्रसृतम्। विक्रमपूर्ववर्तिन्यः प्रथमा द्वित्राः पञ्च वा सहस्राब्द्य आविर्भावकालस्य सन्ति। अनन्तरं विक्रमात् परवर्तिनी प्रथमा सहस्राब्दी वरीवर्ति विस्तारकालः। तदनु परापतति समृद्धिकालः। अयं च कालोऽद्यावधि संस्कृतपरम्परायामनुवर्तते। अस्मिन् काले विक्रमात् परं द्वितीयायां सहस्राब्द्यां (११००-२००० ख्रिस्ताब्दाः) किमपि मौलिकं चिन्तनं रचनाकर्म वा संस्कृते न सञ्जातमिति जल्पन्ति केचन तथाकथिता आधुनिकाः। अयं केवलं टीकानां काल इत्यपि ते आमनन्ति। वस्तुस्थितिस्तु अन्यैव। सत्यं नाना टीकाग्रन्था अस्मिन् सहस्राब्दे पण्डितैश्चिन्तकैर्विरचिता अद्यापि विरच्यन्ते च। एतादृशेषु टीकाकारेषु सन्ति अभिनवगुप्त-रामानुज-वल्लभाचार्यसदृक्षा महनीया महान्तो दार्शनिका विचारकाः, येषां टीकाः प्रकटीकुर्वन्ति सर्वथा नवोल्लासं सरस्वत्याः। अस्मिन् सहस्राब्दे नैके अभूवन् विपश्चिदपश्चिमा ये साहित्यशास्त्रे परिकल्पयन्ति स्म नवाः कोटीर्नूत्नानि वा लक्षणानि, लक्षयन्ति स्म नवविधाः, आविष्कुर्वन्ति स्म नवीनांश्च सिद्धान्तान्। एतादृशेष्वेव पण्डितेषु महामहोपाध्यायो गोकुलनाथः सत्यमेव सारस्वतसाधनायाः कश्चन समुज्ज्वलो विग्रहोऽभवत्। शङ्कराचार्याभिनवगुप्तादीनां स्तोत्रेषु यथा शास्त्रकाव्ययोर्मणिकाञ्चनयोगस्तथैवास्य रचनास्वपि।

प्रख्योपाख्याप्रसरसुभगं सरस्वत्यास्तत्त्वं द्विधा प्रवर्तते - अविचारितरमणीयं विचारितसुस्थं चेति यायावरीयो राजशेखरो मनुते। अतिप्राचीनकालादद्यावधि द्वयोरपि अनयोर्मार्गयोः संस्कृतसाहित्यसरस्वती अनिर्बाधं प्रकृष्टं च प्रवहमाणा आस्ते। तत्र काव्यमार्गस्तु ललितमार्गः। तत्र रममाणा रसावेशवैशद्यसौन्दर्यनिधानभूताभिरुक्तिभिर्निजहृदि विकसन्तः सुकवयः प्रायः शास्त्रपद्धतिषु नैव कुर्वन्ति सञ्चारम्। अथ तर्ककर्कशे पथि गच्छन्तो बुद्धिवैभवं प्रकटयन्तः शास्त्रकाराः प्रायो भवन्ति ललितरम्यरचनाभ्यो विमुखाः।

ते विरला एव भवन्ति ये यथा शास्त्रेषु प्रगल्भन्ते तथा काव्यानुशीलनवशाद् विशदीभूतमनोमुकुरा वर्णनीयतन्मयीभवनयोग्यतामपि प्रकटीकुर्युः। अथ तादृशास्तु दुर्लभा एव स्युः सुकृतिनः कृतिनो ये नवीनं शास्त्रप्रत्यग्रोन्मेषरम्यं च काव्यं समं योग्यतया विरचयन्ति। एतेष्वपि सर्वथा विरलास्ते सन्ति ये कमनीयकल्पनासंवलितेषु काव्येषु स्वोपज्ञेषु शास्त्राणां समृद्धिं स्वर्णे सुगन्धमिव समुत्पादयन्ति, अथवा स्वविरचितेषु शास्त्रेषु सन्निधापयन्ति काव्यलावण्यम्। महामहोपाध्यायो गोकुलनाथ आचार्यः कवितल्लजस्तादृश एव कृती कृतिकारः। अयं नवीनशास्त्रग्रन्थानां रचनाया यथा गम्भीरविचारमार्गे सञ्चारमकरोत् तथैव नैकाभिः सुकविताभिरपि सरस्वतीसमाराधनं विहितवान्। न केवलमेतदेव, अनेन विरचितेषु शास्त्रग्रन्थेषु काव्यस्य चारुता, काव्येषु तथा चास्य भवति शास्त्राणां पारदर्शित्वम्। उचितमेव श्रीभोजराजेन श्रव्यकाव्यप्रबन्धेषु शास्त्रकाव्यं काव्यशास्त्रमपि च सन्निवेशितम्। उभयोरपि शास्त्रकाव्यकाव्यशास्त्रयोः समानी गतिरस्य सुकवेर्महामहोपाध्यायगोकुलनाथस्य–

**साहित्ये सुकुमारवस्तुनि दृढन्यायग्रहग्रन्थिले**
**काव्ये वा मयि संविधातरि समं लीलायते भारती**

इति श्रीहर्षोक्तिमिवानुकुर्वतः, 'तर्केषु कर्कशधियो वयमेव नान्ये, काव्येषु कोमलधियो वयमेव नान्य' इति प्राचामुक्तिं चरितार्थयतो वा।

एतादृशस्य महापण्डितस्य महाकवेश्च शिवशतकं नामापूर्वमेव विद्यते काव्यम्। अस्मिन् काव्ये प्रतिपद्यमलङ्काराणां यादृशी अनुपमा छटा, तादृशमेव सौशब्द्यम्, यादृशं च सौशब्द्यं, तादृशमेवार्थगौरवं विलसति। एतादृशस्य महावाक्यायमानस्य महाकाव्यायमानस्य वा काव्यस्य पदार्थप्रकाशिकाख्यव्याख्यां विरच्य महानुपकारो विहितः पण्डितप्रवरेण रमाकान्तपाण्डेयेन। इयं पदार्थप्रकाशिका संस्कृतपरम्पराया व्याख्यानमार्गस्य समुज्ज्वलं निदर्शनम्। अस्या अनुशीलनेन न केवलमालोच्यकाव्यस्य साहित्यमञ्जूषायां सन्निधापितानि रत्नानि प्रकाशमायान्ति, कृत्स्ना साहित्यपरम्परैव आभासिता भवति। छात्राणामुपकाराय अनुसन्धित्सूनां लाभाय विदुषां च प्रमोदायाऽलं स्यादियं पदार्थप्रकाशिकेति विश्वसिमि।

**–राधावल्लभः त्रिपाठी**

कुलपतिः, राष्ट्रियसंस्कृतसंस्थानम्

# शिवं संवर्धताम्

अथ महामहोपाध्यायश्रीगोकुलनाथकविरचितं शिवशतकन्नाम स्तोत्रकाव्यं पदार्थप्रकाशिकाख्यव्याख्यया सह प्राकाश्यन्नीयत इति मोमुदीमः। संस्कृते स्तोत्रकाव्यपरम्परा सुदीर्घाऽतिप्राचीना च। वेद एव प्रथमा देवता स्तुतिश्श्रूयत अग्निमीळ इति। ततः पौराणिककालादारभ्य स्तोत्रसाहित्यं सुबहु संवर्धितं दृश्यते। तत्र भगवतश्शिवस्य स्तुतिवाङ्मयमनन्तं ह्युपलभ्यते। महाकाव्यानि, खण्डकाव्यान्यतिरिच्य स्तोत्रकाव्यानीमानि भगवतश्शिवस्य दरीदृश्यन्ते। तत्रेदमन्यतमं शिवशतकमिति। शास्त्रसारगर्भितं, प्रौढं, विरक्तिदं, मोक्षदं, स्वानुभवैकवेद्यमिति पारायणेन स्वयं ज्ञास्यन्ति भक्तास्सहृदयाश्च।

शतकस्यास्य प्रौढतामपनयति पदार्थप्रकाशिकाख्यव्याख्या। आरम्भ एव व्याख्याता 'भगवत्सङ्गतिरूपमोक्षस्य लाभ एव फलतो मनीषिणां काव्यशास्त्रविदामभिमत' इति व्याख्यन् नित्यसुखात्मकस्य तस्य मोक्षस्य निरूपणं करोति। श्रुतिशिष्यमाणवर्त्मेत्यत्र व्याख्या विशिष्यतेतराम्। 'निषेधशेषो जयतादशेष' इत्युक्त्वा निषेधमुखेन भगवतः स्वरूपमीरितमिति व्याख्यायते। किञ्च 'अतीतः पन्थानं तव च महिमा वाङ्मनसयोरतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपीति' शिवमहिम्नस्तोत्रमप्युद्ध्रियते प्रमाणतयाऽत्र। विगलितेत्यष्टमे श्लोके तत्त्वमसिवाक्यार्थः क्रियते सरलया शैल्या। 'नट इव वशगो भवामि यासामिति' श्लोके यादृशः काव्यरसो वेदान्तपरः कविनाऽनुभाव्यते स च सहृदयैकवेद्यः। तदाशयश्च प्रकट्यते व्याख्यात्रा। 'प्रकृतिचटुलेति' श्लोके नैयायिकमतमनूद्य तदनु व्याख्या व्यधायि। प्रलयकाले पृथिव्यादिभूतानि परमाणुरूपेणाऽवशिष्यन्ते। अन्ये प्रकृतिविकारास्सङ्कोचं प्राप्नुवन्ति। तदानीं महेश्वर एव जागरितो भवति। तस्यैव सिसृक्षया परमाणुभिः पुनस्सर्गविधानं भवतीति निरूप्यते सप्रमाणम्। उपचितवेदमजीजनष्षडङ्गम् इत्यत्र छन्दःप्रभृतीनां शिवस्य तत्तदङ्गजातत्वाद् वेदस्य तत्तदङ्गत्वेन व्यपदेश इति कवेराशयोऽपि सुष्ठु प्रकाश्यते।

इत्थमिदं शिवशतकं यथास्थानं श्रुति:, श्रीमद्भागवतं, श्रीमद्भगवद्गीतेति विविधप्रमाणै:कोशवाक्यैश्च पदार्थप्रकाशिकाख्यया व्याख्यया सम्पुष्टं राजते। एतस्य व्याख्याकारो विद्वन्मणिरलङ्कारशास्त्रचुञ्चुरध्यापनपटिष्ठो विविधकौशलयुतो नाट्यशास्त्रविशारदस्सततं कर्मण्यभिरत: डॉ.रमाकान्तपाण्डेयवर्यो नितरां प्रशंसाभाजनं वर्तते। एतादृशं सारस्वतं कार्यं सुबहु विदधीत एष उत्तरोत्तरं तादृशीं शक्तिं दद्याद्भगवान् एतस्मा इत्यशेषविघ्नशमनमनीकेश्वरं प्रार्थयामहे।

**विकृति-तुला-कृष्ण-दशमी** इत्थं विदां वचनकरः

मखायुतस्सोमवासरः (०१-११-२०१०) **-रामानुजदेवनाथः**

कुलसचिवः

रा.सं.सं., नवदेहली

# भूमिका

महामहोपाध्याय पं. गोकुलनाथ उपाध्याय संस्कृतसाहित्य के उन देदीप्यमान नक्षत्रों में से हैं जिन्होंने संस्कृत वाङ्मय के विभिन्न प्रस्थानों को पल्लवित और पुष्पित किया। उनकी अनेक शास्त्र और काव्यरचनाएं प्रकाशित हैं।

म.म. गोकुलनाथ के शिवशतक या शिवस्तुति का प्रकाशन निर्णयसागर प्रेस से प्रकाशित काव्यमाला के तृतीय गुच्छक में हुआ था। प्रस्तुत संस्करण का पाठ भी काव्यमाला से प्रकाशित शिवशतक के उक्त संस्करण पर आधारित है। निर्णय सागर से शिवशतक का मूलमात्र प्रकाशित हुआ था। इस शतक पर कोई प्राचीन टीका या अनुवाद मुझे उपलब्ध नहीं हुए। शिवशतक पर पदार्थप्रकाशिका टीका लिखते हुए मिथिला के कतिपय विद्वानों से यह ज्ञात हुआ कि इस पर पं. जीवन झा ने कोई टीका लिखी थी, जिसका प्रकाशन सन् १९०५ में वाराणसी से हुआ था। प्रयत्न करने पर भी वह टीका मुझे प्राप्त नहीं हुई। इस अन्वेषण के क्रम में शिवशतक के एक और संस्करण का पता चला जो कभी पण्डित दामोदर झा के सम्पादन में 'शिवस्तुतिमाला' नाम से प्रकाशित हुआ था। मुझे यह संस्करण भी प्राप्त नहीं हो सका। इसके बारे में इतनी जानकारी और मिली कि इसमें शिवशतक के केवल ५१ श्लोक ही प्रकाशित किये गये थे। अस्तु, मैंने काव्यमाला के तृतीय गुच्छक में प्रकाशित शिवशतक के पाठ को आधार मान कर टीका लिखना प्रारम्भ किया। इस क्रम में मेरे सामने सबसे बड़ी समस्या पाठनिर्धारण के रूप में आयी। प्रतीत होता है कि शिवशतक का काव्यमाला संस्करण भी किसी अशुद्ध पाण्डुलिपि के आधार पर ही तैयार किया गया था। अनेकत्र अर्थयोजना न हो पाने के कारण मुझे इस संस्करण के पाठ में संशोधन करना पड़ा। निराधार संशोधन से यद्यपि मैं संतुष्ट नहीं था तथापि मैंने टीका और अनुवाद का कार्य पूर्ण करके इसे पुरोवाक् की प्रत्याशा में आचार्य राधावल्लभ त्रिपाठी, कुलपति, राष्ट्रिय संस्कृत संस्थान, नई दिल्ली के पास भेज दिया।

महामहोपाध्याय गोकुलनाथ का जीवन परिचय प्राप्त करने के क्रम में मैंने उनके अमृतोदय नाटक का अध्ययन प्रारम्भ किया तो ज्ञात हुआ कि शिवशतक के रूप में प्रकाशित इस ग्रन्थ के अनेक श्लोक अमृतोदय नाटक में प्राप्त होते हैं। यद्यपि इस अवधि तक मेरा कार्य पूर्ण हो चुका था। तथापि अमृतोदय में प्राप्त पाठभेदों को मैंने बाद में शिवशतक के इस संस्करण में जोड़ दिया है। इस प्रकार पाठ की दृष्टि से भी शिवशतक का यह संस्करण प्रामाणिक बन सका है। अमृतोदय तथा काव्यमाला के पाठभेदों का निर्देश पदार्थप्रकाशिका टीका में किया गया है। काव्यमाला संस्करण में अनेकत्र प्रश्नचिह्न देकर पाठ की अशुद्धि या अपूर्णता सूचित की गयी थी। मैंने उक्त पाठों को भी संशोधित करने का प्रयास किया है। इन समस्त तथ्यों की जानकारी टीका में दी गयी है।

**महामहोपाध्याय गोकुलनाथ-**

म.म. गोकुलनाथ का जन्म बिहार प्रदेश के दरभङ्गा जिले में मँगरौनी नामक गाँव में फणदहनामक मैथिल ब्राह्मण परिवार में हुआ था। गोकुलनाथ महान् शास्त्रज्ञ और प्रतिभाशाली कवि थे। न्याय, व्याकरण, मीमांसा और वेदान्त आदि अनेक शास्त्रों में इनकी अबाध गति थी। इनके विषय में यह उक्ति प्रसिद्ध है-

**मातर्गोकुलनाथनामकगुरोर्वाग्देवि! तुभ्यं नमः**
**पृच्छामो भवतीं महीतलमिदं त्यक्त्वैव यद्गच्छसि।**
**भूलोके वसतिः कृता मम गुरौ स्वर्गे तथा गीष्पतौ**
**पाताले फणिनायके भगवति! प्रौढिः क्व लब्धाधिका।।**

(पदवाक्यरत्नाकर, भूमिका, पृ. ३)

गोकुलनाथ के पिता का नाम पं. पीताम्बरशर्मा तथा माता का नाम उमा देवी था। पीताम्बर शर्मा स्वयं अनेक शास्त्रों के प्रकाण्ड पण्डित थे। गोकुलनाथ ने अपने पिता के वैदुष्य का उल्लेख अनेक स्थलों में किया है। अमृतोदय नामक नाटक के अन्त में अपने फणदहवंश तथा पिता के वैदुष्य

का उल्लेख करते हुए गोकुलनाथ ने कहा है–

''श्रुतिः– वत्से! आन्वीक्षिकि! सत्यमाह गिरां देवी, भवन्त्येवं विधा एव फणदहद्विजाः, पश्य–

**सुभाषितेर्ष्याकलुषसुलोचनविषानलैः।**

**फणं दहन्ति शेषस्य ततः फणदहा मताः।।**

गोकुलनाथ के पिता का परिचय अमृतोदय के निम्नलिखित श्लोक में द्रष्टव्य है–

**प्रकृति गहने वैशेषिके विवृतिं व्यधा–**

**दकुरुतचतुर्वर्गव्याख्यामृतानि च भारते।**

**भरतवचसां तत्त्वाख्यान्यैर्निबन्धमभाषत।**

**व्यतनुत तथा तिस्रो वाणीविलासकविः कथाः।।**५.१९।।

गोकुलनाथ ने अपनी कृतियों में अपने भाइयों का भी उल्लेख किया है। ये चार भाई थे– त्रिलोचन, धनञ्जय, गोकुलनाथ और जगद्धर। गोकुलनाथ, त्रिलोचन और धनञ्जय से छोटे तथा जगद्धर से बड़े थे। अमृतोदय नाटक में उन्होंने स्वयं लिखा है–

'भगवति अस्ति तस्य परापरब्रह्ममीमांसनमांसलस्य सकलसंसारसरणिविभागविदो विद्यानिधेः पीताम्बरस्य चतुर्णां पुत्राणामेकतमो गोकुलनाथो नाम।

पं. पीताम्बर और उमादेवी के चारो पुत्रों का उल्लेख करते हुए गोकुलनाथ ने अपने को उनका तीसरा पुत्र बताया है–

**यो जन्मतश्च गुणतश्च मतः कनिष्ठः**

**श्रीमत्त्रिलोचनकवेश्च धनञ्जयाच्च।**

**स श्रीजगद्धरधरातिलकाग्रजन्मा**

**निर्मास्यति प्रगुणतत्त्वरसं प्रबन्धम्।।** अमृतोदय,५.२५।।

गोकुलनाथ ने अपने पिता से ही समस्त विद्याओं का अध्ययन किया –

**अधिगतमुपाध्यायाद्विद्यानिधेरनुचिन्तित–**

**विरलविषयग्राहिण्यपि स्वया जडया धिया।**

**बहुलमथवा स्तोकं यद्यन्मया श्रुतमर्जितं**

**परिणतिरियं तस्य प्रीतस्तयास्तु परः पुमान्।।** वही,५.१७।।

गोकुलनाथ फत्तेसाह राजाओं के आश्रय में रहे। इसका उल्लेख उन्होंने अपने एकावली नामक ग्रन्थ में किया है।

**वृत्तसागररत्नानां सारमुद्धृत्य निर्मिता।**

**एकावली फतेसाह! तव कण्ठे लुठत्वसौ।।**

इस प्रकार यह प्रमाणित हो जाता है कि गोकुलनाथ पीताम्बर शर्मा और उमादेवी के पुत्र थे। उन्होंने अपने पिता पीताम्बर शर्मा से समस्त शास्त्रों का अध्ययन किया।

**गोकुलनाथ उपाध्याय का समय –**

गोकुलनाथ ने अपने वंश का परिचय तो दिया है किन्तु उन्होंने अपने समय का उल्लेख अपनी किसी कृति में नहीं किया। वंशपञ्जी एवं कतिपय उपलब्ध प्रमाणों के आधार पर इनके निश्चित समय तक पहुँचा जा सकता है। गोकुल नाथ ने अपने से पाँचवी पीढ़ी के पूर्वज रुचिपति का उल्लेख अमृतोदय नाटक में किया है–

**निगमसरसो माने दण्डाः प्रमत्तसरस्वती–**

**स्खलनपतनारम्भे हस्तावलम्बनयष्टयः।**

**सुकृतसदनोपादानन्ते भवन्ति भजन्ति ये**

**रुचिपतिकवेर्वंशस्तम्बप्ररोहकरीरताम्।।** वही,५.१७

मैथिल ब्राह्मण वंशावली में रुचिपति को गोकुलनाथ की पाँचवी पीढ़ी का पूर्वज बताया गया है। मिथिला में यह भी प्रसिद्धि है कि इस वंश पर

रुचिपति के समय से ही सरस्वती की कृपा हुई थी। सम्पूर्णानन्द संस्कृतविश्वविद्यालय से प्रकाशित पदवाक्यरत्नाकर की भूमिका में इनके जीवन से सम्बद्ध अनेक घटनाओं का प्रामाणिक वर्णन है।

महामहोपाध्याय गोकुलनाथ की कृतियों में से एक महत्त्वपूर्ण पुस्तक 'मासमीमांसा' भी है। जिसकी पुष्पिका में यह लिखा है–

'इति महामहोपाध्याय–

श्रीगोकुलनाथशर्मप्रणीत–मासमीमासा–परिपूर्णा।

शाके १६८०।

भाद्रकृष्णदशमीचन्द्रेऽलिखदिदं रजनीनाथः'।।

वर्तमान प्रचलित ई. सन् तथा शाके में ७८ वर्षों का अन्तर है। अतः १६८०+७८ = १७५८ ई. में यह पुस्तक रजनीनाथ नामक किसी पण्डित द्वारा लिखी गई प्रतीत होती है। भागलपुर (विहार) के व्यास प्रेस से मासमीमांसा मुद्रित होकर प्रकाशित हुयी है। इसी मुद्रित पुस्तक के १८ वें पृष्ठ पर यह लिखा है–

'अस्मिन्नैवेकत्रिंशदधिकषोडशताङ्किते (१६३१) शककाले वैशाखो मलमासः' इति । 'तदधुनापि सम्भवत्येव, सम्प्रति हि शकाब्दा एकत्रिंशदधिकषोडशशती' (१६३१)। इससे यह प्रमाणित होता है कि महामहोपाध्याय गोकुलनाथ ने १६३१ शाके तदनुसार १७०९ ई. में मासमीमांसा नामक ग्रंथ की रचना की थी। मासमीमांसा की रचना महाराज मिथिलेश राघवसिंह (रघुवंश सिंह) के अनुरोध से की गयी थी, यह भी विद्वत्समाज में प्रसिद्ध है। इन सब कारणों से यह अवधारणा जनसामान्य में प्रचलित है कि गोकुलनाथ उपाध्याय सत्रहवीं शताब्दी के परार्ध तथा १८ वीं शताब्दी के पूर्वार्द्ध में (ईसवी १६५० के तथा बाद १७५० के बीच) में मिथिला में विद्यमान थे। पूर्वावधि निर्णय इस तरह हो जाता है कि उन्होंने ईसवी १६०९ में 'मांसमीमांसा' का प्रणयन क्षयवर्ष आदि के निर्णयार्थ ही किया होगा। प्रायः उसके आसपास ही क्षयवर्ष पड़ता रहा होगा। मिथिलेश ने प्रतिष्ठित पण्डित मानकर महामहोपाध्याय गोकुलनाथ से उस विषय पर विवेचना पूर्ण निबन्ध लिखने का अनुरोध किया होगा और उनके आत्मीय अनुरोध की रक्षा के लिये

परिपक्व पाण्डित्यशाली महामहोपाध्याय गोकुलनाथ उपाध्याय ने मासमीमांसा नामक पुस्तक लिखी होगी। इन सब तथ्यों पर विचार करने से पता चलता है कि 'मासमीमांसा' का निर्माण गोकुलनाथ की प्रौढावस्था में हुआ था। अतः उनकी स्थिति को १६५० ई. के बाद मानने में कोई आपत्ति नहीं होनी चाहिए।

**गोकुलनाथ की कृतियाँ** –

गोकुलनाथ ने शताधिक ग्रन्थों की रचना की थी। उनके उपलब्ध ग्रन्थ निम्नलिखित हैं–

**१. चक्ररश्मि** – इस कृति का दूसरा नाम 'रश्मिचक्र' भी प्राप्त होता है। यह गंगेशोपाध्याय के तत्त्वचिन्तामणि ग्रन्थ की व्याख्या के रूप में प्रसिद्ध है।

**२. विद्योत** – इस ग्रन्थ को 'दीधितिविद्योत' नाम से भी प्रसिद्धि प्राप्त है। यह रघुनाथ शिरोमणि की तत्त्वचिन्तामणिदीधिति की टीका है।

**३. न्यायसिद्धान्ततत्त्वम्** – गोकुलनाथ ने पदवक्यरत्नाकर में पंचमी विभक्ति के प्रसंग में इसका निर्देश किया है। इसमें न्यायशास्त्रीय पदार्थों का संकलन किया गया है। यह अतिविस्तृत ग्रन्थ है।

**४. मिथ्यात्वनिरुक्ति** – इसे 'मिथ्यात्वनिर्वचन' नाम से भी जाना जाता है। इसमें अति सारगर्भित वाक्यों में अद्वैतमत की स्थापना हुई है।

**५. पदवाक्यरत्नाकर** – यह शाब्दबोध विषयक ग्रन्थ है। यदुनाथ मिश्र की टीका के साथ सम्पूर्णानन्द संस्कृतविश्वविद्यालय से प्रकाशित है।

**६. दिक्कालनिरूपण** – यह लघुतम पुस्तिका कामेश्वर सिंह दरभंगा संस्कृत विश्वविद्यालय से प्रकाशित 'ग्रन्थगुच्छ' में संकलित है।

**७. कुसुमाञ्जलिविवरणम्** – इसका दूसरा नाम 'कुसुमांजलिटीका' भी है। यह उदयनाचार्य के न्यायकुसुमांजलि की टीका है।

**८. बौधाधिकारविवरणम्** – इस ग्रन्थ की चर्चा पदवाक्यरत्नाकर में प्राप्त होती है। यह उदयनाचार्य के 'आत्मतत्त्वविवेक' की टीका है।

**९. रसमहार्णवः** – यह अलंकारशास्त्रीय ग्रन्थ है। इसका भी उल्लेख पदवाक्यरत्नाकर में प्राप्त होता है।

**१०. काव्यप्रकाशविवरणम्**-यह काव्यप्रकाश की प्रसिद्ध टीका है।

**११. लाघवगौरवरहस्यम्** - इनकी यह रचना भी प्रसिद्ध है।

**१२. शक्तिवाद** - यह न्यायशास्त्र का ग्रन्थ है।

**१३. मुक्तिवाद** - इसका दूसरा नाम मुक्तिविमर्श भी है।

**१४. कुण्डकादम्बरी** - अल्पायु में ही गंगा में डूब कर मृत्यु को प्राप्त हुई अपनी पुत्री कादम्बरी की स्मृति में गोकुलनाथ ने इस ग्रन्थ की रचना की थी।

**कुण्डकादम्बरीनाम्ना ग्रन्थोऽयं तव कीर्तये।**
**मया गोकुलनाथेन सोपपत्तिर्निबध्यते॥**

**१५. कादम्बरी** - यह द्वैतनिर्णय का टीका ग्रन्थ है।

**१६. कादम्बरीप्रश्नोत्तराणि**

**१७. कादम्बरीकीर्तिश्लोक**- दोनों ही ग्रन्थ पुत्री कादम्बरी की स्मृति में लिखे गये हैं।

**१८. एकावली** - फतेसाह राजा की आज्ञा से लिखित छन्दोग्रन्थ।

इनके अतिरिक्त गोकुलनाथ की वृहत्तरंगिणी, शुद्धिविवेक, अशौचनिर्णय, मासमीमांसा, सूक्तिमुक्तावली, आलोकविवरण, अमृतोदयनाटक तथा शिवस्तुति या शिवशतक जैसी अन्य अनेक रचनाएं प्राप्त होती है। इनमें कुछ का प्रकाशन हो चुका है। कुछ ग्रन्थ अतिलघु किन्तु अतिमहत्त्वपूर्ण हैं। उनका प्रकाशन 'ग्रन्थगुच्छ' में हुआ है।

**गोकुलनाथ का शिवशतक -**

शिवशतक का दूसरा शिवस्तुति नाम भी प्राप्त होता है। इसमें कुल १०५ श्लोक हैं किन्तु इसका ५१ श्लोकात्मक शिवस्तुतिमाला नामक संस्करण भी प्रसिद्ध है। शिवशतक शिव की स्तुति में लिखा गया दर्शनिक काव्य है। इसके प्रायशः सभी श्लोक अमृतोदय नाटक में प्राप्त होते हैं। गोकुलनाथ जितने बड़े पण्डित थे उतने ही प्रतिभाशाली कवि भी थे। उनका पाण्डित्य उनकी

कविताओं में झलकता है। गोकुलनाथ की कविता कहीं भी दर्शन से बोझिल नहीं हुई। दर्शन उनकी कविता से स्वतः स्फूर्त होता है। दिक्कालनिरूपण नामक उनके लघुग्रन्थ का मङ्गलाचरण प्रस्तुत प्रसङ्ग मे द्रष्टव्य है-

**सत्यं प्रजाः सृजसि संहरसीति किन्तु**

**कालस्तवोपकरणं न पुनस्त्वमेव।**

**विश्वस्य तथ्यमवलम्बनमस्यनन्त!**

**किन्तु त्वमेव ककुभो भवसीति मोहः।।**

प्रस्तुत काव्य में दिक्काल विषयक दार्शनिक सिद्धान्त अनुस्यूत हैं किन्तु कविता में दर्शन बोझ नहीं बना।

गोकुलनाथ अपनी पुत्री कादम्बरी के असामयिक मृत्यु से आहत थे। उन्होंने उसकी स्मृति में अनेक ग्रन्थों को रचना की थी। कुण्डकादम्बरी में उनका कारुण्य इन शब्दों में प्रस्फुटित हुआ है-

**''आराम्बाव प्रकृतिकृपणा बाधिभिर्बाध्यमानै-**

**र्विक्रोशारः करुणवचनं पुत्रि! कादम्बरीति।**

**कोऽयं लोकः क इव विषयः किं पुरं को निवासः?**

**यस्मिन्नस्मद्विमुखहृदया त्वं निलीय स्थिताऽसि॥**

शिवशतक दार्शनिकता से ओतप्रोत काव्य है। कवि ने स्वयं इसे उपनिषदों के गर्भ से उत्पन्न बताया है-

**अपगतपदपाटवोऽपि गर्भा-**

**दुपनिषदामधुनोत्थितः प्रबन्धः।**

**जनयतु तव कौतुकं कलेन**

**प्रतिपदविस्खलितेन जल्पितेन।।९१।।**

गोकुलनाथ ने अनेक दार्शनिक सिद्धान्तों का निबन्धन करते हुए अपनी इस कृति में रूपकों का व्यूह रच दिया है। शिव के अनेक रूपों की

सङ्कल्पना में उन्होंने लोक और शास्त्र का सुन्दर समन्वय उपस्थापित किया है–

**भुवनपुटकुटीरहट्टयन्त्र–**
**भ्रमणसहध्रुवतर्कुतः क्रमेण।**
**सृजसि समयसूत्रमत्र माया–**
**मयपटवानविधानतन्तुवायः।।४।।**

उपनिषदों में प्रतिपादित ब्रह्मवाद को उन्होंने सुन्दर काव्यात्मक भाषा में प्रस्तुत किया है। ब्रह्म और जीव, भोग और मोक्ष विषयक शास्त्रप्रतिपादित अनेक सिद्धान्त यहाँ गुम्फित हैं–

**श्रुतिजनक ! रटत्यसौ कुमारी**
**तव दुहिता बहिरेत्य नेति नेति।**
**व्यवहित! निकटस्थितेऽपि तस्मात्**
**त्वयि मिलितेऽपि ममातिथेः क्व भोगः।।२३।।**

सृष्टिप्रक्रिया भारतीय दर्शन का प्रमुख विषय है। शास्त्रों में प्रतिपादित विशाल सिद्धान्तों को आत्मसात् करने और उन्हें काव्यात्मक अभिव्यक्ति देने में गोकुलनाथ सिद्धहस्त हैं। न्यायवैशेषिक की सृष्टिप्रक्रिया का वर्णन प्रस्तुत श्लोक में द्रष्टव्य है–

**प्रलयदहनदग्धशेषपीलु–**
**प्रकरशिलोञ्छपवित्रवृत्तिरादौ।**
**घटयसि भुवनानि तेषु जीव–**
**प्रकृतिचलैः परमाणुभिः शरीरम्।।३१।।**

इसी प्रकार शास्त्रों में चर्चित सृष्टिप्रक्रिया के नाना वादों का उल्लेख करते हुए उन्होंने कहा है–

**न जगदिदमहेतुतो न शून्या–**
**दवधिमतां कथमुद्भवोऽस्त्वकस्मात्।**
**प्रकृतिरियमधर्मधर्मरूपा**
**पुरुषगुणः कथमारभेत विश्वम्।।४६।।**

शिवशतक में परमात्मा के द्वारा प्रलयकाल में परमाणुओं के संकलन का वर्णन इस प्रकार है–

**प्रकृतिचपलपीलुबीजवर्गे**
**दलति खगोलकुशूलविप्रकीर्णम्।**
**अघटितमितरेतरेण कल्प -**
**क्षयरजनौ समचीकलस्त्वमेकः।।७९।।**

इसी प्रकार जैनदर्शन के कर्मसिद्धान्त को उन्होंने महज एक छोटे से छन्द में बाँध दिया है–

**यदभिलपसि पुद्गलानजीवा-**
**स्रववरनिर्जरजीवबन्धमोक्षान्।**
**नयसि च यदनावृतान्विहङ्ग-**
**प्रकृतिमतस्तदुपास्यसे जिनेन्द्रः।।९९।।**

अधोलिखित पद्य सांख्य दर्शन के प्रकृति और पुरुष विषयक सिद्धान्त का निदर्शन है–

**प्रकृतिरियमनश्वरस्वरूपा**
**सृजति महान्तमसौ यतो विकारम्।**
**अविकृतमपि पश्यतः सतस्ते**
**सह रमते ह्यनया सखा त्वदीयः।।१००।।**

शास्त्रों में आत्मा को नित्य मानकर उसे विभिन्न योनियों में भुक्त विषयों के संस्कार का अधिष्ठान माना गया है। योगदर्शन चित्त को नदी रूप में परिभाषित करता है। चित्समुद्र में उसके विलय की बात भी शास्त्रों में प्रतिपादित है। गोकुलनाथ प्राणियों में जन्मान्तर के स्मृति की बात इस प्रकार करते हैं–

**जनशरण! शरीरिणां प्रवृत्तैः**
**करणगणैरुपलभ्यचेतनानाम्।**
**कतिचन जनुरन्तरानुभूति-**
**प्रसृमरवासनया स्मृतीः प्रसूषे।।३२।।**

परमात्मा की कृपा से ही ब्रह्मा पूर्वकल्प में अधीत वेदों का प्रलय के अनन्तर स्मरण करता है, इस बात का भी यहाँ संकेत किया गया है। मानव मन की विषयतृष्णा की गहनता इस पद्य में द्रष्टव्य है-

**अभिसरति परं परं पुरारे!**
**विषयमनेकमपास्य पूर्वपूर्वम्।**
**वरुणनिलयमापगेव यावद्**
**भजति भवन्तमसौ न चित्तवृत्तिः।।४०।।**

कालभिक्षु के रूपक से गोकुलनाथ ने संसार के विनाशप्रक्रिया को सुन्दर अभिव्यक्ति दी है-

**प्रतिगृहमतिथिर्गृहीतदण्डो**
**धृतजगदण्डकमण्डलुप्रकाण्डः।**
**भुवनवहन! पात्रमात्रशेषं**
**सतृणमिदं जगदत्ति कालभिक्षुः।।८२।।**

काल को अतिथि कहकर गोकुलनाथ ने उसे कभी भी बिना बुलाये पहुँच जाने वाला मेहमान कहा है। 'धृतजगदण्डकमण्डलुप्रकाण्ड' तथा 'पात्रमात्रशेष' जगत् को पूरी तरह खाने वाला कह कर उन्होंने उसकी विकरालता का संकेत किया है।

शिवशतक में शिव के लिये प्रयुक्त सम्बोधनों की सार्थकता भी द्रष्टव्य है। कवि कभी उसे 'कुलाल' कहता है तो कभी प्रकृतिदरिद्र, कभी पुरुषपुरन्दर' कहता है तो कभी चटुल। भक्त का अपने इष्ट से संवाद, अपनी सांसारिक दुर्दशा का करुण वाणी में उपालम्भ आदि भावनात्मक तथ्य भी शिवशतक में यथास्थल वर्णित हुए हैं।

शिवशतक भक्तिभावना से परिपूर्ण काव्य है। रूपक के अनेक भेदों का सुन्दर प्रयोग करके गोकुलनाथ ने अपने इष्ट के शास्त्रप्रतिपादित स्वरूप को प्रस्तुत किया है। उपमा, उत्प्रेक्षा, दीपक, अतिशयोक्ति आदि अन्य अर्थालङ्कारों का सुन्दर समन्वय शिवशतक में दृष्टिगोचर होता है। श्लेष जैसे शब्दालङ्कार भी

यत्र तत्र प्रयुक्त हुए हैं। अध्येता गोकुलनाथ की अलङ्कारप्रयोगपटुता का आकलन इस ग्रन्थ को देखकर कर सकते हैं।

गोकुलनाथ अपनी कविता में लोक और शास्त्र का सुन्दर समन्वय उपस्थापित करते हैं। अपने आराध्य शिव की स्तुति करते करते गोकुलनाथ उनके साथ चुटकी भी लेते हैं-

**प्रकृतिमलिनमृक्षलक्षलिक्षा-**
**चयचितमम्बरचीवरं वसानम्।**
**प्रकटितबृहदण्डमत्रपं त्वां**
**पुरुषमुदीक्ष्य हसामि चोल्लसामि।।९२।।**

शिव प्रकृतिमलिन है, लाखों नक्षत्ररूपी लीखों के समूह से व्याप्त आकाशरूपी वस्त्र पहने है, वह विशाल ब्रह्माण्ड का जनक, शरीरहीन और निर्लज्ज है। यहाँ श्लेष के सुन्दर प्रयोग से उन्होंने उनका उपहास भी किया है- वह अतिमलिन वृद्ध है, साफसफाई न होने के कारण लाखों चीलर और लीखों से भरे कपड़ों के चीथड़े लपेटे है, बहुत बड़े अण्डकोश को प्रकट किये है, अतः निर्लज्ज है, ऐसे पुरुष को देखकर किसी का हँसना और प्रसन्न होना स्वाभाविक है।

लोक में कहीं जाते समय तेली का मिल जाना अशुभ माना जाता है। उसके मिल जाने पर लोग यात्रा छोड़कर वापस घर चले जाते हैं। गोकुलनाथ शिव को संसार की यात्रा को हरण करने वाला तेली कहने से भी नहीं चूकते-

**विधिवशमिलितो भवाध्वयात्रां**
**हरसि जगत्तिलपेषतैलिकोऽसि।**
**न तव पशुपते! विदन्ति पाशं**
**पिहितदृशः पशवः परिभ्रमन्ति।।८७।।**

संयोग से मार्ग में मिलते ही तुम संसार की यात्रा का हरण कर लेते हो, अतः तुम जगत् रूपी तिल को पेरने वाले तेली हो। तेली भी संयोग से ही मिलता है। उसके मिल जाने पर लोग अशकुन मान कर अपनी यात्रा बन्द कर देते हैं। जैसे तेली का बैल आँख बँधी होने के कारण अपने बन्धन को नहीं

जानता केवल घूमता रहता है उसी प्रकार तुम्हारे बन्धन में पड़ा हुआ जीवरूप पशु अपने बन्धन को नहीं जान पाता और नाना योनियों में घूमता रहता है।

ऐसे अनेक स्थल हैं, जहाँ गोकुलनाथ शिव के लिये सुन्दर श्लेषमयी भाषा का प्रयोग कर अपनी कविता में चारुता उत्पन्न करते हैं–

**अपगतपदपाटवोऽपि गर्भा–**
**दुपनिषदामधुनोत्थितः प्रबन्धः।**
**जनयतु तव कौतुकं कलेन**
**प्रतिपदविस्खलितेन जल्पितेन।।९१।।**

इस पद्य में अपने प्रबन्ध को गोकुलनाथ ने अभी अभी उपनिषदों के गर्भ से उत्पन्न सद्योजात शिशु कहा है, यह पैर रखने में चतुर नहीं है, फिर भी अपनी लड़खड़ाती चाल और मधुर भाषा से उस शिव को आनन्दित करे, यही कवि की कामना है। शिवशतक में लोकव्यवहार का सुन्दर सामंजस्य अनेकत्र दृष्टिगत होता है–

**मम वचनजलानि कर्णशुक्तौ**
**तव पतितानि गतानि मौक्तिकत्वम्।**
**विगुणविलुलितानि लाजबुद्ध्या**
**रसयतु कुण्डलकुण्डलिप्रकाण्डम्।।१०२।।**

शिव की कानरूपी सीपी में पड़कर मेरा यह वचनरूपी जल मोती बन गया है, विगुण (सूत्र रहित) होने के कारण यह इधर उधर बिखरा पड़ा है, अतः शिव के कुण्डल रूप साँप इसे लावा (खील) समझ कर इसका आस्वाद प्राप्त करे। रूपक और समासोक्ति का श्लिष्ट चमत्कार निश्चय ही यहाँ मनोहर बन पड़ा है। शिवशतक गोकुलनाथ की लोक और शास्त्र, उभयविधव्युत्पत्ति का सुफल है, इसमें कोई सन्देह नहीं।

शिव की विभिन्न लीलाओं को कवि ने विभिन्न रूपों में देखा है। वह अपने उपासकों को दिखाई क्यों नहीं पड़ता। संसार उसका दर्शन करना चाहता है पर वह छिपा कहाँ है? इन सभी प्रश्नों का उत्तर गोकुलनाथ शिव को शिशु के रूप में कल्पित करके देते हैं–

**पुरहर! परदृष्टिदोषशान्त्यै**
**कति जगदण्डकगण्डकान्बिभर्षि।**
**त्वदुपरि परिपातयन्ति दृष्टिं**
**विजहति सर्वमकिञ्चना भवन्ति।।७३।।**

लोक में माता अपने शिशु के भूतादिबाधा निवारणार्थ उसे गण्डा पहनाती है। उससे वह लोगों के दृष्टिदोष से बचता है। शिव ने दूसरों को अपने दृष्टि दोष से बचाने के लिए ब्रह्माण्ड रूपी अनेक गण्डे पहन लिए हैं। इसीलिए दुनिया बची हुई है। अन्यथा उस पर दृष्टि पड़ते ही सब अकिंचन हो जाते हैं, उन्हें संसार में कोई भोग ही प्राप्त नहीं होता। वह सांसारिकता से मुक्त हो जाता है।

कवि शिव को अभागा किसान कहने से भी पीछे नहीं हटता। अभागे किसान के खेत में पैर रखते ही बीज कडंगर (तुष या बुस) बन जाता है। शिव भी कुछ ऐसा ही कृषक है–

**वपसि विगतभोगभाग्य! दूरा–**
**न्मयि वृषवाह! तवाऽहमुर्वरास्मि।**
**स्वपदमुपदधासि यत्र तस्मिन्**
**भवति कडङ्गर एव कर्मबीजम्।।१९।।**

शिव के प्रारब्ध में भोग तो लिखा नहीं। उसका पैर पड़ते ही कर्मबीज तुष न बन जाय इसलिए वह प्राणियों में दूर से ही कर्मबीज का वपन करता है।

लोक प्राय: शरीर और आत्मा में तदात्मबुद्धि रखता है। तदात्मता या तादात्म्य सम्बन्ध उन दो पदार्थों के मध्य होता है जो वस्तुत: अलग अलग होते हैं पर उनके मध्य अभेद की प्रतीति होती है। गोकुलनाथ शिव को उपालम्भ देते हैं कि तुमने मुझ चैतन्य (आत्मा) का शरीर से अभेद निर्धारित किया है उसी शत्रुता के कारण मैं ं तुममें सभी वस्तुओं का अभेद देखता हूँ–

**मयि परमविभौ विशुद्धसत्त्वे**
**यदिह शरीरतदात्मतामधासीः।**

**निगमपुरुष! तत्प्रतिक्रियायै**
**त्वयि निदधामि समस्तवस्त्वभेदम्।।२६।।**

इस प्रकार शिवशतक लोक और शास्त्र का अनुपम निदर्शन है।

ऊपर कहा जा चुका है कि शिवशतक का प्रस्तुत संस्करण निर्णयसागर की काव्यमाला शृङ्खला के तृतीय गुच्छक में प्रकाशित शिवशतक के संस्करण पर आधारित है। काव्यमाला के उक्त संस्करण के सम्पादक पं. दुर्गाप्रसाद द्विवेदी तथा काशीनाथ शर्मा जैसे तत्कालीन धुरन्धर विद्वान् थे। ऐसा प्रतीत होता है कि उस समय सम्पादकों को शिवशतक की कोई शुद्ध पाण्डुलिपि प्राप्त नहीं हुई थी। अत: अनेकत्र अशुद्ध पाठों को उन्होंने प्रश्नचिह्न लगाकर छोड़ दिया। कतिपय श्लोक तो मुद्रणजन्यत्रुटियों के कारण भी अशुद्ध रह गये। किसी टीका या टिप्पणी के अभाव में अथवा अन्य प्रामाणिक पाण्डुलिपि के अभाव में पाठनिर्धारण दुष्कर तो होता ही है। मुझे भी इस शतक की कोई पाण्डुलिपि प्राप्त नहीं हुई। निर्णयसागर के संस्करण के आधार पर ही मैंने इसका सम्पादन किया है। अत: अनेकत्र पाठ निर्धारण मेरे सामने सबसे बड़ी चुनौती के रूप में रहा।

राष्ट्रिय संस्कृत संस्थान के सुविख्यात कुलपति प्रो. राधावल्लभ त्रिपाठी की आज्ञा शिरोधार्य कर बिना किसी पूर्व आधार के इस पर पदार्थप्रकाशिका टीका लिखने का साहस करना निस्सन्देह लोहे के चने चबाने से कम कठिन नहीं था। पाठ की कठिनाई के साथ गोकुलनाथ के कतिपय जटिलप्रयोगों जैसी अनेक चुनौतियाँ इस कार्य में मेरे सामने आयीं तथापि मैंने इसे पूरा करने का प्रयास किया है। निर्णयसागर के पाठ से जहाँ मैं सन्तुष्ट नहीं हो सका वहाँ उचित परिवर्तन करने का भी प्रयास किया है। ऐसे स्थलों में अमृतोदय को प्रमाण माना गया है तथा उन्हें टीका में दर्शाया गया है।

पदार्थप्रकाशिका अपने नाम के अनुसार गोकुलनाथ के शिवशतक के पदार्थो को प्रकाशित करती है। इस टीका से सहायता लेकर आगे इस ग्रन्थ का दार्शनिक और काव्यशास्त्रीय अध्ययन भी किया जा सकेगा। विस्तार के भय एवं समयाभाव के कारण चाह कर भी मैं यहाँ कतिपय तत्त्वों

का विस्तृत उल्लेख नहीं कर सका। विद्वज्जन आगे इस ओर अग्रसर होंगे, यह मेरा विश्वास है।

इक्कीसवीं शताब्दी के प्रारम्भ में राष्ट्रिय-संस्कृत-संस्थान का शिवशतक जैसी रचनाओं की ओर आकृष्ट होना तथा उन्हें टीका और अनुवाद के साथ प्रकाशित करने का सङ्कल्प करना निश्चय ही प्राचीन सम्पदा के संरक्षण एवं सम्प्रेषण के सुयोग का द्योतक है। इस हेतु विद्वत्समूह राष्ट्रिय-संस्कृत-संस्थान के यशस्वी एवं विद्वान् अधिकारियों , विशेष रूप से कुलपति प्रो. राधावल्लभत्रिपाठी का चिर कृतज्ञ रहेगा।

शिवशतक के अशुद्ध स्थलों के पाठ निर्धारण तथा अर्थयोजना के प्रसङ्ग में मैंने अनेक बार डॉ. रामकुमार शर्मा तथा डॉ. विष्णुकान्त पाण्डेय से चर्चा की है। गोकुलनाथ के जीवन एवं कृतियों के परिचय के प्रसंग में प्रो. किशोरनाथ झा, प्रो. शशिनाथ झा तथा प्रो. अम्बिकादत्त शर्मा मेरी इस सारस्वत यात्रा में कहीं न कहीं सहयोगी रहे हैं। अत: इन सभी विद्वानों के प्रति कृतज्ञ हूँ। राष्ट्रिय संस्कृत संस्थान के स्वनामधन्य कुलपति आचार्य राधावल्लभत्रिपाठी तथा कुलसचिव प्रो. रामानुज देवनाथ के श्रीचरणों में प्रणामाञ्जलि समर्पित करता हूँ, जिनके आशीर्वचनों से अलंकृत होकर यह ग्रन्थ गौरव को प्राप्त कर सका।

पदार्थप्रकाशिका में शिवशतक का अर्थ प्रस्तुत करने में मैं पूर्णत: सावधान रहा हूँ तथापि इतने बड़े कृती मनीषी की रचना पर बिना किसी पूर्व आधार के प्रथम टीका लिखना कितना कठिन कार्य होता है, यह विद्वानों से छिपा नहीं। गोकुलनाथ के कतिपय प्रयोग तो उनकी स्वोपज्ञ टीका से ही स्पष्ट हो सकते थे। यद्यपि उनका अर्थ स्पष्ट करने का मैंने पूर्णत: उपक्रम किया है तथापि ऐसे स्थलों में सन्देह रह जाना मानव का सुलभ स्वभाव है। मुझे विश्वास है, विद्वज्जन मेरी त्रुटियों का परिमार्जन कर मेरा उत्साह वर्द्धन करेंगे।

जयपुर

दुर्गाष्टमी - २०६७ विक्रमी **-रमाकान्त पाण्डेय**

महामहोपाध्यायश्रीगोकुलनाथविरचितं

# शिवशतकम्

विद्यावतीसुतरमाकान्तप्रणीतया पदार्थप्रकाशिकाख्यव्याख्यया
भाषानुवादेन च सनाथितम्

रमाकान्तपाण्डेयप्रणीता

## पदार्थप्रकाशिका

महाविद्यो मातर्निगमरसपानेऽतिनिपुणो
जगत्यां विख्यातश्शिवशतककृद्गोकुलकविः।
अयं तस्य ग्रन्थे लिखति नवटीकां तव पदं
रमाकान्तो ध्यायन् विमलवसने! वर्धय धियम्।।१।।

नितान्तं गूढेयं दृढकुचतटा गोकुलगवी
न तस्या आभोगे प्रभवति रसं पातुमखिलम्।
सुतस्ते कान्तोऽसौ जननि! मृदुवक्त्रो मृदुकलः
न किं त्रस्तं पुत्रं दिशसि शिवतन्त्रं विधिसुते!।।२।।

यस्य वाचःपरिस्पन्दे शिवोऽपि स्पन्दते स्वयम्।
गोकुलं तं कविं वन्दे सर्वशास्त्रविशारदम्।।३।।

मान्यो मनीषिणां राधावल्लभो यो विराजते।
गुरुं तं नौमि विद्यासु गतिर्येन प्रवर्तिता।।४।।

रमाकान्तेन बद्धेयं पदार्थानां प्रकाशिका।
गोकुलस्य कवेर्वाचामर्थजातं प्रकाशयेत्।।५।।

## ( १ )

**विततविविधसम्प्रदायशाख -**
**व्यतिकरवेष्टितमूर्तये नमोऽस्तु।**
**बहुतरजगदण्डबीजपूर-**
**प्रसवफलेग्रहिपादपाय तुभ्यम्।।**

**अन्वयः**-विततविविधसम्प्रदायशाखव्यतिकरवेष्टितमूर्तये बहुतरजगदण्ड-बीजपूरप्रसवफलेग्रहिपादपाय तुभ्यं नमः अस्तु।

**पदार्थप्रकाशिका** - काव्यं न केवलं यशःप्रभृतिप्राप्तयेऽपितु शिवेतरक्षति-निवारणपुरस्सरं स्वेष्टार्चनद्वारा तत्परमपुरुषार्थभूतमोक्षप्राप्तयेऽपि भवति। शिवेतरक्षतिरिति कथनेन नित्यसुखात्मकस्य भगवत्सङ्गतिरूपमोक्षस्य लाभ एव फलतो मनीषिणां काव्यशास्त्रविदामभिमतः। स च मोक्षलाभः शतकस्तोत्रादिपाठेन सम्भवत्येवेति पुराणादिप्रमाणसिद्धम्। अतश्च शतश्लोकेषु स्वेष्टं शिवं स्तोतुकामस्तत्रभवान् सर्वतन्त्रस्वतन्त्रो महामहोपाध्यायो गोकुलनाथो वक्ति- **विततेति**- विततविविधसम्प्रदायशाखव्यतिकरवेष्टितमूर्तये, सम्प्रदाया एव शाखा इति सम्प्रदायशाखाः, वितता व्याप्ता विस्तृता वा विविधा अनेकाः सम्प्रदायशाखा यस्य स विततविविधसम्प्रदायशाखः, भगवान् वेदः। तेषां वेदानां व्यतिकरेण समूहेन, ऋगादिवेदैस्तेषां शाखाभिश्च वेष्टिता आच्छादिता मूर्तिर्यस्य स विततविविधसम्प्रदायशाखव्यतिकरवेष्टितमूर्तिः, तस्मै। वेदस्य विविधशाखाभिः प्रशाखाभिश्च वर्ण्यविषयत्वेन अङ्गीकृतशरीरायेत्यर्थः। शाखाशब्दोऽत्र समस्तामपि वैदिकवाङ्मयीं सृष्टिमात्मसात्करोति। बहुतरजगदण्डबीजपूरप्रसवफलेग्रहिपादपाय, बहुतराणां जगदण्डानां ब्रह्माण्डानां बीजपूराणां बीजकोशानां प्रसवे जनने फलेग्रहिपादपाय सफलवृक्षाय। 'स्यादबन्ध्यः फलेग्रहिः' इत्यमरः। तुभ्यं वेदब्राह्मणारण्यकोपनिषदादि-ग्रन्थप्रतिपाद्याय नानाब्रह्माण्डानां जननहेतुभूतानि यानि बीजानि तेषां धारकाय

फलवते वृक्षाय नमोऽस्तु। तादृशवृक्षस्यैकस्मिन्नेव फलेऽसंख्यब्रह्माण्डबीजानि सन्ति। का कथा विविधशाखाप्रशाखालग्नफलानाम्।

वस्तुतोऽत्र सम्प्रदायशाखा इत्येवोचितः पाठः प्रतिभाति। वैदिकतान्त्रिकादिषु वैष्णवानां शैवानां वा सर्वास्वपि सम्प्रदायशाखासु शिवस्य प्राधान्यात्। तथात्वे न केवलं वैदिकसम्प्रदायशाखा अपितु तद्भिन्ना अपि विवक्षिता इति बोद्धव्यम्। अमृतोदये 'विषमनिगमकाननान्तशाखा' इति पाठः।

पुष्पिताग्रावृत्तम्। तथा च तल्लक्षणम्–

''अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा''।।१।।

**अनुवाद** – विविध सम्प्रदायों के रूप में जिनकी शाखाएं फैली हैं उन वेदों के समूह से जिनकी मूर्ति आच्छादित है, अनेक ब्रह्माण्डों के बीजकोशों के प्रसव में सफल पादप (वृक्ष) उस शिव को मेरा नमस्कार है।

## (२)

**न धरणिसलिलानला न वायु–**
**र्न खमत एव न खानि नापि वर्ष्म।**
**न समयककुभौ न चिन्न चित्तं**
**पुरुषपुरन्दर! पूरुषस्तवास्मि।।**

**अन्वयः** – हे पुरुषपुरन्दर! (अहम्) धरणिसलिलानला न, वायुः न, खं न, अत एव खानि अपि न, वर्ष्म न, समयककुभौ न, चित् न, चित्तं न (अस्मि), (अहं) तव पूरुषः अस्मि।

**पदार्थप्रकाशिका** – न धरणीति– हे पुरुषपुरन्दर! पुरुषेषु पुरन्दरः श्रेष्ठः पुरुषपुरन्दरः, तस्य सम्बोधने। 'पुरुषस्त्वात्मनि नरे पुन्नागे च' इति हैमः। धरणिसलिलानला, धरणिश्च सलिलं च अनलश्चेति धरणिसलिलानलाः, पृथ्वीजलाग्नयः। न, नास्मि। अहं गन्धरहितत्वात् पृथ्वी नास्मि,

शीतस्पर्शवत्त्वाभावात् जलं नास्मि, उष्णवत्त्वाभावाद् अग्निरपि नास्मि। न वायुः, स्पर्शरहितत्वान्न पवनः अस्मि। खम् आकाशः अपि नास्मि, अशब्दगुणवत्त्वात्। अत एव पञ्चभूतगुणानां ग्राहकत्वाभावात् न खानि इन्द्रियाणि। 'खमिन्द्रिये पुरे क्षेत्रे शून्ये बिन्दौ विहायसि। संवेदने देवलोके शर्मण्यपि नपुंसकम्' इति मेदिनी। इन्द्रियाणि अपि नास्मीत्यर्थः। इन्द्रियाणि पृथिव्यादिगुणानां ग्राहकाणि भवन्ति। न अहं तथेति भावः। वर्ष्म शरीरं न, शरीरस्य पञ्चभूतविकारत्वात्। अथवा अहं त्वदंशभूतोऽविनश्वर आत्मा, अतो न शरीरम्, तद्विनाशित्वात्। 'वर्ष्म देहप्रमाणयोः' इत्यमरः। समयककुभौ समयश्च ककुप् चेति समयककुभौ। कालदिशावित्यर्थः। न, नास्मि। चित् न, ज्ञानं चैतन्यं चेतना वा नास्मि। चित्तं मनश्च नास्मि। अहं तु तव शिवस्य पूरुषः त्वदंशभूतश्चैतन्योऽस्मि। त्वं पुरुषपुरन्दरोऽहं पुनः सामान्यपुरुष इत्यहं तव दासो वा। 'चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः' इत्यमरः। 'बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः। प्रज्ञोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्ति-चेतनाः' इत्यमरः। अहं धरणिप्रभृति न भवामि। केवलं तव दासः सेवको वास्मीत्यभिप्रायः। अथवा त्वदंशभूतश्चेतनोऽस्मीति विवक्षा।

**अनुवाद** – हे पुरुष श्रेष्ठ! मैं पृथ्वी, जल या अग्नि नहीं हूँ, मैं वायु और आकाश भी नहीं हूँ। अत एव इन्द्रिय और शरीर भी नहीं हूँ क्योंकि इन्द्रिय पृथ्वी आदि पञ्चभूतों के गन्ध आदि गुणों के ग्राहक होते हैं तथा शरीर पञ्चभूतों का विकार और नश्वर है। मैं आत्मा होने के कारण शरीर और इन्द्रिय से भिन्न हूँ। मैं काल और दिशा भी नहीं हूँ। बुद्धि और मन भी नहीं हूँ। मैं तुम्हारे अंश से उत्पन्न चेतन हूँ।

**( ३ )**

**अविरतपरिवृत्तदण्डकाष्ठा-**
**कुलमतुलव्यतिवर्तमानवेगम्।**

**भ्रमयसि जगदण्डगोलमाला-**
**कलशकलापकुलाल! कालचक्रम्।।**

**अन्वयः** - हे जगदण्डगोलमालाकलशकलापकुलाल! (त्वम्) अविरतपरिवृत्तदण्डकाष्ठाकुलम् अतुलव्यतिवर्तमानवेगं कालचक्रं भ्रमयसि।

**पदार्थप्रकाशिका**-अविरतेति-हे जगदण्डगोलमालाकलशकलापकुलाल! हे जगदण्डानां ब्रह्माण्डानां गोलाः मण्डलानि जगदण्डगोलाः, तेषां मालाः पङ्क्तयः। 'माला तु पङ्क्तौ पुष्पादिदामनि' इति हैमः। ता जगदण्डगोलमाला एव कलशकलापाः घटसमूहाः, तेषां कुलालः कुम्भकारः, स्रष्टेति यावत्। तस्य सम्बोधने। ब्रह्माण्डमण्डलपङ्क्तिरूपकलशसमूहानां कर्तः! 'कलापो भूषणे बर्हे तूणीरे संहतेऽपि च' इत्यमरः। तादृश हे कुलाल! त्वम् अविरतपरिवृत्त-दण्डकाष्ठाकुलम्, अविरतं सततं परिवर्त्तेन गतिशीलेन दण्डकाष्ठेन आकुलं व्याकुलम्। अतुलव्यतिवर्तमानवेगम्, अतुलोऽनुपमो व्यतिवर्तमानोऽतिशयवान् वेगः यस्य तादृशं कालचक्रं काल एव चक्रं तद् भ्रमयसि गतिमत् करोषीत्यर्थः। कुलालो यथा कलशादीनां निर्माणं दण्डकाष्ठेन वर्धितवेगेन चक्रेण करोति तथैव शिवोऽपि विविधब्रह्माण्डानां सृष्ट्यै दण्डकाष्ठाभ्यां दिक्कालाभ्यां कालचक्रं भ्रमयति। 'दण्डो यमे मानभेदे लगुडे दमसैन्ययोः' इति विश्वः। 'काष्ठा दारुहरिद्रायां कालमानप्रकर्षयोः। स्थानमात्रे दिशि च स्त्री दारुणि स्यान्नपुंसकम्' इति मेदिनी। दिक्कालाभ्यामित्यर्थः। काल एव तस्य कुलालचक्रम्। तस्यैव गत्या बहुतरब्रह्माण्डानामुत्पत्तिरित्यर्थः। शिवपक्षे दण्डकाष्ठाशब्दः कालस्य दिशश्च वाचकः कुलालपक्षे च काष्ठदण्डस्येति विशेषः।

**अनुवाद** - हे ब्रह्माण्ड मण्डलों के समूह रूप कलश समूहों के कुलाल! तुम लगातार घुमाये गये दण्डकाष्ठ से व्याकुल अपूर्व और अतिशय वेग से युक्त कालचक्र को गतिमान् करते हो।

## ( ४ )

**भुवनपुटकुटीरहट्टयन्त्र-**
**भ्रमणसहध्रुवतर्कुतः क्रमेण।**
**सृजसि समयसूत्रमत्र माया-**
**मयपटवानविधानतन्तुवायः।।**

**अन्वयः** - मायामयपटवानविधानतन्तुवायः (त्वम्) भुवनपुटकुटी-रहट्टयन्त्रभ्रमणसहध्रुवतर्कुतः अत्र समयसूत्रं सृजसि।

**पदार्थप्रकाशिका** - भुवनेति - मायामयपटवानविधानतन्तुवायः, मायामयस्य पटस्य वानविधाने सीवनविधाने, वयननियम इति यावत्। तन्तुवायः कुविन्दः। 'वानं शुष्कफले शुष्के सीवने गमने कटे। जलसम्प्लुतवातोर्मिसुरङ्गासौरभेषु च' इति हैमः। 'तन्तुवायः कुविन्दः' इति चामरः। मायायुक्तवस्त्रवयननियम-कुविन्द इत्यर्थः। शिव एव मायाप्रपञ्चात्मकं वस्त्रं सीव्यतीति यावत्। भुवनपुटकुटीरहट्टयन्त्रभ्रमणसहध्रुवतर्कुतः, भुवनानां पुटानि भुवनपुटानि, ब्रह्माण्डानीति यावत्। तान्येव कुटीराणि लघुगृहाणि। तेषु भुवनपुटकुटीरेषु हट्टयन्त्रस्य वयनयन्त्रविशेषस्य (करघा इति भाषायाम्) भ्रमणं यः सहते स ध्रुवो ध्रुवनामकः सूक्ष्मो नक्षत्रविशेष एव तर्कुः (तकली इति भाषा) तस्मात्। पञ्चम्यर्थे तसिल्। अत्र जगति समयसूत्रं कालरूपं सूत्रं सृजसि घटयसि। शास्त्रेषु काल एव समेषां कारणं निरूपितम्। शिवः तं कालं सृजति, तेन च सर्गविधानमिति भावः।

**अनुवाद** - मायामय वस्त्र को बुनने का विधान करने वाले जुलाहे तुम भुवनरूप कुटीरों के मध्य करघों को चलाते हो तथा उस करघे के भ्रमण को सहन कर सकने वाले ध्रुव रूप तकली से समयसूत्र का सृजन करते हो।

**( ५ )**

**निगमवनवनस्पते! प्रसूषे**
**कति जगदण्डमयान्युदुम्बराणि।**
**दधति बहलजन्तुजालमन्तः**
**पुनरपि तानि लयं त्वयि प्रयान्ति।।**

**अन्वयः** – हे निगमवनवनस्पते! कति जगदण्डमयानि उदुम्बराणि प्रसूषे। तानि अन्तः बहलजन्तुजालं दधति। पुनरपि त्वयि लयं प्रयान्ति।

**पदार्थप्रकाशिका** – निगमेति– हे निगमवनवनस्पते! निगमा वेदा एव वनानि अरण्यानि निगमवनानि तेषां वनस्पतिः अदृष्टपुष्पः फलप्रदो वृक्षविशेष उदुम्बरादिः। निगमवनस्पतिः, तस्य सम्बोधने। वेदारण्यस्य अदृष्टपुष्पः फलप्रदवृक्ष इत्यर्थः। कति अनेकानि जगदण्डमयानि ब्रह्माण्डमयानि उदुम्बराणि उदुम्बरफलानि। 'उदुम्बरस्तु देहल्यां वृक्षभेदे च पण्डके' इत्यमरः। उदुम्बरशब्दस्य नपुंसके प्रयोगात्तस्य फलान्येव शब्देनाऽनेनाभीष्टानि। उदुम्बरफलान्येव अन्तर्जन्तुजालं दधति, न वृक्षः। प्रसूषे जनयसि। तानि उदुम्बराणि उदुम्बरफलानि अन्तः स्वमध्ये बहलानां विविधानां जन्तूनां, सूक्ष्मकीटसदृशानां प्राणिनामिति यावत्, जालं समूहं दधति धारयन्ति। पुनश्च तानि त्वयि शिव एव लयं विनाशं प्रयान्ति प्राप्नुवन्ति। त्वां प्राप्य त्वद्रूपा एव भवन्तीत्यर्थः।

**अनुवाद** – हे निगमवन के वनस्पति! तुम कितने ही ब्रह्माण्डमय उदुम्बरों को उत्पन्न करते हो। वे उदुम्बर अपने भीतर बहुतर जन्तु जालों को धारण करते हैं और तुम में ही समा  जाते हैं।

( ६ )

**बहुतरजगदण्डभारभर्तु-**
**र्नहि महिमानमहं तवाऽवयामि।**
**मशक इव शलाटुगर्भजन्मा**
**विटपबृहत्त्वमुदुम्बरद्रुमस्य।।**

**अन्वयः** - अहं बहुतरजगदण्डभारभर्तुः तव महिमानं शलाटुगर्भजन्मा मशकः इव उदुम्बरद्रुमस्य विटपबृहत्त्वम् नहि अवयामि।

**पदार्थप्रकाशिका** - बहुतरेति - अहं गोकुलनाथोपाध्यायस्तव दासः जीवो वा बहुतरजगदण्डभारभर्तुः बहुतराणां जगदण्डानां ब्रह्माण्डानां भारस्य भर्तुः धारयितुस्तव शिवस्य महिमानं प्रभावं नहि अवयामि, न जानामि। अवपूर्वको याधातुः। न अवगच्छामीत्यर्थः। कथमिव न जानामि ? शलाटुगर्भजन्मा शलाटुः उदुम्बरफलम्, तस्य गर्भाल्लब्धं जन्म येन स शलाटुगर्भजन्मा मशकः कीटविशेषः उदुम्बरद्रुमस्य यज्ञवृक्षस्य विटपबृहत्त्वं शाखानां विशालताम्, इव। यथा उदुम्बरफलाल्लब्धजनिः कीटस्तद्वृक्षस्य स्वकारणभूतस्य शाखाविशालतां विस्तारं वा न वेत्ति तथैव अहमपि तव महिमानं न वेद्मीत्यर्थः। शलाटुः अपक्कं फलमित्यमरः। अत्र पुनः अर्थवशात्तस्य फलमात्रे लक्षणा। उदुम्बरप्रसङ्गे पठितत्वादुम्बरफलरूपोऽर्थः।

**अनुवाद** - अनेक ब्रह्माण्डों के भार को धारण करने वाले शिव! मैं तुम्हारी महिमा को उसी प्रकार नहीं जानता जैसे उदुम्बर के फल से जन्म लेने वाला कीट उस उदुम्बर वृक्ष की शाखाओं की विशालता को नहीं जान पाता।

( ७ )

**प्रविशति मम चित्तवेश्म सर्वे-**
**न्द्रियविकलः श्रुतिशिष्यमाणवर्त्मा।**

**विधिगृहतिलबिन्दुजालबर्ही**
**गलितवपुः प्रपितामहः प्रजानाम्।।**

**अन्वयः** - सर्वेन्द्रियविकलः श्रुतिशिष्यमाणवर्त्मा विधिगृहतिल-बिन्दुजालबर्ही गलितवपुः प्रजानां प्रपितामहः मम चित्तवेश्म प्रविशति।

**पदार्थप्रकाशिका** – प्रविशतीति – सर्वेन्द्रियविकलः ज्ञानकर्मेन्द्रियरहितः, श्रुतिशिष्यमाणवर्त्मा श्रुतिभिः शिष्यमाणम् अवशिष्टं वर्त्म यस्य, सः। श्रुतिभिरप्यज्ञात इति यावत्। तथा च श्रीमद्भागवते – ''निषेधशेषो जयतादशेष'' इत्युक्त्वा निषेधमुखेन भगवतः स्वरूपमीरितम्। शिवमहिम्नस्तोत्रेऽपि– ''अतीतः पन्थानं तव च महिमा वाङ्मनसयोरतद्व्यावृत्या यं चकितमभिधत्ते श्रुतिरपि।'' इत्युक्त्वा शिवस्य श्रुतिशिष्यमाणतोक्ता। अतः श्रुतिरपि ते तत्त्वं न जानाति क्वाहं लौकिकः प्राणीत्यर्थः। विधिगृहतिलबिन्दुजालबर्ही, विधिगृहाणि ब्रह्माण्डानि एव तिलाकारबिन्दुजालानि यस्य स बर्ही तिलमयूरः। मयूरपिच्छे हि तिलाकारबिन्दुजालं प्रसिद्धम्। शब्दकल्पद्रुमे तिलमयूरशब्द इदं स्पष्टम्। गलितवपुः शरीररहितः प्रजानां प्रपितामहः, पितामहः ब्रह्मा, शिवः ब्रह्मणोऽपि जनक इति स प्रपितामहः मम चित्तवेश्म मनोभवनं प्रविशति आगच्छति। अमृतोदये तु–

ब्रह्माण्डबिन्दुतिलजालवहो विहीनः
सर्वेन्द्रियविकलकर्मशरीरबन्धः
हृद्वेश्म मे प्रविशति श्रुतिदेशितेन
मार्गेण कोऽपि जगतीप्रपितामहोऽसौ।। इति पाठः।।

**अनुवाद** - ज्ञानेन्द्रियों तथा कर्मेन्द्रियों से रहित, श्रुतियों के द्वारा भी अज्ञात, ब्रह्माण्ड रूपी तिलसदृश बिन्दुओं को धारण करने वाला मयूर, शरीररहित, प्रजाओं का प्रपितामह (शिव) मेरे चित्तरूपी घर में प्रवेश करता है।

## ( ८ )

**विगलितवपुषं विकारवार्ता-**
**रहितमनिन्द्रियमक्रियं पुराणम्।**
**त्वमसि तदिति चेतनाविशेषं**
**निजपितरं निगमाः प्रबोधयन्ति।।**

**अन्वयः** - निगमाः विगलितवपुषं विकारवार्तारहितम् अनिन्द्रियम् अक्रियं पुराणं निजपितरं 'तत् त्वमसि' इति चेतनाविशेषं प्रबोधयन्ति।

**पदार्थप्रकाशिका** - विगलितेति - निगमाः वेदाः विगलितवपुषं शरीररहितं, विकारवार्तारहितं कामक्रोधादिविकारशून्यम्, जन्मादिषड्-विकाररहितम्, अनिन्द्रियम् इन्द्रियेभ्यो रहितम्, अक्रियं क्रियाशून्यं पुराणं सनातनं निजपितरं निजजन्मदातारं 'तत्त्वमसि' इति महावाक्येन चेतनाविशेषरूपेण प्रबोधयन्ति, भागत्यागलक्षणया जहदजहल्लक्षणया वा कथयन्ति। तादृशश्चेतनाविशेषस्त्वमेवा-ऽसि न कश्चिदन्य इत्यर्थः। अथवा तादृशं चैतन्यघनं तत् ब्रह्म त्वं जीवोऽसि इत्येवं निगमास्त्वां परमात्मभिन्नं वदन्ति। अमृतोदये तु-

विगलदवयवं विकारमात्रा-
रहितमनिन्द्रियमक्रियं पुराणम्।
त्वमसि तदिति चेतनामयं मा-
मुपनिषदोऽपि बत प्रमोहयन्ति।।

इति पाठः।

**अनुवाद** - वेद अपने पुराण पिता को शरीररहित, विकारवार्ता से रहित, इन्द्रियों से रहित और क्रियारहित बताते हैं। वे 'तत्त्वमसि' इस महावाक्य से चेतनाविशेष के रूप में अपने उस पिता का अभिधान करते हैं। हे शिव! तुम वही ('तत्त्वमसि' इस महावाक्य से बोध्य) चेतनाविशेष हो।

## ( ९ )

**जगदिदमुपदीपयत्यविद्या–**
**तिमिररिपौ त्वयि न स्वमप्यवैमि।**
**प्रतपति तपनातपे तपर्तौ**
**भजति यदान्ध्यमसावुलूकलोकः।।**

**अन्वयः** – अविद्यातिमिररिपौ त्वयि इदं जगत् उपदीपयति (सति) स्वम् अपि न अवैमि। यत् तपर्तौ तपनातपे प्रतपति (सति) असौ उलूकलोकः आन्ध्यं भजति।

**पदार्थप्रकाशिका** – जगदीति – अविद्यातिमिररिपौ अविद्या एव तिमिरम् अन्धकारः, अज्ञानमिति यावत्। तस्य अविद्यातिमिरस्य रिपुः शत्रुः, अविद्यातिमिररिपुः तस्मिन्, अविद्यातिमिररिपौ, अज्ञानान्धकारविनाशके त्वयि शिवे इदं ममाधारभूतं जगत् मायामोहात्मकं संसारम् उपदीपयति प्रकाशयति सत्यपि स्वं न अवैमि, न प्रत्यभिजानामि। त्वादृशेऽज्ञानान्धकारविनाशके संसारमुपदीपयत्यपि अहं स्वं स्वरूपं नावगच्छामि। यत् यस्माद्धेतोः तपर्तौ ग्रीष्मकाले तपनस्य सूर्यस्य आतपे घर्मे प्रतपति सति भृशं प्रकाशयति सति उलूकलोकः आन्ध्यम् अन्धत्वं नेत्रज्योतीराहित्यं भजति सेवते। 'भानुर्हंसः सहस्रांशुस्तपनः सविता रविः' इत्यमरः। ग्रीष्मर्तौ यदा भानुः प्रचण्डं तपति तदा तस्यैव प्रकाशस्य आधिक्यादुलूकलोकोऽन्धो जायते। तथैवाहं सांसारिकस्त्वया प्रदीपितं जगद्दृष्ट्वाऽपि स्वं न अवगच्छामीत्याशयः। निदर्शनाऽलङ्कारः। अमृतोदये तु– 'जगदिदमुपजीवयत्यविद्या' इत्यादि पाठः।

**अनुवाद** – तुम अविद्या रूपी अन्धकार के शत्रु हो। तुम्हारे द्वारा यह जगत् प्रकाशित किया जा रहा है तथापि मैं अपने को नहीं पहचान पा रहा। ग्रीष्म ऋतु में सूर्य का प्रचण्ड ताप होने पर भी यह उलूकलोक अन्धत्व को प्राप्त हो जाता है।

**( १० )**

**विषमनिगमकाननान्तशाखा-**
**ततिषु निलीय परान्निरीक्षमाणः।**
**परिणतिविदलज्जगत्कपित्थ-**
**ग्रसनकपे! सुचिरान्निरूपितोऽसि।।**

**अन्वयः** - हे परिणतिविदलज्जगत्कपित्थग्रसनकपे! विषमनिगम-काननान्तशाखाततिषु निलीय परान् निरीक्षमाणः (त्वं) सुचिरात् निरूपितः असि।

**पदार्थप्रकाशिका** - विषमनिगमेति - हे परिणतिविदल-ज्जगत्कपित्थग्रसनकपे! परिणत्या परिणामेन विदलतः खण्डीभवतो जगद्रूपस्य कपित्थस्य फलविशेषस्य ग्रसनकपिः भक्षणवानरः, तस्य सम्बोधने। हे परिणामेन खण्डीभवतः संसाररूपकपित्थफलस्य भक्षणशीलवानर! त्वं विषमं दुरूहं यत् निगमकाननं वेदारण्यं तस्य अन्तशाखाततिषु अन्तर्वर्तिविटपश्रेणीषु निलीय अन्तरितो भूत्वा, आत्मानमाच्छाद्य परान् अन्यान् जीवान् निरीक्षमाणः पश्यन् सुचिरात् चिरकालात् निरूपितः दृष्टः असि, ज्ञातोऽसि। त्वं दुरूहवेदारण्यान्तर्वर्तिविटपपंक्तिषु अन्तरितो भूत्वा परान् पश्यसीति बहुकालानन्तरं ज्ञातोऽसि। यद्वा परिणतिविदल-ज्जगत्कपित्थग्रसनकपे! इत्यत्र 'कपिः' इति प्रथमान्तपाठः, न सम्बोधनम्। तथात्वे सुचिरात् तादृशकपिः निरूपितोऽसीत्यर्थयोजना।

**अनुवाद** - हे परिणाम से खण्ड खण्ड हो रहे संसाररूपी कपित्थ फल को खाने वाले वानर! तुम दुरूह वेदरूपी जंगल के अन्दर शाखावलियों में छिपकर दूसरों (जीवों)को देखते हो, यह तथ्य बहुत समय के बाद ज्ञात हुआ है।

## ( ११ )

**सकलमपि मया स्वकर्मबीजं**
**त्वयि वृषवाह! समर्पयाम्बभूवे।**
**तव मम च न चेत्फलं प्रसूते**
**कथमधुनाऽप्यहमेव दोषभूमिः।।**

**अन्वयः** - हे वृषवाह! मया सकलम् अपि स्वकर्मबीजं त्वयि समर्पयाम्बभूवे। तव मम च फलं न प्रसूते चेत्, अधुना अपि अहम् एव कथं दोषभूमिः अस्मि।

**पदार्थप्रकाशिका** - सकलमपीति- हे वृषवाह! हे वृषभवाहन शिव! मया शिवशतककर्त्रा गोकुलनाथेन जीवेन वा सकलं समग्रम् अपि पुण्यापुण्यजनकं स्वकर्मबीजं स्वशुभाशुभकर्मणां बीजं त्वयि शिवे समर्पयाम्बभूवे समर्पितं बभूव। त्वयि समर्पितं तद् बीजं तव शिवस्य मम ग्रन्थकर्तुः गोकुलनाथस्य आत्मनो वा फलं परिणामं न प्रसूते, न जनयति चेत्, अधुना स्वकर्मबीजसमर्पणानन्तरम् अहमेव कथं दोषभूमिः दोषाणाम् आधारोऽस्मि। भगवच्चरणे समर्पितानि कर्मबीजानि भगवतः कृते फलं न जनयन्ति न वा भक्तस्य कृत एव, तथापि तज्जन्यफलेन भक्त एव दोषाणामाधारो भवति न भगवानित्यभिप्रायः। वस्तुतस्तु भगवति कर्मबीजसमर्पणात् शुभाशुभफलैर्मुक्तिर्भवति। तथा चोक्तं श्रीमद्भगवद्गीतायाम्-

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्।।
शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः। (९-२७-२८)

भगवतः कृष्णस्य उक्त्याऽनया ममापि शुभाशुभफलैर्मुक्तिः स्यादेव।

**अनुवाद** - हे वृषभवाहन शिव! मैंने अपने समस्त शुभ और अशुभ कर्मों के बीज तुझ में समर्पित कर दिये हैं। उन बीजों से यदि तुम्हारे और मेरे, दोनों के लिये परिणाम की उत्पत्ति नहीं हो रही, तो फिर अब मैं ही क्यों दोषभूमि माना जा रहा हूँ।

## ( १२ )

**नट इव वशगो भवामि यासा-**
**महमपहस्तितसर्वभूतपूर्वः ।**
**प्रकृतिचरितनाट्यसूत्रधार !**
**भ्रमयसि मामियतीषु भूमिकासु ।।**

**अन्वयः** - हे प्रकृतिचरितनाट्यसूत्रधार ! माम् इयतीषु भूमिकासु भ्रमयसि यासाम् अपहस्तितसर्वभूतपूर्वः (अहम्) नट इव वशगः भवामि।

**पदार्थप्रकाशिका** - नटेति- हे प्रकृतिचरितनाट्यसूत्रधार! प्रकृत्याः मायायाः चरितम् एव नाट्यं प्रकृतिचरितनाट्यम्, प्रकृतिचरितनाट्यस्य जन्ममरणादिकस्य सूत्रधारः, तस्य सम्बोधने। हे मायाचरितनाट्यस्य प्रधाननट! मां जीवं गोकुलनाथं वा इयतीषु एतावतीषु भूमिकासु भ्रमयसि परिवर्तयसि यासां भूमिकानाम् अपहस्तितसर्वभूतपूर्वः अपहस्तितं समर्पितं सर्वं भूतपूर्वं संसारदशायां प्राप्तं शुभाशुभं कर्म येन सः, तादृशोऽहं नट इव शैलूष इव वशगः वशीभूतो भवामि। यथा नटो विभिन्ना दुष्यन्तादिभूमिका निर्वहन् तद्गतचित्तो भवति। स्वकीयं सर्वस्वं विस्मृत्य सः 'अहमेव दुष्यन्त' इत्यादि स्मरति तद्वदस्यां संसारदशायां विविधभूमिकासु त्वया भ्रामितोऽहं तासां सर्वासां भूमिकानां वशंवदो भवामीत्याशयः। 'कोऽहम्' इति ज्ञानं न मम भवति। वस्तुतो नैता वास्तविकभूमिका अपित्वारोपिता एवेत्यर्थः। काव्यमालासंस्करणे तु 'प्रकृतिनाट्यसूत्रधार' इति पाठः। तथात्वे छन्दोभङ्गः।

**अनुवाद** - हे प्रकृतिनाट्य के सूत्रधार शिव! तुम मुझे इतनी भूमिकाओं में घुमाते हो कि पहले ही (संसारदशा में) सब कुछ तुझे समर्पित कर चुकने वाला मैं नट की तरह उन भूमिकाओं के वश में हो जाता हूँ। (जैसे नट उन उन भूमिकाओं में जाकर तन्मय हो जाता है, वह अपने को राम, दुष्यन्त आदि ही समझता है, उसी प्रकार मैं भी उन सांसारिक भूमिकाओं में जाकर अपनी वास्तविकता को भूल जाता हूँ और उस भूमिका को ही वास्तविक समझ लेता हूँ)।

**( १३ )**

**भवदभिरुचितासु मे क्रियासु**
**व्यवहरतोऽनुदिनं हिताहितासु।**
**जननिधनबन्धमोचनेषु**
**प्रभुरसि भूतपते! तवाऽस्मि दासः।।**

**अन्वयः** – हे भूतपते! (त्वं) भवदभिरुचितासु हिताहितासु क्रियासु अनुदिनं व्यवहरतः मे जननिधनबन्धमोचनेषु प्रभुः असि। (अहं) तव दासः अस्मि।

**पदार्थप्रकाशिका** – भवदिति – हे भूतपते! भूतानां संसारे उत्पन्नानां पतिः स्वामी भूतपतिस्तत्सम्बोधने। हे स्वामिन्! भवदभिरुचितासु भवतः शिवस्य अभिरुचितासु समीहितासु हिताहितासु हितसाधिकासु अहितकारिणीषु च क्रियासु सांसारिकव्यवहारेषु अनुदिनं प्रत्यहं व्यवहरतः व्यवहारं कुर्वतः मे मम जीवस्य ग्रन्थकर्तुर्वा जननिधनबन्धमोचनेषु जननं जन्म निधनं मृत्युश्चेति जननिधने ते जननिधन एव बन्धे बन्धने तयोर्मोचनेषु स्वसन्निधिप्रदानेन मोक्षदानेन जन्ममरणबन्धनमोक्षेषु प्रभुः समर्थः असि भवसि। अहं तव दासोऽस्मि भवांश्च मम स्वामीति। स्वामिनः कर्तव्यं दासस्य रक्षणं भवति। मुक्तेरनन्तरमपि यदा कदापि पुण्यस्य क्षीणतावशान्मर्त्यशरीरप्राप्तिर्भवेत्तदा सर्वदा त्वया मम जन्ममरणराहित्यं विधेयमेव। जन्मजन्मान्तरीयतादृशबन्धस्य मोक्षणेनेति विवक्षया मोचनेष्वित्यत्र बहुवचनप्रयोगः। न केवलमस्मिञ्जन्मनि जन्मान्तरेष्वपि त्वया तथाचरणीयमिति भावः।

**अनुवाद** – हे भूतपते! शिव! मैं रोज तुम्हारे द्वारा चाही गयी हितात्मक और अहितात्मक क्रियाओं में व्यवहार कर रहा हूँ। तुम मेरे जन्म-मरण रूप बन्धन को खोलने में समर्थ हो। मैं तुम्हारा दास हूँ।

## ( १४ )

**भवदभिमतमेव सेवमानो**
**हितमहितं च तथा वृथाऽस्मि बद्धः।**
**तदपि कतममाश्रये शरण्यं**
**बत परवानितरः पतिस्त्वमेव।।**

**अन्वयः** – भवदभिमतम् एव हितम् अहितं च सेवमानः (अहम्) तथा वृथा बद्धः अस्मि। बत तदपि कतमं शरण्यम् आश्रये। इतरः परवान् (अस्ति) त्वम् एव पतिः (असि)।

**पदार्थप्रकाशिका** – भवदिति– हे भूतपते! भवदभिमतमेव भवदिष्टमेव हितं जन्म अहितं मृत्युं च, अथवा हितं पुण्यं अहितं पापं च सेवमानो भजमानः अहं तथा जन्ममृत्युबन्धने वृथा व्यर्थमेव बद्धः अस्मि। मम हिताहितक्रियाणां तवाभिमतत्वान्नाऽहं बन्धनयोग्योऽपितु मुक्तियोग्य एव। बत इति खेदार्थकमव्ययम्। तदपि तस्माद्धेतोः अपि कतमं शरण्यं शरणप्रदम् आश्रये। इतरस्त्वद्भिन्नः सर्वः परवान् परतन्त्रो वर्तते। त्वं शिव एव पतिः स्वामी। अन्ये सर्वेऽपि ब्रह्मप्रभृतयो देवास्त्वत्परतन्त्राः। त्वमेव समेषां स्वामीति अहं त्वामेव शरणं प्रपद्ये इति भावः।

**अनुवाद** – हे शिव! मैं आपके द्वारा वाञ्छित हित और अहित का सेवन करता हूँ, अतः आपके द्वारा जन्म और मृत्यु के बन्धन में व्यर्थ ही बाँधा गया हूँ। अब मैं किसकी शरण में जाऊँ। सभी तो तुम्हारे परतन्त्र हैं। एक तुम ही स्वामी हो।

## ( १५ )

**वरमुपहसनीयवर्णकोऽयं**
**विविधविकारविडम्बितस्वरूपः।**
**तदपि कृतकहासमात्रहेतो-**
**र्विरम निवारय निःसहोऽस्मि मायाम्।।**

**अन्वयः** - विविधविकारविडम्बितस्वरूपः अयम् उपहसनीयवर्णकः वरम्। तदपि कृतकहासमात्रहेतोः विरम। (अहं) निःसहः अस्मि। (अतः) मायां निवारय।

**पदार्थप्रकाशिका** - वरमिति- विविधविकारविडम्बितस्वरूपः विविधैर्विकारैर्मायाप्रपञ्चादिभिर्विडम्बितमनुकृतं हासप्रधानतां प्रापितं स्वरूपं यस्य तादृशोऽयं मद्रूपः उपहसनीयवर्णक उपहासपात्रभूतो वर्णकश्चारणः नटो वा वरम्। 'वर्णकश्चारण' इति शब्दकल्पद्रुमः। मायाप्रपञ्चादिभिः संसारेऽस्मिन् नाना योनिषु विविधानि रूपाणि धृत्वा जनानामनुरञ्जकभूतश्चारणरूपो नटरूपो वा जनो वर्ते इत्येव श्रेष्ठम्। तदपि मत्कृतरूपानुकृत्यादि, कृतकहासमात्रहेतोः कृत्रिमहासमात्रस्य हेतुरस्ति न वास्तविकमतस्ततो विरम विरामं कुरु। अहं निःसहस्तव मायां सोढुमसमर्थोऽस्मि। अतः स्वीयां मायां निवारय, दूरीकुरु। अमृतोदये 'उपहसनीय वर्णिकोऽहम्' इति पाठः।।१५।।

**अनुवाद** - अनेक विकारों से अनुकृत (हास को प्राप्त कराये गये) स्वरूप वाला, उपहास का पात्र चारणरूप (नट) मैं श्रेष्ठ हूँ। वस्तुतः मेरे द्वारा की गयी यह रूप की अनुकृति कृत्रिमहास की कारण मात्र है, अतः इससे विराम लो। मै तुम्हारी माया को सहन कर पाने में असमर्थ हूँ। इसलिए उसे दूर करो।

**( १६ )**

**क्व जगति कतमाह्नि कस्य हेतो-**
**रहमिह बद्ध इति त्वमेव वेत्थ।**
**स्वमपि यदि न चेतये न च त्वां**
**मम करुणामय! तत्र कोऽपराधः।।**

**अन्वयः** - हे करुणामय! अहम् इह जगति क्व कस्य हेतोः कतमाह्नि बद्धः, इति त्वम् एव वेत्थ। यदि (अहम्) स्वम् अपि न चेतये, न च त्वां (चेतये) तत्र मम कः अपराधः (अस्ति)।

**पदार्थप्रकाशिका** - क्व जगतीति- हे करुणामय! दयामय! करुणापूरितहृदय इति यावत्। अहं जीवः इह अस्मिन् जगति संसारे क्व कस्मिन् स्थाने, कस्य हेतोः कस्य कर्मणः कारणात् कतमाह्नि कस्मिन् दिवसे बद्धः निबद्धः अस्मि इति तु त्वमेव वेत्थ जानासि, नाहं वराको जीवः। हे प्रभो! यदि नाम अहं जीवः स्वं स्वकीयम् आत्मस्वरूपं न चेतये, न परिचिनोमि न च त्वां शिवं परिचिनोमि तदा तत्र मम दीनस्य कोऽपराधः ? न कोऽपीत्यर्थः। तत्तु तव मायाया एव लीला। अमृतोदये 'कुजगति' इति पाठः।

**अनुवाद** - हे करुणामय! मैं इस संसार में कहाँ किस कारण कितने दिन के लिये बाँधा गया हूँ, यह तुम ही जानते हो। प्रभो! यदि मैं स्वयं को नहीं जानता तथा तुम्हें भी नहीं जानता तो उसमें मेरा क्या अपराध है ?।

**( १७ )**

**अविदितगतिना प्रमादनिद्रा -**
**मुषितमतिः कितव! त्वयाऽस्मि बद्धः।**
**कथमपि मम दृष्टिवर्त्मवर्ती**
**भव पथतस्करबन्धने प्रभुः स्याः।।**

**अन्वयः** – हे कितव! अविदितगतिना त्वया प्रमादनिद्रामुषितमतिः (अहं) बद्धः अस्मि। कथम् अपि मम दृष्टिवर्त्मवर्ती भव। पथतस्करबन्धने च प्रभुः स्याः।

**पदार्थप्रकाशिका** – अविदितेति– हे कितव! वञ्चक! 'कितवो धूर्तवन्मत्ते वञ्चके कनकाह्वये' इति विश्वः। अविदितगतिना त्वया, अविदिता गतिर्यस्य स अविदितगतिस्तेन त्वया शिवेन। तव गतिं न कोऽपि जानातीति त्वमविदितगतिरसि। प्रमादनिद्रामुषितमतिः प्रमाद एव निद्रा प्रमादनिद्रा प्रमादनिद्रया मुषिता चोरिता दूरीकृता वा मतिः ज्ञानं यस्य स प्रमादनिद्रामुषितमतिस्तादृशोऽहं बद्धोऽस्मि, जन्ममरणबन्धने निगडितोऽस्मीति भावः। वस्तुतो नाहं सांसारिकं दुःखं सुखं वेच्छामि, किन्तु प्रमादनिद्रया त्वत्स्वरूपस्मरणरूपकर्मणो विरतोऽहं त्वया मम समीहाज्ञानं विनैव संसारेऽस्मिन् बद्धोऽभवम्। अतः सम्प्रति कथम् अपि केन प्रकारेण अपि दृष्टिवर्त्मवर्ती नेत्रमार्गवर्ती प्रत्यक्षं भव तथा च मम पथि विद्यमानानां तस्कराणां मायामोहादिरूपचौराणां बन्धने प्रभुः स्याः। मम नेत्रपथवर्ती भूत्वा मम भगवदाराधनादिमार्गे विद्यमानानां तस्कराणामपाकरणे समर्थो भव। भगवतो दर्शनमात्रेणैव मायामोहादीनां विनाशो भवतीति तद्दर्शनमेव तदपाकरणे सामर्थ्यं भजत इति भक्तस्य तद्दर्शनाभिलाषः। अमृतोदये तु 'भवतस्कर! बन्धने' इति पाठः।

**अनुवाद** – हे छलिये! अज्ञात होते हुए तुमने प्रमादनिद्रा के द्वारा अज्ञानी बनाए गये मुझ (जीव) को (सांसारिक बन्धनों में) बाँध दिया। किसी प्रकार मुझे दर्शन दो और मेरे मार्ग में विद्यमान (माया मोह आदि) तस्करों को बाँधने में समर्थ बनो।

( १८ )

**बहुविधभवभूमिकाभिराभि-**
**र्नटयसि नाथ! यथा तथा नटामि।**
**कृपण! गमयिता भवानविद्या-**
**जवनिकयाऽन्तरितःकियन्त्यहानि।।**

**अन्वयः** – हे नाथ! आभिः बहुविधभवभूमिकाभिः यथा नटयसि तथा नटामि। हे कृपण! भवान् अविद्याजवनिकया अन्तरितः कियन्ति अहानि गमयिता।

**पदार्थप्रकाशिका** – बहुविधेति – हे नाथ! हे स्वामिन्! आभिः मया सह विद्यमानाभिः, बहुविधभवभूमिकाभिः बहुविधाभिः भवस्य संसारस्य भूमिकाभिः, अथवा भवस्य शिवस्य भूमिकाभिः। एता भूमिकाः शिवस्य माययैवोत्पादिता इति तत्सम्बन्धिन्य एव। यथा येन प्रकारेण नटयसि नटनार्थं प्रेरयसि तथा नटामि नटवदाचारणं करोमि। हे कृपण! हे भक्तवत्सल! भवान् अविद्याजवनिकया अविद्या एव जवनिका तया अन्तरितः निलीनः कियन्ति अहानि दिनानि गमयिता। हे भक्तवत्सल! शिव! भवान् सांसारिकेऽस्मिन्नाटकेऽविद्याजवनिकया निलीनः सन् कियन्ति दिनानि गमयिष्यति। कदाचित्तु त्वद्दर्शनं प्राप्स्याम्येवेति भावः।

**अनुवाद** – हे स्वामिन्! इन अनेक प्रकार की भूमिकाओं में तुम जैसा नचाते हो मैं वैसा नाचता हूँ। हे भक्तवत्सल! तुम अविद्या के पर्दे की आड़ में छिप कर कितने दिन बिताओगे।

( १९ )

**वपसि विगतभोगभाग्य! दूरा -**
**न्मयि वृषवाह! तवाहमुर्वरास्मि।**

**स्वपदमुपदधासि यत्र तस्मिन्**
**भवति कडङ्गर एव कर्मबीजम् ।।**

**अन्वयः** – हे विगतभोगभाग्य! अहं तव उर्वरा अस्मि। (त्वं च) मयि दूरात् वपसि। हे वृषवाह! यत्र स्वपदम् उपदधासि तस्मिन् कर्मबीजम् एव कडङ्गरः भवति।

**पदार्थप्रकाशिका** – वपसीति – विगतभोगभाग्य! विगतानि भोगस्य भाग्यानि यस्य स विगतभोगभाग्यः, तस्य सम्बोधने। तादृश हे शिव! अहं तव उर्वरा भूमिः अस्मि।'उर्वरा सर्वसस्याढ्या' इत्यमरः। त्वं च मयि जीवरूपभूमौ दूरात् कर्मबीजं वपसि। न तु समीपात्, यतोहि हे वृषवाह! हे वृषभवाहन! शिव! पक्षे कृषक! यत्र यस्मिन् स्थाने त्वं स्वपदम् उपदधासि तस्मिन् स्थाने कर्मबीजम् एव कडङ्गरो भवति। कडङ्गरो धान्यतुषः। तस्मिन्न भवत्यङ्कुरोत्पादनस्य शक्तिः। कडङ्गरशब्दस्तुषार्थे शब्दकल्पद्रुमादौ पठितः।

ज्ञानस्वरूपः शिवो यस्मिन् स्वं पदं दधाति तस्मिन् कर्मबीजं फलोत्पादनेऽसमर्थं सद् बुसतुल्यं भवति। कर्मबीजं दग्धं भवतीति भावः। उक्तञ्च श्रीमद्भगवद्गीतायाम्– 'ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधा' इति। रामरक्षास्तोत्रेऽपि 'भर्जनं भवबीजानाम्' इत्युक्तम्। श्रीमद्भागवते रासपञ्चाध्याय्याम्–

'न हि मय्यावेशितधियां कामः कामाय कल्पते।
भर्जिता क्वथिता धाना प्रायो बीजाय नेष्यते'।। इति।

अतः शिवस्य चरणन्यासेन कर्मबीजानामपि कडङ्गरत्वमुक्तम्। शिवस्य पदन्यासेन बीजस्यापि तुषीभावात् तस्य विगतभोगभाग्यत्वं कथितम्। अमृतोदये तु 'यदि विरहितभोगभाग्य दूराद्वयसि वृषाङ्क तदा फलानि सूते' इति पाठः।।

**अनुवाद** – हे भोगभाग्यरहित! शिव! मैं तुम्हारी उर्वराभूमि हूँ। तुम दूर से मुझ पर बीज बोते हो। हे वृषभवाहन! तुम जहाँ पैर रख देते हो वहाँ कर्मबीज भी भूसी (धान की तुष) बन जाता है।

**( २० )**

**प्रभवति मतये पदप्रबन्धो**
**न तव निरत्यय! नित्यचेतनस्य।**
**न भजसि करुणामतः पुरारे!**
**मम कृपणैः परिदेवितप्रपञ्चैः।।**

**अन्वयः** – हे निरत्यय! मम पदप्रबन्धः नित्यचेतनस्य तव मतये न प्रभवति। हे पुरारे! अतः (मम) कृपणैः परिदेवितप्रपञ्चैः (त्वं) करुणां न भजसि।

**पदार्थप्रकाशिका** – प्रभवतीति– हे निरत्यय! अत्ययात् निर्गतः निरत्ययः, तत्सम्बोधनम्। शिव! मम गोकुलनाथस्य अयं शिवशतकरूपः पदप्रबन्धः नित्यचेतनस्य तव शिवस्य मतये ज्ञानाय न प्रभवति। हे पुरारे! अतः वराकस्य मम कृपणैः करुणापूर्णैः परिदेवितप्रपञ्चैः विलापविस्तरैः त्वं करुणां न भजसि, न करोषि। निर्णयसागरीयसंस्करणे 'सतः' इत्यत्र 'सतो' इति पाठः प्रश्नचिह्नेन सह दत्तः। अमृतोदये तु 'न भजसि करुणामतोऽतोऽसुरारे' इति पाठः।

**अनुवाद** – हे अविनाशिन्! मेरा यह पदप्रबन्ध तुझ नित्यचेतन के ज्ञान के लिये उपयुक्त नहीं है। हे पुरारे! मुझ बेचारे के करुण रोदन प्रपञ्च से भी तुझे करुणा नहीं होती।

**( २१ )**

**सरसमपि वरं न भोक्तुमीहे**
**हर! मम शम्बलसञ्चयं गृहाण।**
**उपदिश कतरद्धि दूरयात्रा–**
**श्रमशमनं भववर्त्मनोऽवसानम्।।**

**अन्वयः** – हे हर! सरसं वरम् अपि शम्बलसञ्चयं न भोक्तुम् ईहे (इति) गृहाण। कतरद्धि दूरयात्राश्रमशमनं मम भववर्त्मनः अवसानम् (इति) उपदिश।

**पदार्थप्रकाशिका** – सरसेति – हे हर! सरसं रससहितं वरं श्रेष्ठमपि शम्बलसञ्चयं पाथेयराशिं भोग्यकर्मफलं भोक्तुं न ईहे, न इच्छामि। ''कुष्ठं मुण्डं शीधु बुस्तं क्ष्वेडितं क्षेमकुट्टिमम्। सङ्गमं शतमानार्मशम्बलाव्ययताण्डवम्'' इत्यमरः। इति गृहाण स्वीकुरु। कतरद्धि दूरयात्राश्रमशमनं, दूरयात्रायाः श्रमस्य श्रान्तेः शमनं शान्तेः साधकं मम भववर्त्मनः संसारमार्गस्य अवसानम् अन्तः कुत्र भवितेति, तदुपदिश, कथय। अमृतोदये तु 'सुरसमपि विदूरयात्रा' इति पाठः।

**अनुवाद** – हे शिव! इस श्रेष्ठ और सरस पाथेयराशि (भोग्यकर्म) का उपभोग मैं नहीं करना चाहता। अतः इसे स्वीकार करो। मेरी इस दूरयात्रा के श्रम का शमन इस सांसारिक मार्ग की समाप्ति से ही होगा। अतः इस सांसारिकमार्ग का अन्त कहाँ है, यह बताओ।

## ( २२ )

**मम भवपथिकस्य कर्मभोग्यं**
**प्रलयनिशि त्वमवेक्षथाः शयालोः।**
**त्वयि सकलमकिञ्चनो बुभूषुः**
**प्रहरकवेतनमेतदर्पयामि।।**

**अन्वयः** – भवपथिकस्य प्रलयनिशि शयालोः मम भोग्यं कर्म त्वम् अवेक्षथाः। अकिञ्चनो बुभूषुः (अहं) त्वयि एतत् सकलं प्रहरकवेतनम् अर्पयामि।

**पदार्थप्रकाशिका** – ममेति– भवपथिकस्य संसाराध्वगस्य प्रलयनिशि प्रलयरात्रौ शयालोः निद्रालोः।'स्वप्नक् शयालुर्निद्रालुः' इत्यमरः। मम जीवस्य

भोग्यं कर्म त्वं शिवः अवेक्षथाः, पश्येः, पश्यसीति भावः। अकिञ्चनः, नास्ति किञ्चन यस्य तादृशो बुभूषुः कर्मादिरहितो भवितुमिच्छुः अहमेतत् सकलं मम कर्मजातं त्वयि शिवे प्रहरकवेतनम् अर्पयामि, ददामि। इदानीं मत्सविधे कर्माण्येवावशिष्यन्ते यैरहं भवेऽस्मिन्नानायोनिषु पर्यटन्नस्मि। तत्सर्वं त्वयि शिवे प्रहरकवेतनत्वेन समर्प्य अकिञ्चनतां प्राप्तुमिच्छामि। अकिञ्चनो द्रव्यादिरहितो दरिद्रः। अत्र पुनः कर्मादीन्येव द्रव्याणि। अमृतोदये तु 'त्वमपालयः' इति पाठः।

**अनुवाद** - मैं संसारमार्ग का पथिक हूँ और प्रलयरात्रि में सोने का इच्छुक हूँ। तुम मेरे भोग्य कर्मों को देखते हो। अब मैं अकिञ्चन होना चाहता हूँ। अतः यह सब (अपना कर्मजात) तुम्हें प्रहरकवेतन (प्रहरी के पारश्रमिक) के रूप में समर्पित कर रहा हूँ।

## (२३)

**श्रुतिजनक ! रटत्यसौ कुमारी**
**तव दुहिता बहिरेत्य नेति नेति।**
**व्यवहित! निकटस्थितेऽपि तस्मा-**
**त्त्वयि मिलितेऽपि ममातिथेः क्व भोगः।।**

**अन्वयः** - हे श्रुतिजनक! असौ तव कुमारी दुहिता बहिः एत्य नेति नेति रटति। हे व्यवहित! तस्मात् निकटस्थिते अपि त्वयि मिलिते अपि अतिथेः मम भोगः क्व?।

**पदार्थप्रकाशिका** - श्रुतिजनकेति - हे श्रुतिजनक! श्रुतीनां वेदानां जनक!, ईश्वरस्य निःश्वासभूतत्वात् शिव एव वेदानां जनक इति भावः। असौ तव श्रुतिरूपा कुमारी दुहिता प्रथमवयस्का कन्या। 'कन्या कुमारी' इत्यमरः। 'सुता तु दुहिता पुत्री' इति त्रिकाण्डशेषः। बहिः द्वारम् आगत्य, इन्द्रियगोचरतां प्राप्य नेति नेति रटति, मम पिता गृहे नास्तीति वदति। साऽपि तव स्वरूपं न

जानातीति हेतोः नेति नेतीति कृत्वा निषेधति। तथा च बृहदारण्यके– अथात आदेशो नेति नेति (४.४.२२)। उपनिषत्सु बहुत्र निषेधमुखेन ब्रह्म प्रतिपादितम्– यतो वाचो निवर्तन्ते अप्राप्य मनसा सह। तथा च केनोपनिषदि– तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते। प्रसङ्गेऽस्मिन् नैके मन्त्राः निषेधमुखेन ब्रह्मस्वरूपं प्रतिपादयन्ति। हे व्यवहित! व्यवधानविशिष्ट! तस्मात् कारणात् तव स्वरूपव्यवहितत्वात् निकटस्थिते समीपस्थिते अपि मिलिते प्राप्ते अपि त्वयि शिवे, अतिथेः मम भोगः आस्वादः क्व? न क्वापीत्यर्थः। अतिथेरागमनस्य तिथिः कालो वा न भवति। अहमागत्य तव सविधे उषित्वा त्वयि मिलित्वा चापि तव स्वरूपं ज्ञातुं न पारयिष्यामि। यतो हि तव स्वरूपं व्यवधानयुक्तं वर्ततेऽथ च श्रुतिरूपा ते पुत्री अपि तन्न जानातीति। अतो ममातिथेर्भोगोऽसम्भवी। पुनः संसारे ममागमनं ध्रुवमित्यभिप्रायः।

**अनुवाद** – हे श्रुतिजनक! यह तुम्हारी श्रुति रूपी पुत्री बाहर आकर 'नेति नेति' रट रही है। इसलिए हे व्यवधानयुक्त शिव! तुम्हारे पास होने या तुम में मिल जाने पर भी (तुम्हारे व्यवधानयुक्त होने के कारण) मुझ अतिथि का भोग कहाँ?।

## (२४)

**अपरिमितविभागभूमिरेक–**
**स्त्वमसि ततो जगदण्डबिन्दुरासीत्।**
**इति भुवनभरैकधुर्य! जाने**
**दश ककुभो गणितक्रमेण सिद्धाः।।**

**अन्वयः** – हे भुवनभरैकधुर्य! एकः त्वम् अपरिमितविभागभूमिः असि। ततः जगदण्डबिन्दुः आसीत् इति गणितक्रमेण सिद्धाः दश ककुभः (सन्तीति) जाने।

**पदार्थप्रकाशिका** – अपरिमितमिति – हे भुवनभरैकधुर्य! धुरं धारयतीति धुर्यः। भुवनानां भरस्य एको धुर्यः भुवनभरैकधुर्यस्तत्सम्बोधने। भुवनभरस्य धुरन्धरवृषभ! 'धूर्वहे धुर्यधौरेयधुरीणाः सधुरन्धराः' इत्यमरः। एकः एकाकी त्वम् अपरिमितविभागभूमिः अपरिमितविभागानां घटपटद्वित्वादीनां विभागस्य आधारोऽसि। ततः तस्मात् परं जगदण्डबिन्दुः ब्रह्माण्डकणः आसीत् इति गणितक्रमेण सिद्धाः दशककुभः दिशः जाने। 'दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः' इत्यमरः। प्रथमं त्वमसि तदनन्तरमन्यानि तत्त्वानि। एवं गणनाक्रमेण दश दिशो जाने। अमृतोदये तु 'तदिति दशविधा दिशामधीश त्वदवतरा' इति पाठः।

**अनुवाद** – हे भुवनभार को अकेले ही धारण करने वाले वृषभ! एकमात्र तुम ही असीम विभाग के आधार हो! उसके बाद ब्रह्माण्ड बिन्दु था। इस प्रकार मैं गणितक्रम से सिद्ध दश दिशाओं को जानता हूँ।

**( २५ )**

**कथय क इति दिग्विपर्ययेऽपि**
**प्रभवति गन्तुमतः क्व संसरेयम्।**
**भव! भवपथिकस्य कोऽप्यपूर्व-**
**स्त्वमहमिति प्रसृतो मम प्रमोहः।।**

**अन्वयः** – हे भव! दिग्विपर्यये अपि गन्तुं कः प्रभवति? अतः क्व संसरेयम् इति कथय। भवपथिकस्य मम कोऽपि अपूर्वः 'त्वमहम्' इति प्रमोहः प्रसृतः (अस्ति)।

**पदार्थप्रकाशिका** – कथयेति– हे भव! हे शिव! दिग्वपर्यये दिशां विपर्ययः दिग्विपर्ययस्तस्मिन् दिग्भ्रमे सतीत्यर्थः। गन्तुं चलितुं कः प्रभवति। दिग्भ्रमे सत्यभीष्टमार्गे गन्तुं न कोऽपि प्रभवतीत्याशयः। अतः अस्मात् मायामयसंसारात् क्व कुत्र संसरेयं गच्छेयमिति कथय उपदिश। भवपथिकस्य

संसाराध्वगस्य मायामोहादिव्याप्तमनसो मम कोऽपि कश्चन अपूर्वः त्वमहम् 'त्वमेव ब्रह्म एव अहं जीव' इत्यात्मकः प्रमोहोऽज्ञानं चित्तविभ्रमः प्रसृतो व्याप्तः। अस्तीति शेषः। संसारे निवसतो मायामोहाद्याच्छादितान्तःकरणस्य मे कश्चन 'त्वमहम्' त्वं ब्रह्म एव अहं जीव इति भेदात्मको मोहः व्याप्तोऽस्ति। अतः क्व गच्छामीति त्वमेव वदेत्याशयः। अमृतोदये तु–

दिगपदिशविपर्ययोऽपि पुंसा–
मभिमतसंसरणक्रियां रुणद्धि।
मम तु भवकदध्वगस्य कोऽपि
त्वमहमिति प्रथितो महान्प्रमोहः।। इति पाठः।।२५।।

**अनुवाद** – हे शिव! दिग्भ्रम हो जाने पर कोई कैसे चल सकता है। अतः कहाँ जाऊँ, यह बताओ। मुझ संसार के पथिक को कोई अपूर्व 'तुम ब्रह्म ही मैं जीव हूँ' (तुझ ब्रह्म को ही जीव समझने) जैसा (भेदात्मक) प्रमोह हो गया है।

## ( २६ )

**मयि परमविभौ विशुद्धसत्त्वे**
**यदिह शरीरतदात्मतामधासीः।**
**निगमपुरुष! तत्प्रतिक्रियायै**
**त्वयि निदधामि समस्तवस्त्वभेदम्।।**

**अन्वयः** – हे निगमपुरुष! यत् इह परमविभौ विशुद्धसत्त्वे मयि शरीरतदात्मताम् अधासीः, तत्प्रतिक्रियायै त्वयि समस्तवस्त्वभेदं निदधामि।

**पदार्थप्रकाशिका** – मयि परमेति– हे निगमपुरुष! वेदपुरुष! यत् यस्मात् कारणात् इह संसारे परमविभौ, परमश्चासौ विभुश्चेति परमविभुस्तस्मिन्, सर्वव्यापिनि विशुद्धसत्त्वे विशुद्धात्मनि मयि शरीरतदात्मतां शरीराभिन्नताम्।

तदात्मता तादात्म्यम्। तादात्म्यं च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम्। अधासी:। 'धेट् पाने' इति धातोरन्तर्भावितणिचि लुङि रूपम्। पायितवानसीत्यर्थ:। तत्प्रतिक्रियायै तस्य प्रतीकाराय अहं त्वयि शिवे समस्तवस्त्वभेदं समस्तद्रव्याणाम् अभिन्नतां निदधामि, निर्धारयामि। त्वयि समस्तवस्तुतादात्म्यं तदात्मतां वा पश्यामीति भाव:। वस्तुतो भेद एव वास्तविक:। अभेदस्त्वारोपित एव। यथा शरीरभिन्न आत्मा तथैव समस्तवस्तुभिन्न: शिव:। किन्तु हे शिव! अहं परमविभु: विशुद्धसत्त्वश्चात्माऽस्मि। तथापि मयि त्वया शरीरेण अभेदोऽध्यस्त:। अत एव तत्प्रतीकाराय अहमपि शिवे त्वयि समस्तसांसारिकवस्तूनामभेदं पश्यामि। सर्वत्र मम शिवबुद्धिरेव वर्तत इत्यर्थ:। अमृतोदये तु 'शरीरतदात्मतामधास्त्वम्' इति पाठ:।

**अनुवाद** – हे निगमपुरुष! तुमने इस संसार मे सर्वव्यापी और विशुद्धसत्त्व मुझ आत्मा में शरीर से अभिन्नता अध्यस्त किया है। अत: उसकी प्रतिक्रिया के लिये मैं तुम में संसार की समस्त वस्तुओं का अभेद निर्धारित करता हूँ। समस्त सांसारिक वस्तुओं में मेरी शिव बुद्धि है।

**( २७ )**

**निबिडजडतदात्मताप्रमोहं**
**विमलयति त्वदभेदविभ्रमो माम्।**
**प्रकृतिमुपनयन्ति वारिधानीं**
**कतकरजांसि रजोऽन्तरापकर्षात्।।**

**अन्वय:** – त्वदभेदविभ्रम: निबिडजडतदात्मताप्रमोहं मां विमलयति। कतकरजांसि रजोऽन्तरापकर्षात् वारिधानीं प्रकृतिम् उपनयन्ति।

**पदार्थप्रकाशिका** – निबिडेति– त्वदभेदविभ्रम: त्वद्विषयकोऽभिन्नताया अभेदस्य वा विपर्यय:, त्वया शिवेन सह जीवस्य मम अभेदो वर्तत इत्यात्मको विभ्रम इत्यर्थ:। वस्तुतो जीव: परमात्मभिन्नो भवति तथापि अहं परमात्मनि

स्वाभेदं पश्यामि। निबिडजडतदात्मताप्रमोहं मां, निबिडो घनो जडतदात्मताया अभेदस्य प्रमोहो यस्य सः, तादृशं मां विमलयति निर्मलमतिं करोति। तदेव दृष्टान्तेन समर्थयति– कतकरजांसि निर्मल्याः परागा रजोऽन्तरापकर्षात् अन्येषां रजसाम् अपकर्षणात् वारिधानीं जलाशयं प्रकृतिं स्वभावमुपनयन्ति प्रापयन्ति। लक्षणया वारिधानीपदेन जलस्य बोधः। कतकक्षुपस्य परागा आविलमपि जलं तत्र पतितानामन्येषां रजसामपकर्षं कृत्वा निर्मलं कुर्वन्तीति लोकप्रसिद्धिः।अमृतोदये तु 'शमितजडतदात्मता' इति पाठः।

**अनुवाद** – तुमसे अभिन्न होने का यह विपर्यय सघन और कठोर तदात्मता (अभिन्नता) के प्रमोह से मुझे निर्मल करता है। निर्मली (एक विशेष पौधा) के पराग अन्य रजों को दूर कर जलाशय को शुद्ध करके उसे उसका प्राकृतिक स्वरूप (निर्मलता) प्रदान करते हैं।

**( २८ )**

**पुरि पुरि विहरामहे भ्रमन्तः**
**पुरहर! पश्यसि भोगवञ्चितोऽस्मान्।**
**किमिति न विहरेम नाथवन्तो**
**वयमितरे त्वमनाथ एक एव।।**

**अन्वयः** – हे पुरहर! (वयं) पुरि पुरि भ्रमन्तः विहरामहे। भोगवञ्चितः त्वम् (अस्मान्) पश्यसि। (भवतः) इतरे वयं नाथवन्तः किमिति न विहरेम? त्वम् एक एव अनाथः (असि)।

**पदार्थप्रकाशिका** – पुरीति – हे पुरहर! हे त्रिपुरहर! वयं वराका जीवा पुरि पुरि नगरे नगरे भ्रमन्तः नानायोनिषु भ्रमणं कुर्वन्तो विहरामहे, विहारं कुर्मः। अथवा स्वकर्मानुसारेण विविधयोनिषु भ्रमामः। भोगवञ्चितः भोगेभ्यः सांसारिकसुखदुःखेभ्यो वञ्चितो दूरीभूतस्त्वम् अस्मान् भोगासक्तान् पश्यसि विलोकयसि। तथा चाह श्रुतिरपि–

द्वा सुपर्णा सयुजा सखाया
समानं वृक्षं परिषस्वजाते।
तयोरेक: पिप्पलं स्वाद्वदत्ति
अनश्नन्नेकोऽभिचाकसीति।।

भवत: शिवात् इतरे भिन्ना वयं सांसारिका नाथवन्त: स्म:। तर्हि किमिति न विहरेम। त्वं शिव एक एव अनाथोऽसि। त्वया सह अन्य: कश्चन सजातीयो नास्ति। अतो न तव विहारयोग्यता। त्वं समेषां नाथो न तव कश्चन नाथ इत्यभिप्राय:।

**अनुवाद** – हे त्रिपुरहर! हम नगर नगर में भ्रमण करके विहार कर रहे हैं (अथवा अपने भोग के अनुसार प्राप्त नाना योनियों में भटक रहे हैं)। भोगों (सांसारिक सुखों और दु:खों) से वंचित होकर तुम हमें देख रहे हो। आपसे भिन्न हम नाथवान् हैं क्योंकि तुम हमारे नाथ हो, अत: क्यों न विहार करें। एक तुम ही अनाथ (सबके स्वामी) हो। विहार के लिये किसी सजातीय का होना आवश्यक है। तुम अकेले कैसे भ्रमण कर सकते हो।

## ( २९ )

**स्वपिषि न परकर्मसु प्रसक्त:**
**परमुपभोजयतस्तव क्व भोग:।**
**परचरितमवैषि निर्निमेष:**
**प्रकृतिदरिद्र! न कोऽपि पश्यति त्वाम्।।**

**अन्वय:** – परकर्मसु प्रसक्त: (त्वं) न स्वपिषि। परम् उपभोजयत: तव भोग: क्व? निर्निमेष: (त्वं) परचरितम् अवैषि। हे प्रकृतिदरिद्र! त्वां कोऽपि न पश्यति।

**पदार्थप्रकाशिका** – स्वपिषीति– परकर्मसु परेषां सांसारिकाणां कर्मसु

भोगेषु प्रसक्तोऽनुषक्त आसक्तो वा त्वं न स्वपिषि। त्वं शयनं न करोषि। जागरितः सन् सदैव सांसारिकान् पश्यसीत्यर्थः। परम् अन्यं जीवम् उपभोजयतः उपभोगं कारयतः तव भोगः सांसारिकसुखदुःखानुभवः क्व, कुत्र? अस्तीति शेषः। त्वं परचरितम् अवैषि परेषां सांसारिकाणाम् आचरितं जानासि। हे प्रकृतिदरिद्र! स्वभावरहित! 'प्रकृतिर्गुणसाम्ये स्यादमात्यादिस्वभावयोः। योनौ लिङ्गे पौरवर्गे' इति मेदिनी। रूपादिरहितत्वात् त्वां कोऽपि न पश्यति। रूपादिमहत्तत्त्वयुक्तस्यैव प्रत्यक्षं भवति न सूक्ष्मस्य। सूक्ष्मस्वभावात्त्वां न कोऽपि द्रष्टुं शक्नोतीत्यर्थः।

**अनुवाद** - दूसरों के कर्मभोग में लगे होने के कारण तुम सोते नहीं। दूसरों को भोग प्रदान करने के कारण तुम्हारा कोई भोग नहीं है। तुम दूसरों के चरित्र को जानते हो किन्तु हे प्रकृतिदरिद्र! तुम्हें कोई नहीं देखता।

**( ३० )**

**प्रकृतिचटुल! सूक्ष्मभूतशेषे**
**प्रकृतिविकारनिकोचभाजि काले।**
**अविरतपरिवृत्तिखेदखिन्ने**
**स्वपिति जने प्रतिबुध्यसे त्वमेकः।।**

**अन्वयः** - हे प्रकृतिचटुल! सूक्ष्मभूतशेषे प्रकृतिविकारनिकोचभाजिकाले अवितरतपरिवृत्तिखेदखिन्ने जने स्वपिति (सति) एकः त्वं प्रतिबुध्यसे।

**पदार्थप्रकाशिका** - प्रकृतीति- हे प्रकृतिचटुल! प्रकृत्या स्वभावेन चञ्चल! सूक्ष्मभूतशेषे सूक्ष्माणि परमाणुरूपाणि भूतानि पृथ्व्यप्तेजःप्रभृतिभूतानि शेषाणि यस्मिन् सः सूक्ष्मभूतशेषस्तस्मिन्। प्रकृतिविकारनिकोचभाजि काले, प्रकृतेर्विकाराः प्रकृतिविकारास्तेषां निकोचं सङ्कोचं भजत इति प्रकृतिविकार-निकोचभाक्, तस्मिन् प्रकृतिविकारनिकोचभाजि काले समये। प्रलयकाल

इत्यर्थः। अविरतपरिवृत्तिखेदखिन्ने अविरतं सततं परिवृत्तिः नानायोनिषु परिभ्रमणं, तस्याः परिवृत्तेः खेदेन श्रमेण खिन्नस्तस्मिन्। सततं नानायोनिषु परिभ्रमणखेदेन श्रान्ते जने आत्मनि स्वपिति सति निद्रां गते सति एकः एकाकी त्वं शिव एव प्रतिबुध्यसे जागरितो भूयसे। प्रलयकाले यदा प्रकृतेः सर्वेऽपि विकाराः सङ्कोचं प्राप्नुवन्ति, आत्मा च नानायोनिषु भ्रमन् श्रान्तो भूत्वा शेते, तस्मिन् काले त्वमेक एव प्रतिबुध्यस इति भावः।

नैयायिकमते प्रलयकाले पृथिव्यादिभूतानि परमाणुरूपेण अवशिष्यन्ते। अन्ये प्रकृतिविकाराः सङ्कोचं प्राप्नुवन्ति। तदानीं महेश्वर एव जागरितो भवति। तस्यैव सिसृक्षया परमाणुभिः पुनः सर्गविधानं भवतीत्याकरग्रन्थेषु स्पष्टम्।

**अनुवाद** - हे स्वभावचंचल! शिव! जब पञ्चभूत भी परमाणु रूप में ही शेष रहते हैं, प्रकृति के समस्त विकार संकोच को प्राप्त हो जाते हैं, तथा नाना योनियों में भ्रमण करते रहने से श्रान्त होकर आत्मा भी सो जाता है, ऐसे समय में तुम अकेले ही जागते हो (अन्य ब्रह्मा आदि सभी देवता सो जाते हैं)।

**( ३१ )**

**प्रलयदहनदग्धशेषपीलु-**
**प्रकरशिलोञ्छपवित्रवृत्तिरादौ।**
**घटयसि भुवनानि तेषु जीव-**
**प्रकृतिचलैः परमाणुभिः शरीरम्।।**

**अन्वयः** - प्रलयदहनदग्धशेषपीलुप्रकरशिलोञ्छपवित्रवृत्तिः (त्वम्) आदौ जीवप्रकृतिचलैः परमाणुभिः भुवनानि, तेषु च शरीरं घटयसि।

**पदार्थप्रकाशिका** - प्रलयेति- प्रलय एव दहनः अग्निः प्रलयदहनस्तत्र दग्धशेषा ये पीलुप्रकराः परमाणुपुञ्जास्तेषां शिलोञ्छनम् एकत्रीकरणमेव पवित्रा

वृत्तिः जीविका यस्य सः प्रलयदहनदग्धशेषपीलुप्रकरशिलोञ्छपवित्रवृत्तिः। 'उञ्छः कणश आदाने कणिशाद्यर्जनं शिलम्' इति यादवः। 'हिरण्यरेता हुतभुग् दहनो हव्यवाहनः' इत्यमरः। 'ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम्। मृतं तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम्।' 'ऋतामृताभ्यां जीवेत्तु' इत्युक्त्वा मनुस्मृतावपि शिलोञ्छस्य पवित्रवृत्तित्वं प्रतिपादितम्। तादृशस्त्वं शिव आदौ सर्गादौ प्रथमं जीवप्रकृतिचलैः प्राणिस्वभावेन अदृष्टेन वा गतिमद्भिः परमाणुभिः पीलुभिः भुवनानि अतलवितलसुतलादिचतुर्दशभुवनानि, तेषु च भुवनेषु शरीरं घटयसि, रचयसि। प्राणिनामदृष्टवशात् परमेश्वरस्य शरीरपरिग्रहो भवति। तथा च श्रुतिः- 'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात्' इति श्रुतेर्भगवतोऽदृष्टस्य प्रतिषेधान्न तस्य स्वीयमदृष्टम्।

काणादानां नैयायिकानां च मतमाश्रित्येह सर्गप्रक्रिया सङ्केतिता। सा चेयं प्रक्रिया प्रशस्तपादभाष्यादौ विस्तरेण द्रष्टव्या।

**अनुवाद** - प्रलयरूप अग्नि से दग्ध होकर शेष बचे (पृथ्वी, जल, वायु आदि भूतों के) परमाणुपुंजों के एकत्रीकरण रूप पवित्र जीविका वाले तुम पहले जीवों के अदृष्ट से चंचल परमाणुओं से चतुर्दशभुवनों की रचना करते हो तदनन्तर उनमें शरीर उत्पन्न करते हो।

## (३२)

**जनशरण! शरीरिणां प्रवृत्तैः**
**करणगणैरुपलभ्यचेतनानाम्।**
**कतिचन जनुरन्तरानुभूति-**
**प्रसृमरवासनया स्मृतीः प्रसूषे।।**

**अन्वयः** - हे जनशरण! प्रवृत्तैः करणगणैः उपलभ्यचेतनानां शरीरिणां जनुरन्तरानुभूतिप्रसृमरवासनया कतिचन स्मृतीः प्रसूषे।

**पदार्थप्रकाशिका** – जनेति– हे जनशरण! जनानां प्राणिनां शरण! प्रवृत्तैः क्रियाशीलैः करणगणैः इन्द्रियसमूहैः उपलभ्यचेतनानां प्राप्तचैतन्यानां शरीरिणां देहिनां जनुरन्तरानुभूतिप्रसृमरवासनया जन्मान्तरानुभवप्रवहणशीलवासनया कतिचन काश्चन स्मृतीः प्रसूषे, जन्मान्तरस्मरणानि जनयसि। ताभिरेव पूर्वजन्मस्मृतिभिः प्राणिनां भोगप्रवृत्तिर्जायते। पूर्वपूर्वयोनिषु अनुभूता विषया आत्मनि संस्कारत्वेन भवन्त्यवस्थिताः। जन्मान्तरे पुनः प्राप्तायां तस्यां योनौ प्राणिनः तया पूर्वजन्मस्मृत्या तद्योनिस्वभावं प्राप्नुवन्तीति योगसूत्रभोजवृत्तिप्रभृतिषु ग्रन्थेषु भृशं प्रतिपादितम्। अभिनवभारत्याम् अभिनवगुप्तोऽपि ''जात एव जन्तुरीयतीभिः संविद्भिः परीतो भवति'' इति निर्दिशति नाट्यशास्त्रे षष्ठेऽध्याये। प्राणिनां पूर्वजन्मस्मृतिं तत्तद्योनिस्वभावं त्वमुत्पादयसीति भावः। अथवा क्रियाशीलैः करणगणैः इन्द्रियसमूहैः उपलब्धचेतनानाम् अनुमितचैतन्यानाम् शरीरिणां हिरण्यगर्भादीनाम् कतिचन अज्ञातसंख्यानि यानि जनुरन्तराणि जन्मान्तराणि तेषु या अनुभूतयः अनुभवलक्षणा वेदार्थविषया बुद्धयः ताभ्यो आम्नायस्मरणानि प्रसूषे जनयसि। प्रतिसर्गं हिरण्यगर्भादयः प्रणष्टमागमं स्मरन्ति, तत्रोद्बोधको भवति परमात्मैव– ''यो ब्रह्माणं विदधाति पूर्वं यो वेदाँश्च प्रहिणोति तस्मै'' इति श्रुतेः। श्रुतयोऽनादयः, सृष्ट्यादौ परमेश्वरस्ताः स्मृत्वा हिरण्यगर्भादिभ्य उपदिशति इति। काव्यमालासंस्करणे 'प्रसुप्तैः' इति पाठः।

**अनुवाद** – हे जनशरण! क्रियाशील इन्द्रिय समूहों से चेतना प्राप्त करने वाले शरीरधारियों में तुम जन्मान्तरों के अनुभवों से वासित वासना से कतिपय स्मृतियों को उत्पन्न करते हो। अथवा हिरण्यगर्भ आदि में पूर्वकल्पाधीत आगमों का स्मरण उत्पन्न करते हो।

**( ३३ )**

**अतिशयितविबुद्धवत्पुराणः**
**स्मरति मुनिर्निगमं हिरण्यगर्भः।**

**गगनपवनसन्निपातकर्ता**
**कथयसि वा करणानपेक्ष एव।।**

**अन्वयः** - पुराणः हिरण्यगर्भः मुनिः अतिशयितविबुद्धवत् निगमं स्मरति। गगनपवनसन्निपातकर्ता (त्वं) करणानपेक्ष एव वा कथयसि।

**पदार्थप्रकाशिका** - अतिशयितेति- पुराणः चिरन्तनः हिरण्यगर्भः मुनिः ब्रह्मा प्रलयानन्तरम् अतिशयितविबुद्धवत् अतिशयत्यक्तनिद्रवत् निगमं वेदं स्मरति। प्रलयानन्तरं त्यक्तनिद्रो ब्रह्मा पुनः पूर्वकल्पाधीतान् वेदान् स्मरतीति पौराणिका वदन्ति। तथा चोक्तं श्रीमद्भागवते-

''प्राचोदिता येन पुरा सरस्वती
वितन्वताऽजस्य सती स्मृतिं हृदि।
स्वलक्षणा प्रादुरभूत् किलास्यतः
स मे स्वयम्भूर्भगवान् प्रसीदताम्।।''

अथ वर्णोच्चारणे कण्ठादीनां कण्ठत्वादिरूपेणैव नापेक्षणीयत्वं किन्तु विलक्षणपवनव्योमसंयोगाय कण्ठादीनामपेक्षणीयत्वं स्वीक्रियते, स पुनरशरीरस्यापि तव प्रयत्नेन सम्भवतीति किमाम्नायप्रवर्त्तने शरीरेणोपकर्त्तव्यं तमेतं पक्षमनुसृत्याह- वा अथवा गगनपवनसन्निपातकर्त्ता वर्णोच्चारणाय अपेक्षितस्य विलक्षणगगनपवनसंयोगस्य घटकः करणानपेक्षः निरिन्द्रियः एव हिरण्यगर्भादिभ्यः आगमम् कथयसि। नित्यज्ञानेच्छाप्रयत्नानां शरीरग्रहणानपेक्षया भगवतो निरिन्द्रियस्यापि वेदोपदेष्टृत्वमुपपन्नमेवेति भावः। काव्यमाला संस्करणे 'कथमसि करुणानपेक्ष एव' इति पाठः। त्वं कथं करुणानपेक्ष एव दयारहित एव असि वर्तसे। न जाने कति प्रलयघटना मया दृष्टास्तथापि त्वं मम मुक्तिं न स्मरसि। गगनपवनयोर्मिश्रणं कठिनतरं विद्यते। तत्तु हे शिव! त्वं सम्पादयसि किन्तु भक्तजनानामस्माकं मुक्तिं न कल्पयसीति कथं करुणारहितोऽसीति तात्पर्यम्। 'अथ शयितविबुद्धवत्' इति अमृतोदये पाठः।

**अनुवाद** - पुराण हिरण्यगर्भ (ब्रह्मा) मुनि प्रलय के अनन्तर नींद से उठे हुए की तरह वेदों का पुनः स्मरण करता है। आकाश और वायु के मिश्रण जैसे कठिन कार्यों को करने वाले तुम इन्द्रियरहित ही वेदों का उपदेश करते हो। अथवा (अनेक प्रलय बीत जाने के बाद भी) करुणारहित हो। मेरी मुक्ति की बात याद नहीं करते।

**( ३४ )**

**अथ कृतककलेवरद्वयेन**
**व्यवहरता च निदेशदायिना च।**
**अवगमितपदप्रवृत्तिमादौ**
**कवयसि लोकहिताय सम्प्रदायम्।।**

**अन्वयः** - व्यवहरता अथ च निदेशदायिना च कृतककलेवरद्वयेन आदौ लोकहिताय अवगमितपदप्रवृत्तिं सम्प्रदायं कवयसि।

**पदार्थप्रकाशिका** -अथेति- व्यवहरता व्यवहारं कुर्वता कर्मकाण्डरूपेण अथ च निदेशदायिना च निवृत्तिकाण्डेन ज्ञानकाण्डेन वेति कृतकशरीरद्वयेन कृत्रिमदेहद्वयेन आदौ प्रथमं लोकहिताय सांसारिकाणां कल्याणाय अवगमितपदवृत्तिम् अवगमिता बोधिता पदानां प्रवृत्तिः यस्मिन् सः अवगमितपदप्रवृत्तिस्तं सम्प्रदायं परम्परां कवयसि प्रथयसि।

नैयायिकानां मते शब्दस्य कृतकत्वाद् वेदा अनित्याः। वेदस्य कर्मकाण्ड-ज्ञानकाण्डभेदाद् द्वैविध्यं परिकल्प्येह शिवस्यापि कृतकशरीरद्वयं कल्पितम्। शिवः व्यवहारयोग्येन कर्मकाण्डेन निदेशदायिना विध्यादिवाक्यात्मकशरीरेणादौ इच्छारूपां पदानां प्रवृत्तिं शक्तिं वा निर्धारयतीति प्रसिद्धो राद्धान्तः। स एव सङ्केतितः पद्येऽस्मिन्निति। अथवा आदौ सृष्टेःप्रारम्भे व्यवहरता मध्यमवृद्धरूपेण उत्तमवृद्धोक्तानुसारमनुतिष्ठता, निदेशदायिना उत्तमवृद्धरूपेणाज्ञाप्रदायिना च कृतकेन मायाकल्पितेन कलेवरद्वयेन उत्तमवृद्धमध्यमवृद्धरूपदेहद्वितयेन

अवगमिता अनुभवगोचरतामापादिता पदानां प्रवृत्तिः अर्थैः सह शक्तिग्रहः येन तादृशः त्वम् लोकहिताय लोकानामामुष्मिकमैहिकं च श्रेय उपपादयितुम् वेदं कवयसि। शक्तेरीश्वरेच्छारूपत्वं नैयायिकमते। तच्चेदं तथ्यं साहित्यदर्पणादावपि स्फुटम्। अमृतोदये तु अथेत्यत्र 'ननु' इति पाठः।

**अनुवादः** – व्यवहारयोग्य कर्मकाण्डरूप तथा निदेशात्मक ज्ञानकाण्डरूप अपने दोनो कृत्रिम शरीरों से अथवा सृष्टि के प्रारम्भ में उत्तमवृद्ध तथा मध्यमवृद्ध के रूप में व्यवहार करते हुए तुम पहले सांसारिकों के हित के लिये पदों की प्रवृत्ति के निर्धारक सम्प्रदायों की कल्पना करते हो।

**( ३५ )**

**हितविधिकपटान्निसर्गमूढ-**
**प्रकृतिरसावहितान्निवर्तनीयः।**
**इति विषमतमेऽपि संविधाने**
**गणयतु कस्तव नाथ! कौशलानि।।**

**अन्वयः** – हे नाथ! निसर्गमूढप्रकृतिः असौ अहिताद् हितविधिकपटात् निवर्तनीयः इति विषमतमे अपि संविधाने तव कौशलानि कः गणयतु।

**पदार्थप्रकाशिका** – हितविधीति– हे नाथ! हे स्वामिन्! निसर्गमूढप्रकृतिः प्रकृत्या मूर्खस्वभावः असौ जीवलोकः अहितात् अहितसाधनात् हितविधिकपटात् हितविधिरूपात् कपटात् छलात्, कर्मकाण्डादिति यावत्। निवर्तनीयः परावर्तनीयः इत्येवं विषमतमे अपि प्रतिकूलतमे अपि संविधाने वेदरूपे अनुष्ठाने तव शिवस्य कौशलानि नैपुण्यानि कः गणयतु विचारयतु। निसर्गतः मूढप्रकृतिरसौ जीवः हितविधिकपटरूपात् कर्मकाण्डात् निवर्तनीयोऽस्ति। विषमतमेऽस्मिन् तव वेदरूपे संविधाने कर्मकाण्डः ज्ञानकाण्डश्चेत्युभयमपि वर्तते। तस्य च कर्मकाण्डस्य जीवलोके महान् समादरो दृश्यते। ज्ञानकाण्डे जीवानां न तथा प्रवृत्तिः। तत्र कर्मकाण्डोऽयं न वस्तुतो

हितसाधकोऽतस्तस्माज्जीवं निवर्तय इति भाव:। अथवा यत्र हितमहितरूपेण अहितञ्च हितरूपेण भासते तादृशेऽपि संविधाने लोकचेष्टिते निसर्गमूढप्रकृति: स्वभावतो मूढचेष्ट: असौ लोक: हितविधिकपटात् 'एतत् कामयमान:, अनेन यजेतेत्यादिहितविधानव्याजात् अहितात् दुरुदर्कात् 'मा हिंस्यात्सर्वभूतानि' इत्यादिश्रौतनिषेधविषयात् हिंसादेर्निवर्त्तनीय: निवारणीय इति । तव कौशलानि को गणयतु संख्यया परिच्छिनत्तु, त्वं सामान्यतो हिंसाप्रवृत्तं लोकं वैदिकहिंसामात्रस्य कर्त्तव्यतां बोधयन्तीभि: श्रुतिभि: प्रतार्य हितपथे नयसीति तव चातुर्यं गणयितुं न कोऽपि क्षमत इत्यर्थ:। 'प्रकृतिरसाविह तान्निवर्तनीय:' इति अमृतोदये पाठ:।

**अनुवाद** – हे नाथ! प्रकृति से ही मूर्ख स्वभाव वाले इस जीवलोक को अहित के साधनभूत हितसाधक विधानरूप कर्मकाण्ड के छल से लौटाओ। तुम्हारे इस वेद रूपी विषमतम संविधान में तुम्हारी निपुणता को कौन जान सकता है? उस वेद में तुमने ज्ञान और कर्म दोनों का ही संविधान किया है।

**( ३६ )**

**भवतु विधिरपूर्वकार्यतत्त्वा-**
**शयहितसाधनताभिधासु कश्चित्।**
**तदपि मुषितदोषमन्तरा त्वां**
**न भवितुमर्हति चोदना प्रमाणम्।।**

**अन्वय:** – अपूर्वकार्यतत्त्वाशयहितसाधनताभिधासु कश्चिद् विधि: भवतु। तदपि त्वाम् अन्तरा चोदना मुषितदोषं प्रमाणं न भवितुमर्हति।

**पदार्थप्रकाशिका** – भवत्विति-विविधाचार्याणां मते विधे: स्वरूपं प्रतिपाद्य तस्य प्रामाण्ये शिवस्यैव प्रामाण्यं निर्धारयति। विधि: लिङर्थश्चोदना। अपूर्वकार्यतत्त्वाशयहितसाधनताभिधासु कश्चिदपि भवतु। आचार्याणां मतभेदेन विधिस्वरूपेऽपि मतभेदो विद्यते। केषाञ्चिदेकदेशिनां मते 'अपूर्वसङ्कल्पो विधि:',

प्राभाकराणां मते कार्यं विधिः। तत्र कार्यतत्त्वं कार्यता लिङो निरूढलक्षणा इत्यपि प्रभाकरमतानुयायिनः केचन वदन्ति। उदयनाचार्यमते तु आशय आप्ताभिप्राय एव लिङर्थः। मिश्रानुयायिनस्तु इष्टसाधनतां लिङर्थं वदन्ति। कौमारिलाः अभिधा लिङर्थ इति निर्धारयन्ति। एतेषु यः कोऽपि लिङर्थो भवतु। तदपि मुषितदोषं भ्रमप्रमादादि जीवदोषरहितं त्वामन्तरा विना चोदना प्रमाणं न भवितुमर्हति। सम्प्रदायप्रामाण्यार्थं त्वत्प्रत्यक्षप्रामाण्यमवश्यमेव अपेक्ष्यत इति भावः।

**अनुवाद** - अपूर्व, कार्य, तत्त्व, आशय या हितसाधनता इनमें से किसी को भी (नाना आचार्यों के मातानुसार) विधि कहा जाय किन्तु तुम्हारे बिना वह विधिवाक्य या वेदवाक्य भी दोष रहित प्रमाण नहीं हो सकता।

**( ३७ )**

**प्रभवति परमाप्त! यो दुरन्ता-**
**दपसरणाय हिते प्रवर्तनाय।**
**सह चरति चतुर्भिरर्थवादै-**
**र्निगमकवे! स तवैव सूक्तसारः।।**

**अन्वयः** - हे परमाप्त! तव यः सूक्तसारः दुरन्तात् अपसरणाय हिते प्रवर्तनाय (च) प्रभवति। हे निगमकवे! स एव (सूक्तसारः) चतुर्भिः अर्थवादैः सह चरति।

**पदार्थप्रकाशिका** - प्रभवतीति- हे परमाप्त! परम उत्कृष्टश्चासौ आप्तः विश्वास्यवचनश्चेति परमाप्तः, तत्सम्बोधने। हे परमाप्त! परमात्मन्! तव सूक्तानां सुभाषितानां सारः तत्त्वं वेदः दुरन्तात् दुःखप्रदान्तात् दुर्विपाकात् अपसरणाय दूरीकरणाय हिते प्रवर्तनाय ब्रह्मज्ञानसम्पादनद्वारा मोक्षाय च प्रभवति समर्थो भवति। हे निगमकवे! निगमानां वेदानां निर्माणे चतुर! स एव सूक्तसारः चतुर्भिः अर्थवादैः त्वया सह चरति विलसति। विध्यर्थप्रशंसापरं

प्राशस्त्यनिन्दान्यतरपरं वाक्यं चार्थवादः। यथा वायुर्वै क्षेपिष्ठा देवतेत्यादि वाक्यम्। वायव्यं श्वेतमालभेत भूतिकामो, वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति (कृष्णयजुर्वेद २.१.१) इत्यादौ वायुर्वै क्षेपिष्ठेत्याद्यर्थवादो हि वायव्यं श्वेतमालभेतेत्यादिविधिविहितं श्वेतपश्वालम्भनं श्वेतपशुकरणको यागः प्रशस्त इति प्रशंसयति। स च अर्थवादः स्तुतिः निन्दा परकृतिः पुराकल्प इति चतुर्विधः (न्यायसूत्रम् २.१.६४)।

**अनुवाद** - हे परमाप्त! वेदरूप तुम्हारा सूक्तसार मोक्षादि की प्राप्ति कराने में समर्थ है। वह दुर्विपाकों से दूर करने और हित में प्रवर्तित करने में भी समर्थ है। हे निगमकवे! तुम्हारा वह सूक्तसार चार प्रकार के (स्तुति, निन्दा, परकृति और पुराकल्प) अर्थवादों के साथ सुशोभित होता है। (अनुष्ठेय विधि का विधान करता है)।

**( ३८ )**

**अजिनमुसलवेदियूपशम्या-**
**दृषदुपलस्फ्यहविःकपालशूर्पैः।**
**अथ गुरुयजमानगातृहोतृ-**
**प्रभृतिभिरध्वरकर्मसु त्वमिज्यः।।**

**अन्वयः** - त्वम् अध्वरकर्मसु अजिन-मुसल-वेदि-यूप-शम्या-दृषद्-उपल-स्फय-हविः कपालशूर्पैः अथ गुरु-यजमान-गातृ-होतृप्रभृतिभिः इज्यः(भवसि)।

**पदार्थप्रकाशिका**- अजिनेति- त्वं शिवः अध्वरकर्मसु यागेषु, अजिनं च मुसलं च वेदी च यूपश्च शम्या च दृषच्च उपलञ्च स्फयं च हविश्च कपालशूर्पश्च तैः अथ च गुरुश्च यजमानश्च गाता च उद्गाता च होता चेत्यादिभिः इज्यः पूज्यः। भवसीति शेषः। अजिनं मृगचर्म, शम्या मुसलाकारकाष्ठम्, स्फ्यं खड्गाकारं काष्ठम्। यज्ञेष्वेतेषां प्रयोगो भवतीति तद्विधिप्रतिपादकग्रन्थेषु विशेषो द्रष्टव्यः।

'दृषदुपलस्य कपालयूपैः' इति अमृतोदये पाठः।

**अनुवाद**- हे शिव! यज्ञकर्मो में तुम अजिन (मृगचर्म), मुसल, वेदी, यूप, शम्या (मुसलाकारकाष्ठ), दृषद् (सिलवट), उपल (लोढ़ा) स्फ्य (खड्गाकारकाष्ठ), हवि, कपालशूर्प और गुरु, यजमान, उद्गाता, होता आदि के द्वारा पूजे जाते हो।

## ( ३९ )

**विकिरति परितो घनावलीव**
**श्रुतिरमृतानि तवाशयादुदस्य।**
**विलयमयमुपैति चित्समुद्र!**
**त्वयि जगतो निगमस्य चित्प्रवाहः।।**

**अन्वय :**- हे चित्समुद्र! श्रुतिः तव आशयात् अमृतानि उदस्य घनावली इव परितः विकिरति। जगतः निगमस्य अयं चित्प्रवाहः त्वयि विलयम् उपैति।

**पदार्थप्रकाशिका** - विकिरतीति- हे चित्समुद्र! चिदेव समुद्रः, चित्समुद्रस्तत्सम्बोधने। हे चेतनाजलधे! तव आशयात् हृदयात् अमृतानि सुधाधारा जलानि वा उदस्य निस्सार्य। उत्पूर्वकोऽस्धातुः। श्रुतिः वेदः घनावली इव मेघपंक्तिर्यथा परितोऽभितः विकिरति वर्षति। जगतः निगमस्य, चैतन्यस्य वेदस्य अयं श्रुत्या कीर्णः चित्प्रवाहः चेतनायाः सञ्चारः त्वयि शिवे विलयं शमनम् उपैति प्राप्नोति। यथा नदी समुद्रे विलयमुपैति तथा चिद्रूपप्रवाहस्त्वयि शिवे विलयं यातीति त्वं चित्समुद्रोऽसि। घनावली समुद्राज्जलानीव निगमस्तव हृदयात् अमृतानि निस्सार्य वर्षतीति तव समुद्रेण साम्यमिति भावः। यथा घनावली समुद्रस्य हृदयात् अमृतं जलमुद्धृत्य सर्वतो वर्षति तया स्वकृतवर्षणद्वारा जनितश्च प्रवाहश्चरमे समुद्रे लीयते तथैव परमात्मनः हृदयात् श्रुतिःस्मृतिफलानि स्वर्गादीनि समस्ते जगति विकिरति विस्तारयति। चरमे चेदं जगत् स्वकारणे परमात्मनि लीयते। उपमालङ्कारः।

**अनुवाद**- हे चेतनासमुद्र! तुम्हारे हृदय से अमृत (जल) निकाल कर श्रुति सर्वत्र मेघसमूह की भाँति वृष्टि करती है। चेतन निगम का यह प्रवाह तुझ शिव में ही विलीन होता है।

**( ४० )**

**अभिसरति परं परं पुरारे!**
**विषयमनेकमपास्य पूर्वपूर्वम्।**
**वरुणनिलयमापगेव यावद्**
**भजति भवन्तमसौ न चित्तवृत्तिः।।**

**अन्वयः** - हे पुरारे! असौ चित्तवृत्तिः यावत् आपगा वरुणनिलयम् इव भवन्तं न भजति (तावत्) पूर्वपूर्वम् अनेकविषयम् अपास्य परं परं (विषयम्) अभिसरति।।

**पदार्थप्रकाशिका** - अभिसरतीति- हे पुरारे! असौ चित्तवृत्तिः मनोवृत्तिः यावत् यावत्कालम् आपगा नदी वरुणनिलयमिव वरुणालयं समुद्रमिव भवन्तं न भजति न सेवते। 'तरङ्गिणी शैवलिनी तटिनी ह्रदिनी धुनी। स्रोतस्वती द्वीपवती स्रवन्ती निम्नगाऽपगा' इत्यमरः। तावत् तावत्कालं पूर्वपूर्वं पूर्वपूर्वकाले सञ्चितं प्राप्तं वा, अनेकविषयम् अनेकं विषयं कर्मभोगम् इन्द्रियार्थम् वा अपास्य परित्यज्य परं परं नवं नवं विषयं प्रति अप्राप्तं प्रति अभिसरति धावति। यावदियं चित्तवृत्तिस्त्वयि समुद्रे नदीव विलीना न भवति तावत् पूर्वपूर्वं विषयं परित्यज्य नवं नवं प्रति धावति। यथा समुद्रं प्राप्य नदी सर्वं स्वत्वं परित्यज्य तद्रूपा भवति, नदीसमुद्रयोः कश्चन भेदो न भवति। तथैव शिवे विलीना चित्तवृत्तिः शिवरूपैव जायते। ततः परं तस्यां भोगप्रवृत्तिः न भवतीत्यभिप्रायः। चित्तवृत्तीनां नदीरूपत्वं तु योगसूत्रे चर्चितमेव।

**अनुवाद** - हे पुरारे! यह चित्तवृत्ति जब तक नदी और समुद्र के समान आपसे नहीं मिल जाती तब तक पूर्व पूर्व विषयों को छोड़ कर नये नये

विषयों के लिये अभिसरण करती है। जैसे समुद्र से मिल जाने पर नदी समुद्रमय हो जाती है। उसका पृथक् अस्तित्व नहीं रह जाता, उसी प्रकार शिव से मिल कर चित्तवृत्ति भी शिवमय हो जाती है। शिवरूपता प्राप्त होने के बाद उसे पृथक् भोग प्राप्त नहीं होता।

**( ४१ )**

**गुणगणमपनीय चित्तकूपे**
**मम निगमैः सहसा निपातितोऽसि।**
**अमृतकलश! तिष्ठ तिष्ठ मन्ये**
**पुनरपि जीवनमुद्धरिष्यसे नः।।**

**अन्वयः** - हे अमृतकलश! निगमैः गुणगणम् अपनीय (त्वं) सहसा मम चित्तकूपे निपातितः असि। तिष्ठ तिष्ठ। पुनः अपि नः जीवनम् उद्धरिष्यसे (इति) मन्ये।

**पदार्थप्रकाशिका**- गुणगणमिति- हे अमृतकलश! हे अमृतत्वप्रदायक शिव! निगमैः गुणगणं गुणानां गणः गुणगणः गुणानां समूहः, सत्त्वरजस्तमसां बुद्ध्यादीनां च संहतिरित्यर्थः। पक्षे गुणगणं रज्जुराशिः। तमपनीय दूरीकृत्य निर्गुणभावेनेत्यर्थः। सहसा अकस्मादेव मम गोकुलनाथस्य जीवस्य वा अज्ञानतमोवृत्ते चित्तकूपे चित्तमेव कूपं चित्तकूपं तस्मिन् निपातितोऽसि। चित्तवृत्तौ स्थापितोऽसि। तिष्ठ तिष्ठ। तत्रैव मम चित्तवृत्तौ भव। त्वया पुनः अपि नोऽस्माकं भक्तानां जीवनमुद्धरिष्यसे, अस्मज्जीवनस्य उद्धारस्त्वया भविष्यतीति मन्ये। जीवनशब्दोऽत्र प्राणस्य जलस्य च वाचकः। यथा रज्जुमपनीय कूपे पतितो घटः कूप एव तिष्ठति न जलमुद्धर्तुं समर्थो भवति तथैव उपनिषदादिभिनिर्गुणीकृत्य त्वं मम हृदये पातितोऽसीति। ''न तस्य अधिगतपरमार्थस्य प्राणा उत्क्रामन्ति तत्रैव समवलीयन्ते।'' इति श्रुतेरिति तात्पर्यम्। घटपक्षे जीवनं जलमिति बोध्यम्।

**अनुवाद** – हे अमृतकलश! निगमों ने (मेरे चित्त के) गुण समूह को दूर करके, सत्त्व, रजस् और तमस् तथा बुद्धि आदि से रहित करके तुमको अकस्मात् मेरे (शुद्ध) चित्तरूपी कूप में डाल दिया है, अतः तुम मेरे चित्तकूप में ही रहो। तुम पुनः हमारे जीवन का उद्धार करोगे, यह मेरा मानना है।

## ( ४२ )

**प्रथमसमयसङ्गमाय नैत–**
**ज्जगदुपजीवति केवलं भवन्तम्।**
**भवतु सततसन्तमन्तरा त्वां**
**कथमनिदम्प्रथमाऽपि वस्तुसत्ता।।**

**अन्वयः** – एतत् जगत् भवन्तं केवलं प्रथमसमयसङ्गमाय न उपजीवति। सततसन्तं त्वाम् अन्तरा वस्तुसत्ता अपि कथम् अनिदम्प्रथमा भवतु।

**पदार्थप्रकाशिका** – प्रथमेति – एतत् इदं जगत् संसारो भवन्तं शिवं केवलं प्रथमसमयसङ्गमाय प्रथमः पूर्वो यः सङ्गमस्त्वया शिवेन सह मिलनं तस्मै। प्रलयानन्तरं प्रथमसृष्टिकाल एव त्वया सह सङ्गमो भवत्वित्येतदर्थं न उपजीवति, नाश्रयति। अपि तु सत्तायां जन्मान्तरे चापि सत्यावश्यके त्वद्दर्शनं निखिलमपि जगद् वाञ्छतीति तदर्थं त्वदाश्रयं स्वीकरोतीत्यर्थः। सततसन्तं, सततम् अविरतम् आदौ मध्येऽन्ते वा सन् विद्यमानः सततसन् तं सततसन्तम्। त्रिष्वपि कालेष्वबाधितोपस्थितिकमित्यर्थः। 'सन् साधौ धीरशस्तयोः। मान्ये सत्ये विद्यमाने त्रिषु साध्व्युमयोः स्त्रियाम्' इति मेदिनी। त्रिकालाबाधितोपस्थितिकं त्वां शिवम् अन्तरा विना वस्तुसत्ता पदार्थविद्यमानता तदस्तित्वं वा, अपि कथं केन प्रकारेण अनिदम्प्रथमा न इदम्प्रथमं यस्यास्तादृशी भवतु अस्तु। भवत उपस्थितिः सततं वर्तत इति भवान् सततसन् नित्यो वा भवति। तादृशे त्वयि विद्यमाने सति कस्यचिदपि वस्तुनः सत्ता अनिदम्प्रथमा, यस्याः पूर्वं किमपि न विद्यत इत्येतादृशी कथं भवतु, न कथमपि

भवितुमर्हतीत्याशयः। सर्वतः प्रथमं तव सत्ताऽस्ति तदनन्तरं चान्येषां पदार्थानामिति त्वत्पूर्विकैव वस्तुसत्ता भवितुमर्हतीति भावः। अतो जगन्न प्रथमसमयसङ्गमायाऽपि तु भूयोभूयस्तव दर्शनाय त्वामाश्रयति। जगतोऽस्य सत्तापि त्वत्पूर्विकैव वर्तत इत्यर्थः।

**अनुवाद**- यह संसार केवल जन्म के समय मिलने के लिये तुम्हारा आश्रय नहीं लेता। तुम तो तीनो कालों में विद्यमान रहते हो, अतः तुम्हारे बिना किसी वस्तु की सत्ता अनिदम्प्रथमा (जिसके पहले कुछ नहीं है) कैसे हो सकती है। तुम्हारी सततविद्यमानता के पश्चात् ही जगत् है। अतः प्रथमसमयसङ्गम (पहली बार मिलन मात्र) के लिये यह जगत् तुम्हारा आश्रय लेता है, यह कहना उचित नहीं। जगत् की सत्ता से पूर्व तुम्हारी सततसत्ता तो है ही।

**(४३)**

**प्रवहपवनवेगघट्टितोऽपि**
**स्खलति न यज्जगदण्डपिण्डभारः।**
**लघुगुरुतुलनातुलाप्रकाण्ड!**
**द्रढिमगुणः स भवद्गुणत्रयस्य।।**

**अन्वयः** - हे लघुगुरुतुलनातुलाप्रकाण्ड! यत् प्रवहपवनवेगघट्टितः अपि जगदण्डपिण्डभारः न स्खलति, स भवद्गुणत्रयस्य द्रढिमगुणः वर्तते।

**पदार्थप्रकाशिका**- प्रवहेति- हे लघुगुरुतुलनातुलाप्रकाण्ड! लघु च गुरु चेति लघु गुरू, लघुगुर्वोस्तुलनातुलायां प्रकाण्डम्, लघुगुरुतुलना-तुलाप्रकाण्डम्, तत्सम्बोधने। इदं लघु वर्तत इदं च गुरु वर्तत इति तुलनायास्तुलायां परिमाणप्रमाणे दक्ष इति यावत्। यत् यस्मात् कारणात् प्रवहपवनवेगघट्टितः अपि, प्रकृष्टो वहः प्रवहस्तादृशो यः पवनस्तस्य वेगेन घट्टितः आहतः अपि। प्रवहो वायुभेदः। 'प्रवहस्तु बहिर्यात्रामातरिश्वप्रभेदयोः' इति विश्वः। तीव्रगत्या प्रवहमानस्य वायोः वेगेन सङ्घट्टितोऽपीत्यर्थः।

जगदण्डपिण्डभारः जगदण्डम् एव ब्रह्माण्डम् एव पिण्डः गोलकस्तस्य भारः, जगदण्डपिण्डभारः। न स्खलति उपरिष्टान्न पतति, स्वस्थनात् इतस्ततो वा न गच्छति, स भवद्गुणत्रयस्य भवतः शिवस्य गुणत्रयं सत्त्वरजस्तमांसीत्येते त्रयो गुणाः। अथवा गुणत्रयं रज्जुत्रयम्। तव सत्त्वादिगुणत्रयाणां द्रढिमगुणो दृढताया गुणः प्रभावोऽस्ति। अथवा गुणत्रयस्य रज्जुभिस्त्रिधा बन्धनस्य दार्ढ्यमस्ति। 'गुणो मौर्व्यामप्रधाने रूपादौ सूद इन्द्रिये त्यागशौर्यादिसत्त्वादिसन्ध्याद्या-वृत्तिरज्जुषु। शुक्लादावपि बुद्ध्यां च' इति मेदिनी। भवान् शिवः पदार्थानां लघुगुरुतुलनातुलायां निपुणोऽस्ति। अतो भवद्बन्धननैपुण्यात् प्रकृष्टवेगवता पवनेन प्रघट्टितोऽपि ब्रह्माण्डपिण्डभारो यस्मिन् स्थाने भवता स्थापितोऽभूत्तत्रैव स्थितोऽस्ति। ततस्तस्य स्खलनं न भवति। नूनं सर्वमिदं भवतो सत्त्वादिगुणत्रयस्य रज्जुत्रयेण वा बन्धनस्य दृढतरो गुणो वर्तते इति भावः।

**अनुवाद** – हे लघु और गुरु की माप करने वाले तराजू मे निपुण शिव! प्रचण्ड गतिवाले वायु से टकराकर भी जो यह ब्रह्माण्डपिण्ड का भार इधर उधर नहीं खिसक रहा, वह तुम्हारे त्रिगुण (सत् रजस् और तमस् रूप तीन गुणों या तीन रस्सियों) से बाँधने का दृढ़तम गुण है। तुमने इसे ऐसा बाँधा है कि अपने स्थान पर ही स्थिर है।

**( ४४ )**

**त्वमखिलजगदीश! षड्भिरङ्गै-**
**रुपचितवेदमजीजनः षडङ्गम्।**
**कथय कथमसावुपैत्वसत्तां**
**सततसतो भवतः स्वतः प्रपञ्चः।।**

**अन्वयः** – हे अखिलजगदीश! त्वं षड्भिः अङ्गैः षडङ्गम् उपचितवेदम् अजीजनः। सततसतः भवतः असौ स्वतः प्रपञ्चः कथम् असत्ताम् उपैतु (इति) कथय।

**पदार्थप्रकाशिका**– त्वमखिलेति– हे अखिलजगदीश! अखिलस्य निखिलस्य जगतः संसारस्य, ब्रह्माण्डस्येति यावत्। ईशः स्वामी, तस्य सम्बोधने। त्वं षड्भिः अङ्गैः पादाच्छन्दः हस्ताभ्यां कल्पं चक्षुर्भ्यां ज्योतिषं श्रोतृभ्यां निरुक्तं नासिकायाः शिक्षाम्, मुखाच्च व्याकरणमिति पादादिषड्भिरङ्गैः षडङ्गं छन्दःकल्पादिषडङ्गोपेतम् उपचितवेदं विविधशाखाप्रशाखाभिरुपचितं विस्तृतं वेदम् अजीजनः उत्पादितवान्। तथा चैतत्तत्त्वं वर्णितं पाणिनीयशिक्षायाम्–

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।।(४१-४२)

छन्दः प्रभृतीनां शिवस्य तत्तदङ्गजातत्वाद् वेदस्य तत्तदङ्गत्वेन व्यपदेश इति कवेराशयः। सततसतः, सततं नित्यं सत् विद्यमानः सततसत्, तस्य सततसतः, भवतः शिवस्य असौ वेदरूपः स्वतः प्रपञ्चस्त्वदतिरिक्तहेत्वजन्यो विस्तारः, कथं केन प्रकारेण असत्ताम् अविद्यमानताम् उपैतु गच्छतु दूरीभवत्विति कथय वद।

**अनुवाद**– हे समस्त जगत् के स्वामी! तुमने अपने पैर, हाथ, आँख, कान, नाक और मुख इन छः अङ्गो से छन्द, कल्प, ज्योतिष, निरुक्त, शिक्षा और व्याकरण रूप छः अङ्गो में विस्तृत वेद को उत्पन्न किया है। नित्य विद्यमान तुझ परमेश्वर का यह प्रपञ्च स्वतः असत्ता को भला कैसे प्राप्त हो सकता है ?, यह कहो।

**( ४५ )**

**विशकलितमनुव्रजन्निचित्य**
**स्थपतिरिव त्वमजीघटः प्रपञ्चम्।**

**विभुरसि न च युज्यसे विकारै-**
**स्त्वयि समवैतु कथं स भूतसर्गः।।**

**अन्वयः** - त्वं स्थपतिः इव विशकलितं प्रपञ्चं निचित्य अनुव्रजन् अजीघटः। (त्वं) विभुः असि, विकारैः न युज्यसे, (अतः) भूतसर्गः त्वयि कथं समवैतु।

**पदार्थप्रकाशिका**- विशकलितेति-स्थपतिः इव स्थश्चासौ पतिश्चेति स्थपतिः। 'स्थपतिः कञ्चुकिन्यपि। जीवेष्टियाजके शिल्पिभेदे ना सत्तमे त्रिषु' इति मेदिनी। 'कारुभेदो मुख्यतक्षा' इति स्वामी। गृहनिर्माणपटुः शिल्पकार इत्यर्थः। त्वं शिवः स्थपतिः शिल्पी इव विशकलितम् इतस्ततो विकीर्णं प्रपञ्चं जगत्तत्त्वं निचित्य चित्वा, एकत्रीकृत्य। अनुव्रजन् तस्मिन्नेव अनुप्रविश्य अजीघटः सृष्टवानसि। यथा स्थपतिर्लोके यत्र तत्र विकीर्णानि तत्त्वानि संहृत्य शिल्पं रचयति तथैव त्वमपीतस्ततो विकीर्णानि परमाण्वादितत्त्वानि संहृत्य जगत्प्रपञ्चं सृष्टवानसीति भावः। श्रुतिरप्याह- ''तत्सृष्ट्वा तदेव प्राविशत्''। तथा च श्रीमद्भागवतेऽप्युक्तम्-

कालसंज्ञां तदा देवीं विभ्रच्छक्तिमुरुक्रमः।
त्रयोविंशतितत्त्वानां गणं युगपदाविशत्।।
सोऽनुप्रविष्टो भगवांश्चेष्टारूपेण तं गणम्।
भिन्नं संयोजयामास सुप्तं कार्यं प्रबोधयन्।। (३.६.२,३)

जगत्सृष्ट्वा तत्रैवानुप्रविशसि तथापि न तव विकारसंस्पर्शः। विकारशब्देनाऽत्र षड्भावविकाराः जायते, अस्ति, विपरिणमते, वर्धते अपक्षीयते विनश्यतीति गृह्यन्ते। यतो हि त्वं विभुः व्यापकोऽसि, विकारैर्न युज्यसे, विकारैर्न स्पृश्यसे, अतोऽयं भूतसर्गः भूतानां प्राणिनां सर्गः सृष्टिस्त्वयि शिवे कथं समवैतु समवेतो भवतु, समवायेन तिष्ठत्वित्यर्थः। भूतसर्गस्तु विकारैरेव समवेतो भवति। त्वं तु विकाररहितोऽसि। अतस्त्वयि भूतसर्गस्य समवेतत्वं न सम्भाव्यते। अत्र

नैयायिकमतेन सृष्ट्युपादानत्वमुक्तम्। तथा हि वेदान्तिनः परमात्मानमेव जगदुपादानं मन्यन्ते, तदुक्तम्- 'रज्जौ भुजङ्गवद्यत्र विवरीवृत्यते जगत्'। विवर्त्ताधिष्ठानतया परमात्मनो जगदुपादानत्वं सिद्ध्यति। नैयायिकास्तन्न मन्यन्ते, ते हि ब्रह्मणो निमित्तत्वमेव स्वीकुर्वते, तेषां मते परमात्मनः सञ्जिहीर्षावशाद्विशकलिता भवन्ति परमाणवः, तत्र नित्येच्छाद्वारेणेश्वरो निमित्तमेव। सिसृक्षावशादसौ परमाणून् सञ्चित्य जगन्निर्माति तत्राप्यसौ कुलालवन्निमित्तमेव, समवायिकारणत्वं तु न कथमपि तस्य सिद्ध्यति। अमृतोदये तु 'विशकलितमणु' इति पाठः।

**अनुवाद**- तुम शिल्पकार की भाँति इधर उधर फैले हुए तत्त्वों को एकत्र करके जगत् की रचना करते हो और उसी में प्रविष्ट हो जाते हो। किन्तु तुम विभु (व्यापक) हो, विकारों से युक्त नहीं हो सकते। अतः यह भूतसर्ग तुम में कैसे समवेत हो।

**( ४६ )**

**न जगदिदमहेतुतो न शून्या-**
**दवधिमतां कथमुद्भवोऽस्त्वकस्मात्।**
**प्रकृतिरियमधर्मधर्मरूपा**
**पुरुषगुणः कथमारभेत विश्वम्।।**

**अन्वयः**- इदं जगत् अहेतुतः न (उद्भवेत्) शून्यात् न (उद्भवेत्)। (तर्हि) अवधिमताम् उद्भवः अकस्मात् कथम् अस्तु। पुरुषगुणः इयं अधर्म-धर्मरूपा प्रकृतिः विश्वं कथम् आरभेत।

**पदार्थप्रकाशिका** - न जगदिदमिति- इदं पुरो विद्यमानं जगत् संसारः अहेतुतः कारणतारहितात् तत्त्वात् कथं केन प्रकारेण उद्भवेत्, उत्पद्येत। शून्यवादिनां शून्यात् न, शून्यादपि जगन्नोत्पद्येत। अवधिमतां गोर्गौरेवोत्पद्यतेऽश्वादश्व एवोत्पद्यत इति मर्यादाशालिनामुद्भवः उत्पत्तिः

अकस्मादपि, सहसा कथमस्तु। किमपि कारणं तु तत्र स्यादेव। इयं सांख्यानां प्रकृतिः अधर्मधर्मरूपा विद्यते, स पुरुषगुणः पुरुषाधीनास्ति। अतो न तादृशप्रकृत्या जगदुत्पत्तिः सम्भाव्यते। पुरुषगुणः, सांख्यानां मते पुरुषः कार्यकारणधर्मरहितो वर्ततेऽतः स कथं विश्वं महदादि आरभेत इत्यपि भावः। सांख्यानां प्रकृतिः पुरुषस्य गुणः गुणभावः वर्तते। साम्यावस्थायां कार्यजननशक्तिरहितत्वाद् विक्षोभानन्तरं तज्जननसामर्थ्यात् पुरुषस्य धर्माधर्मयोः प्रवर्तकत्वाद्वा तद्धर्माधर्मरूपत्वम्।

न्यायमते पुरुषैरनुष्ठितानां कर्मणां शुभाशुभाऽदृष्टसंस्कारात्मकं फलं पुरुषस्यात्मनि गुणरूपेण जायमानं सदाफलोदयं पुरुषात्मनि तिष्ठति जाते च तत्फले नश्यति, तदेवादृष्टपदेन कथ्यते तच्च फलतो धर्माधर्माविव, इति पुरुषगुणरूपा प्रकृतिः स्वतन्त्रताविरहाद्विश्वं निर्मातुं न शक्नोति, पुरुषस्य विश्वनिर्मातृता तु न कस्याऽप्यभिमता, शून्यतोऽपि न शक्नोति जगदुत्पत्तुं प्रतिनियतमर्यादाभङ्गप्रसङ्गात्, विनैव किमपि कारणम् विश्वस्योत्पत्तिश्च न शक्यतेऽभ्युपगन्तुमित्यगत्या परमात्मा कारणत्वेन स्वीकर्त्तव्य एवेति।

अस्मिन् पद्ये सृष्टिप्रक्रियायाश्चत्वारो वादाः सन्ति निर्दिष्टाः। अहेतुतः इति पदेन निष्कारणतावादिनां पक्षः, शून्यादिति पदेन बौद्धानां शून्यवादः, 'अकस्मात्' इति पदेन कस्यचिद् अकस्माद्वादः, अन्ते च सत्कार्यवाद इति। सर्वेऽप्येते वादा अत्र निराकृता एव। वस्तुतस्तु शास्त्रेषु आरम्भवादः परिणामवादो विवर्तवादः संघातवादश्चेति सृष्टिप्रक्रियावादाः प्रसिद्धाः किन्तु स्वभाव-नियति-यदृच्छा-भूतादयो वादा अपि तत्र चर्चिता दृश्यन्त एव। स्वभावो हि हेत्वन्तरानपेक्षो वस्तुधर्मविशेषः। अस्मिन्मते स्वभाव एव सृष्टिकारणम्। यथा-

शिखिनश्चित्रयेत्को वा कोकिलान् कः प्रकूजयेत्।
स्वभावव्यतिरेकेण विद्यते नात्र कारणम्।।

सांख्यानां प्रकृतिरेव महदादीनां कारणं विद्यते। प्रकृतिशब्देनाऽत्र मूलप्रकृतिर्महदहङ्कारस्तन्मात्राश्च कथ्यन्ते। मूलप्रकृतिरेव महदादितत्त्वानि

जनयति। सांख्ये महदादीनां विकृतित्वमपि निरूपितम्। वस्तुत इयं प्रकृतिर्धर्माधर्मरूपाऽस्ति। पुरुषसंयोगादेव प्रकृतिरियं महदादि जनयति। गुणत्रयस्य साम्यावस्थायामव्यक्ता सती नेयं कार्यजनने भवति क्षमेति विस्तरेण युक्तिदीपिकादौ प्रतिपादितम्। पुरुषस्तु प्रकृतिविकृतिभिन्नः कश्चन कार्यकारणधर्मरहितः सनातनः अतो नेदं महादादीनां कारणत्वं भजत इति न तेन सृष्टिर्भवितुमर्हतीति। अवधिस्तु सम्यग्दर्शनादिगुणजनितक्षयोपशम-निमित्तमवच्छिन्नविषयं ज्ञानमिति बौद्धाः।

**अनुवाद** - यह जगत् कारण के बिना उत्पन्न नहीं हो सकता। शून्यवादियों के शून्य से भी सृष्टि सम्भव नहीं। यह सृष्टि अकस्मात् भी उत्पन्न नहीं हो सकती। पुरुषाधीन रहने वाली धर्माधर्मरूपा प्रकृति विश्व की रचना कैसे कर सकती है। (निःस्पृह पुरुष महदादि को कैसे उत्पन्न कर सकता है)।

**( ४७ )**

**स्वपरपरिचयान्ध्यहेतुमेतं**
**शिव! भवदावरणीयमन्धकारम्।**
**शमयति जगदण्डबिन्दुवृन्दा-**
**म्बुद! भवदेकपदा विवेकविद्युत्।।**

**अन्वयः** - हे शिव! हे जगदण्डबिन्दुवृन्दाम्बुद! भवदेकपदा विवेकविद्युत् स्वपरपरिचयान्ध्यहेतुम् एतं भवदावरणीयम् अन्धकारं शमयति।

**पदार्थप्रकाशिका** - स्वपरेति- हे शिव! हे शङ्कर! हे जगदण्डबिन्दु-वृन्दाम्बुद! ब्रह्माण्डबिन्दुसमूहजलद! जगदण्डमेव बिन्दुः जगदण्डबिन्दुस्तस्य वृन्दानां समूहानाम् अम्बुदः जलदः, तस्य सम्बोधने। ब्रह्माण्डबिन्दुसमूहानां वृष्टिकर्तः मेघ! स्वपरपरिचयान्ध्यहेतुम् स्वश्च परश्चेति स्वपरौ, निजोऽन्यश्चेत्यर्थः। अयं मदीयोऽयं च परकीय इति परिचय एव भेदज्ञानमेव आन्ध्यहेतुः अन्धत्वस्य कारणम्। तमेतं मम हृदये विद्यमानं भवदावरणीयं भवान् शिव एव आवरणीयो

यस्य तं भवत: आच्छादकम् अन्धकारं तम: अज्ञानं वा भवदेकपदा भवान् एव एकं पदं स्थानं यस्या: सा, विवेकविद्युत् विवेक एव विद्युत्, ब्रह्माण्डबिन्दुवृष्टिकारकस्य मेघस्य तव हृदये कृतपदेयं विवेकविद्युदेव स्वपरयोर्भेदात् समागतं त्वदाच्छादकमन्धकारं विनाशयति, अभेदबुद्धिञ्चोत्पाद्य त्वच्छरणं प्रापयतीति भाव:।

**अनुवाद**- हे शिव! ब्रह्माण्डबिन्दु समूहों की वर्षा करने वाले बादल! अपने और पराये (रूप भेद) का परिचय ही अन्धता (अज्ञान) का कारण है। आपको आवृत कर लेने वाले इस आवरणीय अन्धकार को एकमात्र आप में रहने वाली विवेक रूपी विद्युत् ही दूर करती है।

**( ४८ )**

**स्मरसि कथमनन्यदेव! वृत्तां**
**प्रभवकथाविधुरां निजामवस्थाम्।**
**पुनरपि न चिराज्जनार्दन! त्वां**
**न परिचरिष्यति चेतनो द्वितीय:।।**

**अन्वय:**- हे अनन्यदेव! जनार्दन! वृत्तां प्रभवकथाविधुरां निजाम् अवस्थां कथं न स्मरसि। चिरात् पुन: अपि त्वां द्वितीय: चेतन: न परिचरिष्यति।

**पदार्थप्रकाशिका**- स्मरसीति- हे अनन्यदेव! यस्मात् अन्यो देवो नास्तीति। त्वमेक एव ममोपास्य इति यावत्। हे जनार्दन ! हे जनरक्षक!, वृत्तां प्रसृतां प्रभवकथाविधुराम् उत्पत्तिकथारहितां निजां स्वीयाम् अवस्थां दशां कथं केन प्रकारेण न स्मरसि स्मृतिविषयीकरोषि। सृष्टिपूर्वकालिकीं स्वीयां दशां कथं न स्मरसि। सृष्टिप्राक्काले निखिलमपि विश्वं संहृत्य स्वरूपेऽवस्थितस्य ते प्रभुत्वं नासीत्। चिरात् चिरकालानन्तरं पुन: अपि प्रलयकाले सृष्टे: अवसाने त्वां शिवं द्वितीयश्चेतन: अपरश्चेतन: न परिचरिष्यति न सेविष्यत इति। उत्पत्यादिकथारहितं त्वामन्यश्चेतनो न परिचरिष्यतीति न। मद्रूपो द्वितीयश्चेतनो

मुक्तः सन् परिचरिष्यत्येवेत्यभिप्रायः। पूर्वं सृष्ट्यादौ त्वमेकाकी आसीः पुनरपि तथैव भविष्यसीति भावः। अमृतोदये तु 'स्मरसि कथमनन्यसाक्षिवृत्ताम्' इति पाठः।

**अनुवाद**- हे अनन्यदेव! हे जनार्दन! तुम अपूर्व रूप से प्रवृत्त, उत्पत्तिकथा से रहित अपनी अवस्था का स्मरण कैसे नहीं करते। प्रलय काल में सृष्टि का अवसान हो जाने पर पुनः दूसरा चेतन तुम्हारी सेवा नहीं करेगा, ऐसा नहीं। वह अवश्य ही तुम्हारी सेवा करेगा।

## ( ४९ )

**निमिषपरिचितो हरे! समूलं**
**हरसि विशेषगुणव्रजं परस्य।**
**प्रथयसि खलतामिमामपूर्वां**
**कथयसि यद्विगुणत्वमात्मनोऽपि।।**

**अन्वयः** - हे हरे! निमिषपरिचितः (त्वं) परस्य विशेषगुणव्रजं समूलं हरसि। इमाम् अपूर्वां खलतां प्रथयसि यत् आत्मनः अपि विगुणत्वं कथयसि।

**पदार्थप्रकाशिका** - निमिषेति- हे हरे! हरति दोषान् दूरीकरोतीति हरिः। हृञ् धातोः इः। सम्बोधनपदम्। निमिषपरिचितः क्षणाय परिचितः स्मृतः त्वं परस्य प्राणिनः विशेषगुणव्रजं विशेषाणां गुणानां व्रजं समूहं, कामादिदोषान् समूलं मूलेन सहितं हरसि। क्षणं स्मृतस्त्वं सांसारिकप्राणिनः विपरीतगुणसमूहं रूपादिगुणान् वा समूलं विनाशयसि। तं च निर्मलान्तःकरणं करोषि। 'क्षण द्वयं लवः प्रोक्तो निमेषस्तु लवद्वयम्' इति विश्वः। त्वमिमां परविशेषगुणव्रजहरणरूपां खलतां दुष्टतां प्रथयसि विस्तारयसि। यत् यस्मात् कारणात् आत्मनः अपि स्वस्य शिवस्याऽपि विगुणत्वं विगतो गुणो यस्य स विगुणः, तस्य भावो विगुणत्वम् गुणरहितत्वं कथयसि वदसि। निदर्शयसीति यावत्। 'पिशुनो दुर्जनः खल' इत्यमरः। क्षणपरिचितोऽपि खलो यथा परिचितस्य समग्रमपि धनादिकं

हरति तथा क्षणपरिचितस्त्वं विशेषगुणसमूहं हरसि स्वस्य चापि गुणराहित्यं पिशुनयसि। भवान् प्राणिनः विशेषगुणसमूहान् हृत्वा तस्य निर्मलान्तःकरणतां विस्तारयसि। दोषहरणरूपेयं खलता शिवैनैव क्रियते न केनचिदन्येनेति खलतेयमपूर्वा। निन्दया स्तुतिरिति व्याजस्तुतिः। अमृतोदये तु 'अचिरपरिचितो' इति पाठः।

**अनुवाद**- हे हरे! (हरण करने वाले) क्षणमात्र के लिये परिचित होकर तुम प्राणी के विशेषगुणसमूहों का हरण कर लेते हो। हरण करने की तुम्हारी यह प्रवृत्ति अपूर्व है। क्योंकि तुम दोषों का हरण करके अपने गुणराहित्य का भी कथन करते हो।

**( ५० )**

**अलमवगलितेन्द्रियप्रवृत्ते-**
**स्तव जरतः पुरुषस्य जागरेण।**
**अयमहमधुना प्रबुध्यमानः**
**पुरुषविकारकरीं निहन्मि मायाम्॥**

**अन्वय :** - जरतः तव अवगलितेन्द्रियप्रवृतेः पुरुषस्य जागरेण अलम्। अयम् अधुना प्रबुध्यमानः अहं पुरुषविकारकरीं मायां निहन्मि।

**पदार्थप्रकाशिका**- अलमिति- जरतः वृद्धस्य तव शिवस्य अवगलितेन्द्रियप्रवृत्तेः इन्द्रियाणां प्रवृत्तिः इन्द्रियप्रवृत्तिः, अवगलिता विनष्टा इन्द्रियप्रवृत्तिः यस्य तादृशस्य पुरुषस्य तव जागरेण उद्बोधनेन अलम्। अयं सम्प्रति प्रबुध्यमानः संसारस्य असारतां यः ज्ञातवान् तादृशोऽहं जीवः पुरुषस्य विकारकरीं विकारोत्पादिकां मायां निहन्मि विनाशयामि। अथवा पुरुष इति सम्बोधनपदम्। हे पुरुष! विकारकरीमिति योजना। अमृतोदये तु 'प्रभवति दमनाय दोषदस्योः सपदि मनागपि मादृशां प्रबोधः' इति पाठः।

**अनुवाद** - वृद्धत्व को प्राप्त हुए, विनष्ट हो रही इन्द्रिय प्रवृत्ति वाले तुझ पुरुष को जगाना व्यर्थ है। अब मैं जग गया हूँ और सांसारिक विकारों को उत्पन्न करने वाली पुरुष की माया को नष्ट कर रहा हूँ।

**( ५१ )**

**असकृदनटदस्मिता नटी मे**
**निहितपदा मशके मतङ्गजे च।**
**ध्रुवमुपरि तवाधिरोक्ष्यतीयं**
**भव! महतोऽपि महानणोरणीयान्।।**

**अन्वयः**- हे भव! मशके मतङ्गजे च निहितपदा मे अस्मिता नटी असकृत् अनटत्। ध्रुवं (त्वं) महतः अपि महान् अणोः अपि अणीयान् (असि)। इयं तव उपरि अधिरोक्ष्यति ।।५१।।

**पदार्थप्रकाशिका** - असकृदिति- हे भव! हे शिव! मशके कीटे मतङ्गजे गजे च निहितपदा निहितं पदं यया सा निहितपदा, तादृशी मे मम अस्मिता नटी अहङ्काररूपा नटी शैलूषी असकृत् अनेकवारम् अनटत्, नटनम् अकरोत्। मशकोऽहं मतङ्गजाऽहमित्येवं प्रकारेण व्यवस्यन्तीति बुद्धौ असकृत् अनटत्, नटनमकरोत्। ध्रुवं निश्चयेन त्वं महतः अपि महान् विशालतोऽपि विशालः, अणोः अपि अणीयान् लघोरपि लघीयान् सूक्ष्मादपि सूक्ष्मः असि। सा चेयं म अस्मिता नटी तव उपरि अधिरोक्ष्यतीव। ममाहङ्कृतिरियं त्वामपि आरोढुम् अतिक्रम्य भवितुं वाञ्छतीव। यद्यपि महतोऽपि महतो लघोरपि लघुतमस्य तवारोहणं न कथमपि सम्भाव्यते तथापीयं तथा कर्तुमुद्यता भवतीति भावः। अथवा भवेति क्रियापदम्। तेन त्वं महतोऽपि महीयान् अणोरपि अणीयान् यदि भवसि तदा भव, कामं जायस्व मम अस्मिता त्वामधिरोक्ष्यत्येव। इयं हि सूक्ष्मे मशके महति गजे च कृतपदा विद्यते। 'मतङ्गजेन' इति अमृतोदये पाठः। तत्र 'भव' इति क्रियापदम्।

**अनुवाद**– हे भव! मेरी अहंकृति रूपी नटी मशक सदृश तुच्छ प्राणियों तथा गजराज सदृश विशालतम प्राणियों पर पैर रख चुकी है। तुम बड़े से भी बड़े और छोटे से भी छोटे हो। अब मेरी यह अहंकृति तुम पर भी अधिरोहण करना चाहती है।।

**( ५२ )**

**विलयमुपजगाम चेदखण्ड –**
**स्त्वयि जरठो जगदण्डगुल्मपिण्डः।**
**क्षपयसि तदपि क्षपामनिद्रः**
**कतिभिरसौ हि बुभूषति प्ररोहैः।।**

**अन्वयः** – अखण्डः जरठः जगदण्डगुल्मपिण्डः त्वयि विलयम् उपजगाम चेत्, तदपि अनिद्रः क्षपां क्षपयसि। हि असौ (जगदण्डगुल्मपिण्डः) कतिभिः प्ररोहैः बुभूषति।

**पदार्थप्रकाशिका**– विलयेति– अखण्डः खण्डरहितः, जरठः कठोरः। 'जरठः कर्कशे पाण्डौ कठिनेऽप्यभिधेयवत्' इति विश्वः। जगदण्डगुल्मपिण्डः जगदण्डम् एव ब्रह्माण्डम् एव गुल्मपिण्डः वृक्षाणां संहतिर्मूर्तिर्वेत्यर्थः। तादृशोऽयं जगदण्डगुल्मपिण्डस्त्वयि विलयं लयम् उपजगाम चेत्, तदपि तथापि अनिद्रः निद्रारहितः सन् क्षपां रजनीं क्षपयसि गमयसि। हि इत्यस्माद्धेतोः निश्चयेन अयं जगदण्डगुल्मपिण्डः ब्रह्माण्डवृक्षप्रकरः कतिभिरनेकैः प्ररौहैः शाखाभिः बुभूषति भवितुमिच्छति। जगदण्डगुल्मपिण्डे त्वयि विलयं गते सति त्वं कुत्र शेषे। यतो हि त्वं तत्रैव जाग्रत् क्षपां क्षपयसि। अतो हेतोरयं बहुभिः प्ररोहैः भवितुमिच्छतीति भावः।

**अनुवाद**– अखण्ड और कठोर ब्रह्माण्ड रूपी वृक्षों का यह पिण्ड यदि तुम में विलीन हो गया तब तुम बिना नींद लिए ही रात बिता दोगे। अतः ब्रह्माण्डवृक्षों का यह पिण्ड अनेक प्ररोहों से बढ़ना चाहता है।

**( ५३ )**

**विकिरति परदृष्टिवञ्चनाय**
**त्वदुपरि विष्टपसर्षपानविद्या।**
**तदपि निमिषमात्रनिर्गतोऽपि**
**प्रविशति भूतगणो भवन्तमेव।।**

**अन्वयः** - अविद्या परदृष्टिवञ्चनाय त्वदुपरि विष्टपसर्षपान् विकिरति। तदपि निमिषमात्रनिर्गतः अपि भूतगणः भवन्तम् एव प्रविशति।

**पदार्थप्रकाशिका**- विकिरतीति- अविद्या अहम्प्रधाना मतिः। अज्ञानमिति यावत्। 'अथाज्ञानमविद्याहम्मतिः स्त्रियाम्' इत्यमरः। परदृष्टिवञ्चनाय परेषां सांसारिकाणां दृष्टिवञ्चनाय दृष्टेराच्छादनाय त्वदुपरि शिवस्योपरि विष्टपसर्षपान् विष्टपानि लोका एव सर्षपास्तान्। 'अथो जगती लोको विष्टपं भुवनं जगत्' इत्यमरः। विकिरति क्षिपति। तव माया परेषां दृष्टिवञ्चनाय त्वदुपरि लोकसर्षपान् क्षिपतीति भावः। अतस्तैराच्छादितस्य ते न भवति प्राणिभिः साक्षात्कारः। तदपि तथापि कृतेऽपि लोकसर्षपनिक्षेपे निमिषमात्रनिर्गतः क्षणमात्राय क्षिप्तलोकसर्षपेभ्यो बहिरागतोऽपि भूतगणः भूतानां संसारे समुत्पन्नानां प्राणिनां समूहः भवन्तं शिवमेव प्रविशति। क्षणमात्रमपि मायातो बहिर्भूतो भूतगणो भवन्तमेव सेवत इति भावः। अथवा त्वयि विलीनो भवति। भूतादिपरबाधानिवारणाय स्त्रीभिः बालकादौ सर्षपाणां निक्षेपः प्रसिद्धः। अविद्यया ब्रह्माण्डसर्षपक्षेपेऽपि न निस्तारः। यतः शिवे भूतगणप्रवेशो भवत्येव, अत उपहासोऽयं शिवस्य। अमृतोदये तु 'किरति सकलभूतवञ्चनाय त्वदुपरि पिष्टपसर्षपानविद्या' इति पाठः।

**अनुवाद** - अविद्या दूसरों की दृष्टि से तुम्हें छिपाने के लिए तुम्हारे ऊपर छोटे छोटे लोक (माया) रूपी सर्षप फैला देती है। अतः तुम्हारा दर्शन नहीं हो पाता। फिर भी क्षणमात्र के लिए उससे निकल कर भूतसमूह तुम में निमिषमात्र में ही प्रविष्ट हो जाता है।

**( ५४ )**

**असकृदुपरमद्भिरङ्कभेदै-**
**र्नटगणनिष्क्रमणाद्विविक्तरङ्गः।**
**अविदितमुखसन्धिरामुखान्तो**
**निगमकवेस्तव नाटकप्रबन्धः॥**

**अन्वयः** - निगमकवेः तव आमुखान्तः नाटकप्रबन्धः उपरमद्भिः अङ्कभेदैः असकृत् नटगणनिष्क्रमणात् विविक्तरङ्गः अविदितमुखसन्धिः (वर्तते) ।

**पदार्थप्रकाशिका** - असकृदिति- निगमकवेः निगमानां कवेः साक्षात्कर्तुस्तव आमुखान्तः आमुखम् अन्तो यस्य तादृशो नाटकप्रबन्धः नाट्यरचना, उपरमद्भिः अवसानं गच्छद्भिः अङ्कभेदैः, नटगणानां नटसमूहानाम् असकृत् बहुवारं निष्क्रमणात् बहिर्गमनात् विविक्तरङ्गः विविक्तः विजनो रङ्गो मञ्चः यस्य तादृशः। नटहीनमञ्च इत्यर्थः। 'विविक्तं त्रिष्वसम्पृक्ते रहः पूतविवेकिषु' इति मेदिनी। अविदितमुखसन्धिः अविदितो मुखसन्धिर्यस्य तादृशः। बीजोपक्षेपकार्यारम्भाभ्यां मुखसन्धेर्ज्ञानं भवति। संसारोऽनादिः, अतो मुखसन्धिरज्ञात एव तिष्ठति। नाटकेषु प्रस्तावनादौ दृश्यत आमुखम्। अत्र समाधिलभ्यसार्वज्ञ्यस्वरूपानुभूतिरूपा प्रस्तावनाऽऽमुखमन्ते इति एतादृशः। अत्र श्लोके परमात्मा निगमकवित्वेन रूप्यते संसारश्च तन्निर्मितनाटकप्रबन्धरूपत्वेन। नाटके आमुखमङ्का नटा मुखादिसन्धयश्च भवन्ति। तस्य निर्वहणसन्धावेव भवति समाप्तिः। शिवकृतनाट्यप्रबन्धस्तु आमुखान्त एव वर्तते। अत्र सन्ति उपरमन्तोऽङ्कभेदा इति तैरङ्कभेदैः असकृन्नटानां बहिर्गमनादयं नाटकप्रबन्धो विविक्तरङ्गश्शून्यमञ्चोऽज्ञातमुखसन्धिश्च विद्यते। अत्र मुखसन्धेरेव ज्ञानं न भवति, का कथा प्रतिमुखादिसन्धिज्ञानस्येति भावः। अत्र संसारः शिवकृतनाट्यप्रबन्धरूपेण वर्णितः। संसारनाटके प्रलये जीवरूपा नटा जगतोऽपसरन्तीति विविक्तता जायते रङ्गस्थलस्य। मुखसन्धिलक्षणं दशरूपके

यथा–

''मुखं बीजसमुत्पत्तिर्नानार्थरससम्भवा''

आमुखलक्षणं यथा–

''नटीविदूषको वापि पारिपार्श्विक एव वा।
सूत्रधारेण सहिताः संलापं यत्र कुर्वते।।
चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः।
आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा।।''

अत्र संसारनाटके तु मुखसन्धिपरिज्ञानायापेक्ष्यमाणो बीजोपक्षेपसमय एव न परिज्ञायते संसारस्यानादिप्रवाहवृत्तत्वात्, एवं समाधिपरिपाकभवसार्वज्ञ्य-स्वरूपाऽनुभूतिरूपा च प्रस्तावनाऽत्रान्त एव जायत इत्यभिप्रायः। श्रुतिरपि क्वचित् 'पश्य देवस्य काव्यम्' इत्युक्त्वा जगत् काव्यत्वेनोपदिशति।

**अनुवाद** – तुम वेदों के कवि हो। तुमने आमुख में ही अन्त होने वाले नाटक प्रबन्ध की रचना की है। इसमें अनेक बार समाप्त होने वाले विशाल अंक हैं। अतः उन अङ्कों के अन्त में अनेक बार नटसमूहों के बाहर चले जाने से इसका रंगमञ्च खाली हो जाता है और इसकी मुखसन्धि का पता नहीं चलता।

**( ५५ )**

**भ्रमयसि जगतस्त्वमेव संज्ञा-**
**परिचयसंस्कृतिरूपवेदनाभिः।**
**सदसदतदपोढवस्तुचिन्ता-**
**कृतिरिति कल्पयसे विवेकवेद्यम्।।**

**अन्वयः** – त्वमेव जगतः संज्ञापरिचयसंस्कृतिरूपवेदनाभिः भ्रमयसि इति सदसदतदपोढवस्तुचिन्ताकृतिः (त्वं) इति विवेकवेद्यं कल्पयसे।

**पदार्थप्रकाशिका**- भ्रमयसीति – त्वं शिव एव जगतः संसारस्य संज्ञापरिचयसंस्कृतिरूपवेदनाभिः, संज्ञापरिचयेन नामज्ञानेन संस्कृत्या संस्कारेण रूपस्य अर्थस्य वेदनया बोधेन च भ्रमयसि भ्रममुत्पादयसि। सदसदतदपोढ-वस्तुचिन्ताकृतिः, सदसत् कार्यकारणभावरूपं यद् अतद् अविद्या अज्ञानं वा तेन अपोढं पृथक्कृतं यद् वस्तु परमसत्ता तस्य वस्तुनः चिन्ताबोधः आकृतिः आकारो यस्य स तादृशः त्वमसि इति अस्मात् कारणात् विवेकवेद्यं कल्पयसे सृजसि। वेद्यमिति भावे ण्यत्।

**अनुवाद** – तुम ही संसार के संज्ञा परिचय, संस्कार तथा रूप की वेदनाओं (ज्ञान)से भ्रमित करते हो। तुम कार्यकारण रूप अविद्या से व्यावृत्त ज्ञानस्वरूप (वस्तु)परमसत्ता हो अतः तुम विवेक को उत्पन्न करते हो।

**( ५६ )**

**त्वममृतविषयप्रवेशभूमौ**
**भवसि दृशः पथि यस्य स द्वितीयम्।**
**जगति न परिपश्यतीति जिह्मा**
**स्मरहर! दृष्टिविषाधिका गतिस्ते।।**

**अन्वयः** – हे स्मरहर! अमृतविषयप्रवेशभूमौ यस्य दृशः पथि त्वं भवसि स जगति द्वितीयं न परिपश्यति इति दृष्टिविषाधिका जिह्मा ते गतिः (विद्यते)।

**पदार्थप्रकाशिका** – त्वमिति- हे स्मरहर! कामहर्तः! अमृतविषय-प्रवेशभूमौ अमृतविषयस्य अमृतनिधानस्थानभूतस्य मोक्षस्य प्रवेशभूमौ द्वारदेशे विद्यमानः भवान् यस्य प्राणिनः दृशः नेत्रस्य पथि मार्गे भवसि विद्यसे स प्राणी जगति संसारे द्वितीयं त्वदतिरिक्तं न परिपश्यति इति। स संसारे सर्वत्र त्वामेव पश्यति न किमप्यन्यदिति भावः। इति हेतोः दृष्टिविषात् दर्शनमात्रेणान्यस्य दाहकात् दृष्टिविषनाम्ना प्रथितात् सर्पादपि जिह्मा कुटिला तव गतिः। अस्तीति

शेषः। दृष्टिविषाधिका दृष्टौ नेत्रे विषं यस्य स दृष्टिविषः, सर्पविशेषः। ततोऽधिका आधिक्यं प्राप्ता जिह्मा कुटिला ते गतिः। दृष्टिविषः सर्पो यं पश्यति स तस्य विषेण दग्धो भवति। तं न कोऽपि पश्यति। मोक्षद्वारि स्थितं त्वां दृष्ट्वा जीवः शीघ्रमेव मुक्तिं प्राप्नोतीति दृष्टिविषाधिका शिवस्य गतिरिति भावः। सर्पपक्षे स्मरहरशब्दः स्मरणशक्तिहर्तुः सर्पस्य बोधकः। 'जिह्मस्तु कुटिलेऽलसे' इत्यमरः। काव्यमालासंस्करणे 'अमृत' इति सम्बोधनपदम्।

**अनुवाद** - हे स्मरहर! मोक्षद्वार प्रवेशभूमि में तुम जिसके दृष्टिपथ पर होते हो वह संसार में दूसरे को नहीं देखता। दृष्टिविष (सर्पविशेष) से अधिक कुटिल तुम्हारी गति है। दृष्टिविष सर्प जिसे देख लेता है, वह तत्काल दग्ध हो जाने के कारण दूसरे को नहीं देखता।

**( ५७ )**

**द्रुहिणभवनपद्मबीजमाला-**
**मणिपरिवर्तनतत्परात्मनस्ते।**
**ग्रसितुमखिलमेव जन्तुजातं**
**विजनयतो विदिता विडालवृत्तिः।।**

**अन्वयः** - द्रुहिण-भवन-पद्मबीज-मालामणि-परिवर्तन-तत्परात्मनः ते अखिलम् एव जन्तुजातं ग्रसितुं विजनयतः विडालवृत्तिः विदिता (अस्ति)।

**पदार्थप्रकाशिका** - द्रुहिणेति- द्रुहिण-भवन-पद्मबीज-मालामणि-परिवर्तन- तत्परात्मनः, द्रुहिणभवनानि ब्रह्माण्डानि एव पद्मबीजानि कमलबीजानि तेषां मालायाः स्रजः मणीनाम् अक्षानां परिवर्तने परिचालने तत्पर आत्मा यस्य स, तस्य। 'धाताब्जयोनिर्द्रुहिणो विरिञ्चिः कमलासनः' इत्यमरः। तादृशस्य ते शिवस्य अखिलं सम्पूर्णं जन्तुजातं प्राणिजातं ग्रसितुं भक्षयितुं विजनयतः समग्रमपि भुवनं जनरहितं कुर्वतस्ते विडालवृत्तिः मार्जारस्वभावः विदिता प्रसिद्धा। अस्तीति शेषः। विडालो यथा स्वशावकान्

खादति तथैव त्वमपि स्वजन्यं जगत् संहरसि एकान्तस्थानं प्राप्तुं नैकान् विष्णून् ब्रह्माणश्च जनयन् संहरसि। यथा विडालः स्वभोज्यं मूषकादि ग्रसितुं कुत्रचिन्निलीय तिष्ठति तथैव ब्रह्माण्डमालाक्षपरिवर्तन-व्याजेन तत्रैव निलीनस्य त इयं निखिलं प्राणिजातं ग्रसितुं विडालवृत्तिरस्ति। सा चेयं प्रसिद्धा। 'ओतुर्विडालो मार्जारो वृषदंशक आखुभुक्' इत्यमरः।

**अनुवाद** - तुम ब्रह्माण्डरूपी पद्मबीजों से बनी माला के दानों को फेरने में तत्पर रहते हो। इस कार्य से तुम समस्त प्राणियों को झपटने के लिए सभी भुवनों को विजन (जनरहित) करते हो। तुम्हारी यह विडालवृत्ति प्रसिद्ध है।

**( ५८ )**

**अपरिमितकृतेर्निराश्रयस्य**
**भ्रमरहितस्य निरस्तचेष्टितस्य।**
**दृषदुदरदरीषु दर्दुराणां**
**घटनपटोस्तव कीदृशं शरीरम्॥**

**अन्वयः** - अपरिमितकृतेः निराश्रयस्य भ्रमरहितस्य निरस्तचेष्टितस्य दृषदुदरदरीषु दर्दुराणां घटनपटोः तव शरीरं कीदृशम् (अस्ति) ?।

**पदार्थप्रकाशिका** - अपरिमितेति- अपरिमिता विशाला कृतिः रचना यस्य स अपरिमितकृतिस्तस्य, निराश्रयस्य आश्रयरहितस्य। शिवस्य सर्वव्यापकत्वात् तस्य निराश्रयत्वम्। भ्रमरहितस्य गतभ्रमस्य, सर्वज्ञानाधारत्वाद् भ्रमराहित्यम्। निरस्तचेष्टितस्य निरस्तानि चेष्टितानि यस्य तस्य दृषदुदरदरीषु दृषदां शिलानाम् उदरे मध्ये विद्यमाना दरी गुहा दृषदुदरदरी, तासु। 'पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषत्' इत्यमरः। 'दरी तु कन्दरो वास्त्री' इत्यमरः। दर्दुराणां भेकानां घटने निर्माणे पटुश्चतुरस्तस्य। 'दर्दुरस्तोयदे भेके वाद्यभाण्डाद्रिभेदयोः' इत्यमरः। तव शिवस्य शरीरं देहरचना कीदृशम् किम्प्रकारकम्। अस्तीति शेषः।

**अनुवाद** – तुम्हारी रचना अतिविशाल है। तुम निराश्रय हो, भ्रमरहित हो, चेष्टारहित हो, शिलाओं के मध्य विद्यमान गुफाओं में, जहाँ जीवन की कोई आशा नही होती, तुम मण्डूकों की रचना कर देते हो, ऐसे हे शिव! तुम्हारा शरीर कैसा है?।

**( ५९ )**

**भुवनभवनभासनप्रदीप!**
**न्यपतदसौ त्वयि चेतनापतङ्गी।**
**क्षणमधिकमदीप्यत ज्वलन्ती**
**पुनरजहात्प्रथमामपि स्वसत्ताम्।**

**अन्वयः** – हे भुवनभवनभासनप्रदीप! असौ चेतनापतङ्गी त्वयि न्यपतत्। क्षणम् अधिकं ज्वलन्ती अदीप्यत। पुनः प्रथमाम् अपि स्वसत्ताम् अजहात्।

**पदार्थप्रकाशिका** – भुवनेति– हे भुवनभवनभासनप्रदीप! भुवनं लोक एव भवनम्, तस्य भासने प्रदीपः, भुवनभवनभासनप्रदीपस्तत्सम्बोधने। भुवनभवनानां प्रकाशके प्रदीपे त्वयि असौ चेतनापतङ्गी चेतना बुद्धिरेव पतङ्गी सा न्यपतत्। पतनानन्तरं च क्षणम् अधिकं निमेषाधिकं कालं तस्मिन्नेव दीपे ज्वलन्ती अदीप्यत स्वशरीरदाहद्वारा प्रकाशवृद्धिमकरोत्। पुनः प्रथमां जीवद्दशायां प्राप्तां स्वसत्तां स्वस्थितिम् अजहात् अत्यजत्।

**अनुवाद** – हे भुवन रूपी भवन के प्रकाशक दीप! तुम में यह चेतना रूपी पतङ्गी गिरी, वह क्षण भर जलती हुई प्रकाशित हुई। तदनन्तर उसने अपनी पूर्व सत्ता को त्याग दिया।

**( ६० )**

**ध्रुवमियमपवर्गरात्रिसन्ध्या**
**भवति यतस्त्वयि निर्भरोऽनुरागः।**

**रुचिमय! चरमोऽयमञ्जलिस्ते**
**ननु नचिराद्भविता भवानदृश्यः।।**

**अन्वयः** - ध्रुवम् इयम् अपवर्गरात्रिसन्ध्या भवति। यतः त्वयि निर्भरः अनुरागः (अस्ति)। हे रुचिमय! अयं ते चरमः अञ्जलिः। ननु भवान् नचिराद् अदृश्यः भविता।

**पदार्थप्रकाशिका** - ध्रुवमियमिति- ध्रुवम् निश्चयेन इयम् अपवर्गरात्रिसन्ध्या अपवर्गरात्रेः मोक्षनिशायाः सन्ध्या प्रदोषकालः भवति जायते। यतः यस्मात् कारणात् त्वयि शिवे मम निर्भरः अत्यधिकस्तीव्रो च अनुरागो विद्यते। हे रुचिमय! हे कान्तिमय! मम अयं पुरो विद्यमानस्तव समक्षे पुटत्वेन संस्थापितो वा चरमोऽन्तिमः अञ्जलिः हस्तपुटं प्रणामाञ्जलिर्वा। ते तुभ्यं शिवाय। वर्तत इति शेषः। ननु न चिरात् शीघ्रं भवान् अपि अदृश्यः भविता भविष्यति। अपिना मुक्तोऽहमपीत्यर्थः। रात्रौ यथा सूर्यो न दृश्यते तथा जाते मोक्षे दृग्दृश्यसम्बन्धाभावे न परमात्मा भासत इति भावः।

**अनुवाद** - निश्चय ही यह मोक्षरात्रि की सन्ध्या हो रही है। तुम में मेरा अत्यधिक अनुराग है। हे कान्तिमय! यह चरम अञ्जलि तुम्हें समर्पित होगी। शीघ्र ही आप भी अदृश्य हो जाएँगे। मुक्त हो जाने पर मैं तो अदृश्य हो ही जाऊँगा साथ ही आप भी मेरे लिये अदृश्य हो जाएँगे। मेरे मुक्त होने पर द्रष्टा और दृश्य का भाव ही समाप्त हो जायेगा।

**( ६१ )**

**यदपि तव वशे ममेन्द्रियाणि**
**श्रुतिविषयावधिवर्तमानदृष्टेः।**
**मुखमसि जगतस्तथापि नाथ!**
**श्रुतिमुकुरेण विना न वेदितासे।**

**अन्वयः** - हे नाथ! यदपि श्रुतिविषयावधिवर्तमानदृष्टेः मम इन्द्रियाणि

तव वशे (सन्ति)। (त्वं) जगतः मुखम् असि तथापि श्रुतिमुकुरेण विना न वेदितासे।

**पदार्थप्रकाशिका** - यदपीति- हे नाथ! हे स्वामिन्! यदपि श्रुतिविषयावधिवर्तमानदृष्टेः श्रुतेः विषयाः श्रुतिविषयाः, श्रुतिविषया एव अवधिः सीमा श्रुतिविषयावधिस्तत्र वर्तमाना विद्यमाना दृष्टिर्यस्य सः, तस्य तव शिवस्य मम इन्द्रियाणि ज्ञानकर्मेन्द्रियाणि वशे सन्ति। त्वं शिवः जगतः संसारस्य मुखं वक्त्रम् असि तथापि श्रुतिमुकुरेण विना वेददर्पणेन विना न वेदितासे। वेदयतेर्लुटि। ज्ञापयितुं न शक्यस इत्यर्थः।

**अनुवाद** - हे नाथ! यद्यपि तेरी दृष्टि श्रुतिविषयों की सीमा तक है और मेरी इन्द्रियाँ तुम्हारे वश में हैं। तुम जगत् के मुख हो तथापि श्रुतिरूपी दर्पण के बिना तुम्हें नहीं जाना जा सकता।

**( ६२ )**

**मतिधनमितरे सुदीर्घनिद्रा-**<br>
**प्रवणधियस्त्वयि निक्षिपन्त्यतन्त्रे।**<br>
**उपहरणसुसञ्चितो न जातु**<br>
**व्ययमुपगच्छति चेतनानिधिस्ते।।**

**अन्वयः** - इतरे सुदीर्घनिद्राप्रवणधियः अतन्त्रे त्वयि मतिधनं निक्षिपन्ति। उपहरणसञ्चितः ते चेतनानिधिः न जातु व्ययम् उपगच्छति।

**पदार्थप्रकाशिका** - मतिधनमिति- इतरे अपरे सुदीर्घनिद्राप्रवणधियः सुदीर्घा चासौ निद्रा सुदीर्घनिद्रा, तत्र प्रवणा सुदीर्घनिद्राप्रवणा, सुदीर्घनिद्राप्रवणा धीर्येषां ते, सुदीर्घनिद्राप्रवणधियः। तादृशा इतरे जनास्त्वयि अतन्त्रे नियमरहिते। स्वतन्त्र इति यावत्। मतिधनं बुद्धिवैभवं निक्षिपन्ति अर्पयन्ति। उपहरणसञ्चितः उपहरणेन ग्रहणेन दानप्राप्त्या वा सञ्चित एकत्रीकृतस्ते चेतनानिधिः चेतनाया

ज्ञानस्य निधिः कोषः जातु कदाचिदपि न व्ययम् उपगच्छति, समाप्तिं न एतीति भावः। 'बुद्धिर्मनीषाधिषणा धीः प्रज्ञा शेमुषी मतिः। प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्ति-चेतनाः' इत्यमरः। 'निधिर्ना शेवधिः' इत्यमरः। काव्यमालासंस्करणे 'सुदीर्घनिद्राप्रणव' इति पाठः। अस्माभिस्तु 'प्रवण' इति पाठः स्वीकृतः। अमृतोदये तु 'निक्षिपन्त्यन्द्रे' इति पाठः।

**अनुवाद** - सुदीर्घनिद्रा में प्रवणबुद्धि वाले दूसरे लोग नियम रहित स्वतन्त्र तुझ शिव में अपने बुद्धिधन को समर्पित करते हैं। उन्हीं समर्पित बुद्धियों को ग्रहण करके या भेट में प्राप्त करके एकत्र किया गया तुम्हारी चेतना का खजाना कभी भी समाप्त नहीं होता।

**( ६३ )**

**क्वचिदपि विषमे त्वया वियुज्य**
**स्थितिमनवाप्य चिरस्य संसरामि।**
**भवगिरिसरिदस्मि चित्समुद्र!**
**स्वमपि जहामि तदा लभे यदि त्वाम्।।**

**अन्वयः** - क्वचित् विषमे अपि त्वया वियुज्य स्थितिम् अनवाप्य चिरात् संसरामि। हे चित्समुद्र! (अहं) भवगिरिसरित् अस्मि। यदि त्वां लभे तदा स्वम् अपि जहामि।

**पदार्थप्रकाशिका** - क्वचिदिति- क्वचित् विषमे समतारहितप्रदेशे त्वया शिवेन वियुज्य वियुक्तिं लब्ध्वा स्थितिं स्थैर्यम् अनवाप्य अप्राप्य चिरात् चिरकालात् संसरामि गच्छामि। 'क्षीणे पुण्ये मृत्युलोकं विशन्ति' इति पूर्वं पुण्यपरिपाकात् परमात्मसङ्गं समवाप्यापि पुनः पुण्यक्षीणतावशात् त्वया वियुक्तोऽभवम्। हे चित्समुद्र! चेतनाजलधे! अहं भवगिरिसरित् भव एव गिरिः पर्वतस्तस्य सरिन्नदी अस्मि। अतस्तत्र त्वया वियुक्तः सातत्येन प्रवहामि। न कदापि शान्तिं लभे। यदि त्वां चित्समुद्ररूपं शिवं लभे प्राप्नोमि तदा सपद्येव

त्वत्प्राप्त्यनन्तरं त्वद्रूपो भूत्वा स्वं निजं भवनदीस्वरूपं जहामि त्यजामि। समुद्रे गत्वा नदी अपि समुद्र एव भवति। नदीत्वेन तदनन्तरं तस्याः सत्ता न भवति। अतश्चित्समुद्ररूपं त्वां शिवमवाप्य अहमपि शिवरूप एव भवामीति भावः।

**अनुवाद** - मैं कहीं विषम स्थल में तुमसे वियुक्त हुआ हूँ। कहीं स्थिर न हो पाने के कारण चिरकाल से तुम से बिछुड़ (अनेक योनियों जन्म-मृत्यु ग्रहण) कर संसरण कर रहा हूँ। हे चित्समुद्र! मैं संसाररूपी पर्वत की नदी हूँ। यदि तुम्हें पा जाऊँ तो अपने स्वरूप को भी छोड़ दूँ।

## (६४)

**भगवति नियते विदूरयात्रा-**
**सहचरि! संसरणाध्वनोऽयमन्तः।**
**जरति! विरम निःसहासि संवि-**
**न्नगरमतः परमद्वयोपभोग्यम्।।**

**अन्वयः** - हे विदूरयात्रासहचरि! हे भगवति नियते! अयं संसरणाध्वनः अन्तः (अस्ति)। हे जरति! (त्वं) निःसहा असि, विरम। अतः अद्वयोपभोग्यं संविन्नगरम् (भवति)।

**पदार्थप्रकाशिका** - भगवतीति- हे विदूरयात्रासहचरि! विदूरयात्रायां संसारदशायां सहचरि! सङ्गिनि! हे भगवति नियते! हे भगवति भवितव्यते! वा। 'दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः' इत्यमरः। अयं पुरतो विद्यमानः, संसरणाध्वनः, संसरणस्य गमनस्य अध्वा मार्गः संसरणाध्वा, तस्य। संसारसंसरणमार्गस्येत्यर्थः। 'अयनं वर्त्म मार्गाध्वपन्थानः पदवी सृतिः। सरणिः पद्धतिः पद्या वर्तन्येकपदीति च' इत्यमरः। अन्तः नाशः। अस्तीति शेषः। एतदनन्तरं संसारमार्गस्य गतिर्नास्तीत्यर्थः। 'अन्तः स्वरूपे निकटे प्रान्ते निश्चयनाशयोः' इति हैमः। हे जरति! हे वृद्धे! भवितव्यते नियते वा, भवसंसरणाध्वनोऽन्ते नियतेर्निर्बलत्वात् जरतीति पदेन व्यपदेशः। त्वं निःसहा

असि, विरम, निवर्तस्व। अतः परं संविन्नगरम्, संविदो नगरम्, ज्ञानपुरम्। तद् अद्वयोपभोग्यम् एकाकिना एव भोग्ययोग्यम्। भवतीति शेषः। तत्र नियतेस्तव गतिर्नास्ति। भगवतः कृपया सम्प्रति भवमार्गस्य विनाशो जातः। मया मोक्षो लब्धः। नियतिस्त्वं वृद्धत्वं प्राप्तवती। अतोऽत्र विरम, संसारं गच्छ। संविन्नगरं ज्ञाननगरं, मोक्षनगरमिति यावत्। द्वाभ्यां बहुभिर्वा भोगयोग्यं न भवति। तत्र जीव एकाकी गच्छतीति भावः।

**अनुवाद** – हे संसारयात्रा की सहचरि! भगवति भवितव्यते! यह संसार में भटकाने वाले मार्ग का अन्त है। हे वृद्धे नियते! अब रुको और वापस जाओ। तुम निःसह हो। संवित् नगर (मोक्षनगर) अकेले ही भोगयोग्य होता है।

**( ६५ )**

**विलिखतु कथमक्षराणि भाले**
**स विधिरदृष्टपदार्थलेखदक्षः।**
**मम हि मिलितमक्षपादपाद–**
**प्रणिपतनेन ललाटसीम्नि चक्षुः।।**

**अन्वयः** – अदृष्टपदार्थलेखदक्षः स विधिः मम भाले अक्षराणि कथं विलिखतु। मम हि अक्षपादपादप्रणिपतनेन ललाटसीम्नि चक्षुः मिलितम्।

**पदार्थप्रकाशिका** – विलिखत्विति– अदृष्टपदार्थलेखदक्षः अदृष्टानाम् अनागतानां पश्चाद्भाविपदार्थानां लेखे निबन्धने दक्षः चतुरः स विधिः ब्रह्मा मम भाले मस्तके भालपट्टके वा अक्षराणि भाग्याक्षराणि कथं विलिखतु टीकेत। मम हि अक्षपादपादप्रणिपतनेन अक्षपादस्य गौतमस्य न्यायसूत्रकर्तुः पादयोः प्रणिपतनेन प्रणतिकरणेन ललाटसीम्नि भालावधौ चक्षुः नेत्रं मिलितं प्राप्तम्। अक्षपादस्य गौतममुनेः पदेऽक्षि आसीदिति काचन किंवदन्ती लोके प्रसृता। तामेवाश्रित्येह वदति। अक्षपादस्य पादयोः प्रणिपतनेन तस्य पादे विद्यमानमक्षि

मया लब्धम्। इदानीमहं मम भाग्यपट्टे लिखितानि भाग्याक्षराणि पठितुं शक्नोमीति भावः। स हि गौतममुनिः स्वमतदूषकस्य व्यासस्य मुखदर्शनं चक्षुषा न कर्तव्यमिति प्रतिज्ञाय पश्चाद् व्यासेन प्रसादितः पादे नेत्रं प्रकाश्य तस्य व्यासमुनेर्दर्शनं कृतवानिति पौराणिकी कथा। गौतमो नाम प्रमाण-प्रमेयादि-षोडशपदार्थज्ञानेन मोक्षप्राप्तिरिति सिद्धान्तयति। अज्ञाते भाग्याक्षरे कथं मोक्षोपलब्धिरिति तच्छास्त्रपठनेन लब्धपदार्थज्ञानस्य मम भाग्ये नूनमज्ञातपदार्थलेखदक्षो विधिः न किमपि लेखितुं शक्नोतीत्याशयः। विधिरदृष्टपदार्थलेखदक्षो भवति। स हि भाले यल्लिखति तत्कालान्तरे फलति। अहञ्च मुनेरक्षपादस्य सेवया भालचक्षुः प्राप्तवानस्मीति भालेऽदृष्टपदार्थलेखस्य अवसर एव नाऽस्ति। स्थानाभावात् स लेखितुं न पारयिष्यति। अथवा तल्लिखितमहं पठिष्यामीति भावः। यद्वा अक्षपादस्य पादयोः प्रणिपतनेन तत्प्रणीतशास्त्रस्याध्ययनेन तृतीयं ज्ञानरूपं भालचक्षुः प्राप्तवानस्मीति, विवक्षति। अमृतोदये तु-

'मिलति नयनमक्षपादपाद-
प्रणिपतनेन ललाटसीम्नि यस्य।
विधिरपि पुरुषस्य तस्य भाले
लिखितुमदृष्टलिपिं कुतः क्षमेत।।' इति पाठः।।६५।।

**अनुवाद** - अदृष्ट पदार्थों के लेखन में चतुर वह ब्रह्मा मेरे भाल पर भाग्याक्षर कैसे लिख सकेगा? अक्षपाद (गौतममुनि) के पैरों पर गिरने से मेरी ललाट सीमा में आँख प्राप्त हो गयी है।

**( ६६ )**

**उडुनि मयि रवे! प्रकाशलेशं**
**व्यवधिवशादपरीक्षितो न्यधासीः।**
**तमपहरसि सन्निकर्षमेत्य**
**त्वदुपरि तर्हि निजं वपुस्त्यजामि।।**

**अन्वयः** – हे रवे! अपरीक्षितः (त्वम्) उडुनि मयि व्यवधिवशात् प्रकाशलेशं न्यधासीः। सन्निकर्षम् एत्य तम् अपहरसि (चेत्) तर्हि (अहं) निजवपुः त्वदुपरि त्यजामि।

**पदार्थप्रकाशिका** – उडुनीति– हे रवे! हे सूर्य! अपरीक्षितः अकृतपरीक्षणः त्वम् उडुनि नक्षत्रे जीवरूपे वा मयि व्यवधिवशात् व्यवधानकारणात्, अहं त्वत्तोऽतिदूरेऽस्मीति हेतोः प्रकाशलेशं प्रकाशकणं न्यधासीः न्यपाः, पायितवानसीति भावः। 'धेट् पाने' इति धातोः लुङि, अन्तर्भावितणिचि रूपम्। धृतवानिति भावः। धातूनामनेकार्थत्वात् धारणे निक्षेपे वा धेट्। 'स्त्रियां मात्रात्रुटी पुंसि लवलेशकणाणवः' इत्यमरः। सन्निकर्षं सङ्गतिम् एत्य प्राप्य तं प्रकाशलेशम् अपहरसि दूरीकरोषि चेत् तर्हि अहं नक्षत्रं निजवपुः स्वशरीरं त्यजामि जहामि। नक्षत्रभूतोऽहं त्वत्प्रकाशेनैव प्रकाशितोऽस्मि। तव सङ्गत्या तद्दूरीभवति तर्हि मम शरीरविनाशोऽवश्यम्भावीति। यतो हि मयि तवैव प्रकाशलेशो विद्यते। नाहं स्वप्रकाशः। त्वादृशप्रकाशस्य सङ्गतावप्यसमर्थः। अथवा मयि जीवे परमात्मनः प्रकाशो वर्तत इति तव सङ्गत्या स प्रकाशस्त्वय्येव विलीनतां गमिष्यतीति त्वद्रूपताप्राप्त्यनन्तरं मम स्वत्वं स्वयं गमिष्यतीति भावः। अमृतोदये तु 'न्यधासीः इत्यत्र व्यतारीः' इति पाठः।

**अनुवाद** – हे सूर्य! अपरीक्षित होकर भी तुमने व्यवधान (अतिदूर होने) के कारण मुझ नक्षत्र में प्रकाशलेश डाला है। कभी सामीप्य पाकर अगर तुम उस प्रकाशलेश का अपहरण करोगे तो मैं अपना शरीर तुम पर छोड़ दूँगा।

**( ६७ )**

**भवपथपथिकोऽस्मि वाटपाट–**
**च्चर! मिलितोऽसि विलुण्ठ्य सम्पदो मे।**

**अहमपि भवदन्तरं प्रविश्य**
**ध्रुवमचिरेण हरामि ते विभूतीः ।।**

**अन्वयः** – हे वाटपाटच्चर! (अहं) भवपथिकः अस्मि। (त्वं च) मे सम्पदः विलुण्ठ्य मिलितः असि। अहम् अपि भवदन्तरं प्रविश्य अचिरेण ध्रुवं ते विभूतीः हरामि।

**पदार्थप्रकाशिका** – भवपथेति– हे वाटपाटच्चर! वाटस्य मार्गस्य पाटच्चर! चौर! 'चौरैकागारिकस्तेनदस्युतस्करमोषकाः। प्रतिरोधिपयस्कन्दिपाटच्चर-मलिम्लुचाः' इत्यमरः। अहं भवस्य संसारमार्गस्य पथिकोऽस्मि। त्वं च शिवो मे सम्पदः सांसारिकसम्पत्तीर्विलुण्ठ्य मिलितः प्राप्तोऽसि। अहं जीवोऽपि भवदन्तरं भवतोऽन्तरं हृदयं प्रविश्य अथवा त्वद्रूपो भूत्वा अचिरेण शीघ्रं ध्रुवं निश्चयेन ते विभूतीः सम्पद ऐश्वर्यं हरामि नयामि। दूरीकरोमीति यावत्। 'विभूतिरैश्वर्यमणिमादिकमष्टधा' इत्यमरः। भवमार्गे मिलितस्त्वं मम सांसारिकं सर्वस्वं हृतवानसि। सम्प्रति त्वदन्तरं प्रविष्टोऽहं त्वद्रूपतां गतोऽस्मीति तव विभूतयो ममापि सुखाय भविष्यन्तीति भावः।

**अनुवाद** – हे मार्ग के चौर! मैं भवपथिक हूँ। तुम मेरी सांसारिक सम्पत्तियों को लूट कर मिले हो। अब मैं भी तुम्हारे अन्दर प्रवेश करके शीघ्र ही निश्चित रूप से तुम्हारी विभूतियों का हरण करूँगा।

**( ६८ )**

**श्रुतिरसि पुरुषार्थसन्निबद्ध-**
**स्तव चरणे प्रथमे विरौमि वत्सः।**
**अमरगवि! स दोग्धि कस्य हेतो-**
**रमृतमभोक्तरि पूर्तिभाजि भाण्डे ।।**

**अन्वयः** – (त्वं) श्रुतिः असि। तव प्रथमे चरणे पुरुषार्थसन्निबद्धः वत्सः विरौमि। हे अमरगवि! स अभोक्तरि पूर्तिभाजिभाण्डे कस्य हेतोः अमृतं दोग्धि।

**पदार्थप्रकाशिका** – श्रुतिरसीति– हे शिव! त्वं शिवः श्रुतिः वेदस्वरूपोऽसि। तव वेदस्वरूपस्य शिवस्य प्रथमे आद्ये कर्मकाण्डरूपे चरणे पादे पुरुषार्थसन्निबद्धः पुरुषार्थेन धर्मादिना बद्धः अहं वत्सः वत्सरूपो जीवो विरौमि हम्बारवमुच्चारयामि। 'प्रथमस्तु भवेदादौ प्रधानेऽपि च वाच्यवत्' इति मेदिनी। हे अमरगवि! हे नित्यवाणि! स मादृशो जीवः अभोक्तरि भोक्तुरभावे पूर्तिभाजि भाण्डे पूर्तिं पूर्णतां भजत इति पूर्तिभाक् तादृशे भाण्डे पात्रे कस्य हेतोः कस्मात् कारणात् अमृतं दुग्धं वस्तुतो मोक्षं दोग्धि प्रपूरयति। वस्तुतो जीवोऽपि शिवस्वरूपत्वेन भोक्ता नास्ति। पात्रमपि शिवस्वरूपत्वेन पूर्णमेव वर्तते। यदा कश्चन भोक्ता भवति पात्रं च रिक्तं भवति तदैवाऽमृतस्य दोहनं समीचीनमिति भावः। 'अमृतं यज्ञशेषे स्यात् पीयूषे सलिले घृते। अयाचिते च मोक्षे च ना धन्वन्तरिदेवयोः' इति मेदिनी। काव्यमालासंस्करणे 'चरमे' इति पाठः। मया तु 'चरणे' इति पाठः स्वीकृतः। अमृतोदये तु–

जननि तव पुमर्था एव पादाः प्रथन्ते
प्रथमचरणबद्धो निर्भरं रौमि वत्सः।
चरमचरणमूलप्रस्नुतां स्तन्यधारा–
ममरगवि! कदा ते मुक्तबन्धः पिबेयम्।।

इति पाठः। अयमेव वस्तुतः स्वीकारयोग्यः।।६८।।

**अनुवाद** – तुम श्रुति हो। तुम्हारे प्रथम चरण में पुरुषार्थ से बँधा हुआ मैं बछड़ा हम्बारव कर रहा हूँ। हे अमरवाणि! वह (जीव) भोक्ता के अभाव और पात्र के पूर्ण होने पर अमृत का दोहन किसके लिये करे।

**( ६९ )**

**शिव! तव मम चान्तरालभूमौ**
**विविधविधां व्यवधां व्यधाद्विधाता।**
**तदपि हि पिहितोऽहमेव भित्ति-**
**र्भवति वृतिः सदनस्य नाजिरस्य।।**

**अन्वयः** - हे शिव! विधाता तव मम च अन्तरालभूमौ विविधविधां व्यवधां व्यधात्। तदपि अहमेव पिहितः। हि भित्तिः सदनस्य वृतिः भवति न अजिरस्य।

**पदार्थप्रकाशिका** - शिवेति- हे शिव! विधाता सृष्टिकर्ता ब्रह्मा, तव शिवस्य मम जीवस्य च अन्तरालभूमौ अभ्यन्तरभूमौ। 'अभ्यन्तरं त्वन्तरालम्' इत्यमरः। विविधविधां विविधप्रकारिकां व्यवधाम् अन्तर्धां व्यधात्, अकरोत्। 'अन्तर्धा व्यवधा पुंसि त्वन्तर्धिरपवारणम्। अपिधान-तिरोधान-पिधाना-च्छादनानि च' इत्यमरः। तदपि तथापि ताभिर्व्यवधाभिः अहमेव पिहितः आवृतः न भवान् शिवः। हि भित्तिः सदनस्य वृतिः आवरणं भवति न अजिरस्य प्राङ्गणस्य तव। भित्तिनाशे गृहाकाशो महाकाशेऽन्तर्भवति तथैव मायाहानौ जीवपरमात्मनोः ऐक्यं फलतीति भावः।

**अनुवाद** - हे शिव! विधाता ने तुम्हारे और मेरे बीच अनेक प्रकार के व्यवधान बना दिये हैं। फिर भी वह भित्ति मुझे ही आवृत करती है आपको नहीं। दीवार का घेरा घर को घेरता है आंगन को नहीं।

**( ७० )**

**अवधिरुपरराम भूर्विभक्ता**
**प्रभवसि गूढमतिर्न मां प्रहर्तुम्।**
**तदहमहमिकाह्वदेकशेषा-**
**वधिरधुना ध्रुवमावयोर्विमर्दः।।**

**अन्वयः** – अवधिः उपरराम। भूः विभक्ता। गूढमतिः (त्वं) मां प्रहर्तुं न प्रभवसि। तत् अधुना आवयोः अहमहमिकाहृत् एकशेषावधिः विमर्दः ध्रुवम् (अस्ति)।

**पदार्थप्रकाशिका** – अवधिरिति– अवधिः सीमा, मायेति यावत्। उपरराम विनष्टा। प्रलयकालेऽस्मिन् भूः पृथ्वी विभक्ता। गूढमतिः त्वं मां प्रहर्तुं दण्डयितुं न प्रभवसि। तत् तस्मात् कारणात् अधुना सम्प्रति आवयोः शिवगोकुलनाथयोः ब्रह्मजीवयोर्वा अहमहमिकाहृत् अहमहमिकां परस्पराहङ्कारं हरतीति अहमहमिकाहृत्। 'अहमहमिका तु सा स्यात् परस्परं यो भवत्यहङ्कारः' इत्यमरः। एकशेषावधिः एकशेषोऽवधिर्यस्य स एकशेषावधिः। आवयोः एको भवान् शिव एव यस्मिन् शेषो भविष्यति न तु जीवरूपोऽहम्। तादृशो विमर्दो मर्दनं कुट्टनं ध्रुवं निश्चितम्। अस्तीतिशेषः। प्रलयकाले जीवस्य त्वद्रूपताप्राप्तेः एक एव आवयोः शिष्यत इति भावः। अमृतोदये तु–

व्यवधिरुपरराम भूर्विविक्ता
प्रभवसि गूढगतिर्न मां प्रहर्तुम्।
तदिह भवतु तावदेकशेषा–
परविलयावधिरावयोर्विमर्दः।। इति पाठः।।७०।।

**अनुवाद** – अवधि समाप्त हो चुकी है। पृथ्वी विभक्त हो गयी है। गूढमति तुम मुझ पर प्रहार नहीं कर पा रहे। अब हम दोनों की अहमहमिका को दूर करने वाला विमर्दन होगा, जिसमें (तुझ और मुझ मे से) एक ही शेष रहेगा।

## (७१)

**न धरणिरुपरि प्रयाति नाऽधः**
**पतति न च प्लवते न बम्भ्रमीति।**

**न च दिवि वसति स्वशक्तियोगा-**
**दपि तु भवानचलास्थिरत्वहेतुः।।**

**अन्वयः** - धरणिः स्वशक्तियोगात् उपरि न प्रयाति, अधः न पतति, न प्लवते, न बम्भ्रमीति, न च दिवि वसति, अपि तु भवान् (तस्याः) अचलास्थिरत्वहेतुः (अस्ति)।

**पदार्थप्रकाशिका** - न धरणीति- धरणिः पृथ्वी स्वशक्तियोगात् स्वस्याः शक्तेर्योगात् उपरि न प्रयाति, न गच्छति, अधः अधस्तलं न पतति, न प्लवते, न तरति न बम्भ्रमीति, न अतिशयेन भ्रमति, न च दिवि आकाशे वसति निवसति इति। सा स्वशक्त्या किमपि कर्तुं न क्षमा। भवान् शिव एव अचलास्थिरत्वहेतुः अचलायाः पृथिव्याः स्थिरत्वस्य हेतुः कारणम्। पृथिव्याः स्थिरत्वस्य कारणं त्वमेवेति भावः।

**अनुवाद** - यह पृथ्वी अपनी शक्ति के कारण ऊपर नहीं जाती, नीचे नहीं गिरती, तैरती नहीं, अत्यधिक भ्रमण नहीं करती और स्वर्ग में नहीं रहती है। आप शिव ही इस अचला (पृथ्वी) के स्थिरत्व के कारण हैं।

**( ७२ )**

**अविषमचतुरस्त्रषड्विभागां**
**न सृजसि कन्दुकनिस्तलां न सूषे।**
**घटयसि पृथिवीमिमां स्वचक्र-**
**भ्रमणकुलाल! विशालदर्पणाभाम्।।**

**अन्वयः** - हे स्वचक्रभ्रमणकुलाल! इमां पृथ्वीं अविषमचतुरस्रषड्विभागां न सृजसि। कन्दुकनिस्तलां न सूषे। (त्वम् इमां) विशालदर्पणाभां घटयसि।

**पदार्थप्रकाशिका** - अविषमेति- हे स्वचक्रभ्रमणकुलाल! स्वचक्रस्य

कालचक्रस्य भ्रमणे भ्रामणे गत्युत्पादने कुलालः कुम्भकारस्तत्सम्बोधने। त्वम् इमां पृथ्वीम् अविषमचतुरस्रषड्विभागाम्, अविषमाः समाश्चतुरस्राश्च षड्विभागा यस्यास्तादृशीं न सृजसि न रचयसि। कन्दुकनिस्तलां कुन्दुक इव निस्तलां वर्तुलां न सूषे न जनयसि। त्वम् इमां धरित्रीं विशालदर्पणाभां विशालश्चासौ दर्पणः विशालदर्पणस्तद्वत् आभा यस्यास्तादृशीं घटयसि सृजसि। अमृतोदये तु 'भचक्रभ्रमणकुलाल' इति पाठः।

**अनुवाद** - हे अपने चक्र का भ्रमण करने वाले कुलाल! तुम इस पृथ्वी को समान चतुरस्रों से युक्त छः विभागों वाली नहीं बनाते। कन्दुक की तरह गोल भी नहीं बनाते। तुम इसे विशाल दर्पण के समान आभा वाली बनाते हो।

## ( ७३ )

**पुरहर! परदृष्टिदोषशान्त्यै**
**कति जगदण्डकगण्डकान्बिभर्षि।**
**त्वदुपरि परिपातयन्ति दृष्टिं**
**विजहति सर्वमकिञ्चना भवन्ति।।**

**अन्वयः** - हे पुरहर! परदृष्टिदोषशान्त्यै कति जगदण्डकगण्डकान् बिभर्षि। (सर्वे) त्वदुपरि दृष्टिं परिपातयन्ति। सर्वं विजहति (सति) अकिञ्चना भवन्ति।

**पदार्थप्रकाशिका** - पुरहरेति– हे पुरहर! परदृष्टिदोषशान्त्यै परेषां दृष्टिदोषस्य शान्त्यर्थम्। दृष्टिदोषात् मम पीडा न स्यादिति धिया कति जगदण्डकगण्डकान् ब्रह्माण्डानि बिभर्षि धारयसि। त्वं जगदण्डकगण्डकान् ब्रह्माण्डरूपगण्डकान् गोरोचनालिखितभूर्जपत्रगर्भान् परदृष्टिदोषबाधनाय बालकादीनां गले बद्ध्यमानान् वस्त्रग्रन्थिविशेषान् धारयसि तथापि सर्वे सांसारिकास्त्वदुपरि दृष्टिं परिपातयन्ति। सर्वे त्वां पश्यन्ति किन्तु त्वद्दर्शनेन सर्वस्य सांसारिकवस्तुनः परित्यागो भवति। अतस्त्वं परेषां स्वस्मिन् दोषवारणाय

नैकानि ब्रह्माण्डानि धारयसि तत्र निलीय च तिष्ठसि। सर्वं विजहति परित्यजति सति सर्वे अकिञ्चनाः, नास्ति किञ्चनो येषां तादृशा, दरिद्रा भवन्ति। अमृतोदये तु 'त्वदुपरि सहजप्रमोहदुष्टां कथमिव नाथ निपातयामि दृष्टिम्' इति पाठः।

**अनुवाद** - हे पुरहर! दूसरों के दृष्टिदोष से अपने को बचाने के लिये तुम कितने ही ब्रह्माण्डरूपी गण्डकों (बच्चों के गले में दृष्टिदोष से बचाने के लिये बाँधा जाने वाला गण्डा) को धारण करते हो। तथापि सभी तुम्हारे ऊपर दृष्टि डालते हैं किन्तु तुम्हारे दर्शन से समस्त सांसारिक भोगों के छूट जाने के कारण वे अकिञ्चन हो जाते हैं।

## (७४)

**परपुरमभिविश्य सर्वलोकं**
**भ्रमयसि सर्वदिनेषु भूतवर्गः।**
**भवपितृवनवाटबोधिवृक्ष!**
**प्रलयनिशासु निलीय सेवते त्वाम्॥**

**अन्वयः** - परपुरम् अभिविश्य सर्वदिनेषु सर्वलोकं भ्रमयसि। हे भवपितृवनवाटबोधिवृक्ष! भूतवर्गः प्रलयनिशासु निलीय त्वां सेवते।

**पदार्थप्रकाशिका** - परपुरमिति- परपुरं परेषां नगरम्। प्राणिनां हृद्देश इति यावत्। तथा चोक्तं श्रीमद्भगवद्गीतायाम्-

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया॥१८.६१॥

अभिविश्य प्रविश्य सर्वदिनेषु सर्वेषु दिवसेषु सर्वलोकं भ्रमयसि भ्रमयुक्तं भ्रमणशीलं वा करोषि। भवपितृवनवाटबोधिवृक्ष! संसाराख्यपितृवनस्य श्मशानभूमेः वाटस्य मार्गस्य बोधिवृक्ष! अश्वत्थवृक्ष! 'बोधिद्रुमश्चलदलः पिप्पलः कुञ्जराशनः। अश्वत्थे' इत्यमरः। 'श्मशानं स्यात् पितृवनम्' इत्यमरः। 'वाटः

पथश्च मार्गश्च' इति त्रिकाण्डशेषः। भूतवर्गः भूतानां समूहः प्रलयनिशासु प्रलयरात्रिषु निलीय निलीनो भूत्वा। परमाणुरूपेणेति यावत्। त्वां सेवते भजते। यद्वा नानायोनिषु भ्रमञ्जीवोऽन्ते त्वय्येव विश्राम्यति।

**अनुवाद** - तुम दूसरे के नगर में (प्राणियों के हृदय में) घुस कर प्रत्येक दिन सभी लोकों को भ्रमित करते हो या भ्रमणशील बनाते हो। हे संसार रूपी श्मशान मार्ग के पीपलवृक्ष! प्रलयरात्रि में भूतवर्ग तुम्हारे आश्रित होकर तुम्हारी सेवा करता है।

**( ७५ )**

**ग्रहगृहसरसीरुहस्य राहु-**
**भ्रमरविमर्दसहार्ककर्णिकस्य।**
**भ्रमणमिदमभिव्यनक्ति लीलां**
**तव घटितां ध्रुवनालघट्टनाय।।**

**अन्वयः** - राहुभ्रमरविमर्दसहार्ककर्णिकस्य ग्रहगृहसरसीरुहस्य इदं भ्रमणं ध्रुवनालघट्टनाय घटितां तव लीलाम् अभिव्यनक्ति।

**पदार्थप्रकाशिका** - ग्रहगृहेति- ग्रहगृहसरसीरुहस्य ग्रहाणां नक्षत्राणां गृहं ग्रहगृहम्, ग्रहगृहस्य सरसीरुहः कमलम्, तस्य। 'सहस्रपत्रं कमलं शतपत्रं कुशेशयम्। पङ्केरुहं तामरसं सारसं सरसीरुहम्' इत्यमरः। राहुभ्रमरविमर्दसहार्ककर्णिकस्य राहुरेव भ्रमरः राहुभ्रमरः, तस्य विमर्दं पीडां सहते इति राहुभ्रमरविमर्दसहा, अर्क एव कर्णिका पद्मबीजकोशी अर्ककर्णिका, राहुभ्रमरविमर्दसहा अर्ककर्णिका यस्य स, तस्य राहुरूपद्विरेफपीडासहः सूर्यरूपः यः पद्मबीजकोशस्तस्य। इदं जगत्प्रसिद्धं यद् भ्रमणं पृथिवीपरिक्रमणं विद्यते तद् ध्रुवनालघट्टनाय, ध्रुवोऽवधिः। ध्रुवरूपस्य नालस्य काण्डस्य घट्टनाय मेलनाय घटितां जायमानां तव शिवस्य लीलां विलासक्रियामभिव्यनक्ति प्रकटयति। 'लीला विलासक्रिययोः' इत्यमरः। ग्रहगणस्य पृथ्वीमण्डलमभितो भ्रमणं

तदवधिकाण्डेन योगाय जायमानां तव लीलामभिव्यनक्तीत्यर्थः। 'कर्णिका कर्णभूषणे। करिहस्ताङ्गुलौ पद्मबीजकोश्याम्' इत्यमरः। अमृतोदये तु 'नियतिपवनवेगघट्टितानि त्वयि करुणाकमलाकरे भ्रमन्ति' इति पाठः।

**अनुवाद** – राहुरूप भ्रमर की पीड़ा को सहने वाले सूर्यरूप पद्मबीजकोशी (कमल के अन्दर विद्यमान बीजकोश) से युक्त ग्रहरूप कमल का यह प्रसिद्ध भ्रमण उसके ध्रुवरूप नाल से उसे मिलाने के लिए घटित तेरी लीला को अभिव्यक्त करता है।

**( ७६ )**

**सकलगुणगणो ममोर्णनाभे-**
**विलयमुपैति वितायते च भूयः।**
**पटुजनजडतापहारहेतो!**
**क्षणमपि न क्षमसे क्षयं गुणानाम्।।**

**अन्वयः** – मम उर्णनाभेः सकलगुणगणः विलयम् उपैति भूयः वितायते च। हे पटुजनजडतापहारहेतो! गुणानां क्षयं क्षणम् अपि न क्षमसे।

**पदार्थप्रकाशिका** – सकलगुणेति– मम मदीयः उर्णनाभेः लूतायाः। 'लूता स्त्री तन्तुवायोर्णनाभमर्कटकाः समाः' इत्यमरः। सकलगुणगणः सकलानां गुणानां तन्तूनां गणः समूहः विलयं विनाशम् उपैति प्राप्नोति। भूयः पुनः वितायते विस्तीर्यते च। पटुजनजडतापहारहेतो! पटुजनानां विज्ञानां जडताया मूर्खताया अपहारहेतो अपहरणकारणगुणानां क्षयं विनाशं क्षणं निमिषमपि न सहसे न सोढुं शक्नोषि। काव्यमालासंस्करणे 'हेतोः' इति पाठः। अमृतोदये तु–

'सपदि गुणगणोऽयमूर्णनाभे–
विलयमुपैति वितायते च भूयः।
जनजडिमभिदा पटुः पटस्तु
क्षणमपि न क्षमते क्षयं गुणानाम्' इति पाठः।।७६।।

**अनुवाद** - मुझ उर्णनाभि (मकड़ी) के समस्त गुण समूह विलय को प्राप्त होते हैं और पुन: विस्तार प्राप्त करते हैं। विज्ञजनों की मूर्खता के अपहारक हेतु (शिव) गुणों का विनाश तुम क्षण भर भी नहीं सह पाते।

**( ७७ )**

**न खलु विघटिता: पुनर्घटन्ते**
**न च घटिता: स्थिरसङ्गतां श्रयन्ते।**
**पिपतिषुमवशं रुजन्ति वंश्या-**
**स्तटतरुमाप इवापगागणस्य।।**

**अन्वय:** - न खलु विघटिता: पुन: घटन्ते। न च घटिता: स्थिरसङ्गतां श्रयन्ते। वंश्या: अवशं पिपतिषुं तटतरुम् आपगागणस्य आप: इव रुजन्ति।

**पदार्थप्रकाशिका:** - न खल्विति- न खलु विघटिता: विनष्टा: पुन: घटन्ते। न च घटिता: सृष्टा पदार्था: स्थिरसङ्गतां विनाशराहित्यं श्रयन्ते। तेऽपि विनाशं लभन्त एव। वंश्या: वंशे भवा जना अवशं निर्बलं पिपतिषुं पतनेच्छुं तटतरुम् आपगागणस्य नदीसमूहस्य आप: जलानीव रुजन्ति पीडयन्ति। यथा पतनशीलं तटस्थितं वृक्षं नदीजलानि पीडयन्ति तथा वंशे भवा: पुत्रपौत्रादयोऽवशं निर्बलं जनं पीडयन्तीत्यभिप्राय:।

**अनुवाद** - विनष्ट पदार्थों को पुन: नहीं रचा जाता। रचे हुए पदार्थ भी स्थिर नहीं होते। निर्बल को उसके वंशजन पतनशील तटतरु को नदीसमूह के जल की भाँति पीडित करते हैं।

**( ७८ )**

**विगतविपरिलोपदृष्टि पश्यन्**
**वशयसि यां पुरुषप्रकाण्ड! मायाम्।**

**प्रकृतिचपलया तया विकारै-**
**र्बहुविधवर्णिकया वशीकृतोऽस्मि।।**

**अन्वयः** - हे पुरुषप्रकाण्ड! विगतविपरिलोपदृष्टि पश्यन् यां मायां वशयसि, प्रकृतिचपलया बहुविधवर्णिकया तया वशीकृतः अस्मि।

**पदार्थप्रकाशिका** - विगतेति- हे पुरुषप्रकाण्ड! पुरुषेषु प्रकाण्डम् श्रेष्ठस्तत्सम्बोधने। विगतविपरिलोपदृष्टि विगतो विपरिलोपो यस्याः सा विगतविपरिलोपा, तादृशी दृष्टिर्यस्मिन् तद्यथा स्यात्तथा, नित्यप्रबुद्धदृष्ट्येत्यर्थः। पश्यन् यां मायाम् अविद्यां वशयसि वशीकरोषि, प्रकृतिचपलया स्वभावचञ्चलया, बहुविधवर्णिकया अनेकप्रकारकैर्वर्णैर्विभूषितया विविधवेषधारिण्या नट्या तया मायया वशीकृतोऽस्मि। तया स्वमायापाशे निगडितोऽस्मि।

**अनुवाद** - हे पुरुषश्रेष्ठ! नित्यप्रबुद्ध दृष्टि से देखते हुए तुम जिस माया को वश में करते हो, उस स्वभाव-चंचल और अनेक प्रकार के वर्णों या वेषों से युक्त माया नटी द्वारा मैं वशीकृत किया गया हूँ।

**( ७९ )**

**प्रकृतिचपलपीलुबीजवर्गे**
**दलति खगोलकुशूलविप्रकीर्णम्।**
**अघटितमितरेतरेण कल्प-**
**क्षयरजनौ समचीकलस्त्वमेकः।।**

**अन्वयः** - एकः त्वं कल्पक्षयरजनौ प्रकृतिचपलपीलुबीजवर्गे दलति (सति) इतरेतरेण अघटितं खगोलकुशूलविप्रकीर्णं समचीकलः।

**पदार्थप्रकाशिका** - प्रकृतिचपलेति- एकः त्वं शिवः कल्पक्षयरजनौ प्रलयरात्रौ प्रकृतिचपलपीलुबीजवर्गे प्रकृत्या स्वभावेन चपलाश्चञ्चला पीलवः

परमाणव एव बीजानि। पृथिव्यादिभूतपरमाणव इत्यर्थः। तेषां वर्गः समूहस्तस्मिन्। स्वभावेन चपलानां गतिशीलानां परमाणुरूपाणां बीजानां समूहे दलति सति विनश्यति सति, इतरेतरेण अन्योन्येन अघटितं असङ्गतं, पृथक् पृथक् एकैकशो वेति यावत्। खगोलकुशूलविप्रकीर्णम्, खगोलरूपे आकाशमण्डलरूपे कुशूले पात्रविशेषे विप्रकीर्णं व्याप्तं प्रसृतं विकीर्णं वा। क्रियाविशेषणमिदम्। समचीकलः सङ्कलनमकार्षीः। कल संख्यान इति धातोः णिचि लुङि रूपम्। अमृतोदये तु–

'प्रकृतिचपलपीलुबीजवर्गं
दलितखगोलकुसूलविप्रकीर्णम्।
अघटितमितरेतरेण कल्प–
प्रशमदिने समचीकलस्त्वमेकः।।' इति पाठः।।७९।।

**अनुवाद** – तुमने अकेले ही प्रलय की रात में प्रकृति से चंचल परमाणु रूप बीजों के समूह के छिन्न भिन्न हो जाने पर, अपने गोलरूपी पात्र में बिखरे हुए परमाणुओं को एक एक करके संकलित किया।

(८०)

**स्वपुटपटलमभ्यजीर्यदाशा**
**वृतिरदलन्निरवाद्रविप्रदीपः।**
**प्रलयमवनिवास्त्वगात्तथापि**
**क्व जगदगारगृहस्थ! निश्यवात्सीः।।**

**अन्वयः** – हे जगदगारगृहस्थ! स्वपुटपटलम् अभ्यजीर्यत्, आशावृतिः अदलत्, रविप्रदीपः निरवात्, अवनिवास्तु प्रलयम् अगात् तथापि (त्वं) निशि क्व अवात्सीः?

**पदार्थप्रकाशिका** – स्वपुटेति– हे जगदगारगृहस्थ! जगदेव अगारं गृहम्,

तस्मिन् तिष्ठतीति जगदगारगृहस्थस्तत्सम्बोधने। 'निशान्तं सदनं वस्त्यमगारं मन्दिरं पुरम्' इति वाचस्पतिः। स्वपुटपटलम् अभ्यजीर्यत् आशावृतिः, स्वस्य निजस्य पुटपटलं सम्पुटसमूहः अभ्यजीर्यत् जीर्णमभवत्। आशावृतिः दिग्रूपा भित्तिः अदलत्, विदीर्णा अभवत्। रविप्रदीपः रविरूपो जगतां प्रदीपः निरवात् प्रकाशरहितोऽभवत्। अवनिवास्तु पृथ्वीभवनं प्रलयं विनाशम् अगात्। तथापि निशि प्रलयरात्रौ त्वं कुत्र अवात्सीः निवासं कृतवानभूः।

**अनुवाद** – हे जगत् रूपी घर के गृहस्थ! तेरा पुटपटल जीर्ण हुआ। दिशाओं की दीवार नष्ट हो गयी, सूर्यदीप बुझ गया, पृथ्वीभवन प्रलय को प्राप्त हो गया, फिर भी इस प्रलयरात्रि में तुम कहाँ रहे।

## ( ८१ )

**प्रसरति विषयेषु येषु रागः**
**परिणमते विरतेषु तेषु शोकः।**
**त्वयि रुचिरुचिता नितान्तकान्ते**
**गुणपरिपाकशुचामगोचरोऽसि।।**

**अन्वयः** – येषु विषयेषु रागः प्रसरति तेषु विरतेषु शोकः परिणमते। नितान्तकान्ते त्वयि रुचिः उचिता। (त्वं) गुणपरिपाकशुचाम् अगोचरः असि।

**पदार्थप्रकाशिका** – प्रसरतीति– संसारे येषु विषयेषु सांसारिकभोगेषु रागोऽनुरागः प्रसरति वर्धते तेषु विरतेषु विनष्टेषु शोकः परिणमते जायते। नितान्तकान्ते नित्यसुन्दरे। कमु कान्ताविति धातोः क्तः। 'सुन्दरं रुचिरं चारु सुषमं साधु शोभनम्। कान्तं मनोरमं रुच्यं मनोज्ञं मञ्जु मञ्जुलम्' इत्यमरः। त्वयि शिवे रुचिः प्रीतिरभिलाषो वोचिता, औचित्यं भजत इति भावः। 'रुचिः स्त्री दीप्तिशोभायामभिष्वङ्गाभिलाषयोः' इति मेदिनी। त्वं शिवः गुणपरिपाकशुचाम्, गुणानां परिपाकाः परिणामाः याः शुचः शोकाः तेषाम्। अगोचरः असि। गोचरो दृष्टिविषयो न भवसि। त्वयि न गुणपरिणामाः शोकाः

इति भाव:। सांसारिकपदार्थेषु प्रीति: दु:खं जनयति। त्वं नितान्तकान्तोऽसीति त्वय्येवाभिलाष उचित:। त्वयि ये प्रीतिं भजन्ते तेषां त्वं सर्वथा गोचरो भवसीत्यर्थ:। अमृतोदये तु 'रुचिपरिपाकशुचाम्' इति पाठ:।

**अनुवाद** – लोक में जिन विषयों में अनुराग वृद्धि प्राप्त करता है उन विषयों के नष्ट हो जाने पर शोक होता है। नितान्तमनोहर तुझ शिव में ही अभिलाष रखना उचित है। तुम गुणजन्य शोकों के अगोचर ही रहते हो।

**( ८२ )**

**प्रतिगृहमतिथिर्गृहीतदण्डो**
**धृतजगदण्डकमण्डलुप्रकाण्ड:।**
**भुवनवहन! पात्रमात्रशेषं**
**सतृणमिदं जगदत्ति कालभिक्षु:।।**

**अन्वय:** – हे भुवनवहन! गृहीतदण्ड: धृतजगदण्डकमण्डलुप्रकाण्ड: कालभिक्षु: अतिथि: पात्रमात्रशेषम् इदं जगत् सतृणम् अत्ति।

**पदार्थप्रकाशिका** – प्रतिगृहमिति– हे भुवनवहन! भुवनवाहन! भुवनस्य संसारस्य वहनकर्त:! गृहीतदण्ड: गृहीतो दण्डोऽनेन तादृश:, धृतजगदण्ड–कमण्डलुप्रकाण्ड: कमण्डलुश्चासौ प्रकाण्डं श्रेष्ठश्चेति कमण्डलुप्रकाण्डम्, जगदण्डमेव कमण्डलुप्रकाण्डमिति जगदण्डमण्डलुप्रकाण्डम्, धृतं जगदण्ड–कमण्डलुप्रकाण्डं येन स: धृतजगदण्डकमण्डलुप्रकाण्ड:, कालभिक्षु: काल एव भिक्षु: संन्यासी कालभिक्षु: अतिथि: पात्रमात्रशेषं पात्रमात्रोपयुक्तम् इदं सर्वं जगत् सतृणं तृणमप्यपरित्यज्य सम्पूर्णम् अत्ति खादति। कालभिक्षुमुखात्र किमप्यवशिष्यत इति भाव:। अमृतोदये तु 'भुवनभरणपात्रमात्रशेषं मसृणमिदम्' इति पाठ:।

**अनुवाद** – हे भुवनवहन! दण्डधारी, ब्रह्माण्डरूपी श्रेष्ठ कमण्डलु को

धारण करने वाला, कालभिक्षु अतिथि पात्रमात्र में आने वाले इस जगत् को बिना कुछ छोड़े खा रहा है।

**( ८३ )**

**प्रसभनिविशमानकालसर्प-**
**प्रतिहतनिर्गमने स्वगोलनीडे।**
**बहुविधगतयो विविक्तजाया-**
**सुतजननीतनवः खगा भ्रमन्ति।।**

**अन्वयः** - प्रसभनिविशमानकालसर्पप्रतिहतनिर्गमने स्वगोलनीडे बहुविधगतयः विविक्तजायासुतजननीतनवः खगाः भ्रमन्ति।

**पदार्थप्रकाशिका** - प्रसभेति- प्रसभनिविशमानकालसर्पप्रतिहतनिर्गमने, प्रसभं बलात् निविशमानेन प्रविशताऽनेन कालसर्पेण प्रतिहतम् अवरुद्धं निर्गमनं बहिर्गमनं यस्मात् तत् प्रसभनिविशमानकालसर्पनिर्गमनम्, तस्मिन्। 'प्रसभं तु बलात्कारो हठ' इत्यमरः। स्वगोलनीडे, गोलः ब्रह्माण्डमण्डलम्। स्वगोल एव नीडं कुलायस्तस्मिन्। 'कुलायो नीडमस्त्रियाम्' इत्यमरः। बहुविधगतयः बहुविधा अनेकप्रकारा वार्षिकमासिकपाक्षिकादिगतिर्येषां ते बहुविधगतयः। भयाद् रक्षार्थमितस्ततो भ्रमणशीला उड्डयमाना वा। विविक्तजायासुतजननीतनवः जाया च सुतश्च जननी च तनुश्चेति जायासुतजननीतनवः, विविक्ताः पृथग्भूताः जायासुतजननीतनवः येषां तादृशा खगाः पक्षिणः नक्षत्राणि वा भ्रमन्ति, भ्रमणं कुर्वन्ति। 'तनुः काये त्वचि स्त्री स्यात् त्रिष्वल्पे विरले कृशे' इति हैमः। 'विविक्तं त्रिष्वसम्पृक्ते रहःपूतविवेकिषु' इति मेदिनी। बलात् नीडे प्रविष्टं कालसर्पं दृष्ट्वा खगा इतस्ततः पलायन्त इत्यर्थः। अत्र जाया सुतः जननी तनुश्च इति परिगणितम्। जाया स्त्री, चन्द्रस्य नक्षत्ररूपाः स्त्रियः कालसर्पस्य प्रवेशात् क्वचिदन्यत्र वियुक्ताः। केषाञ्चित् खगानां पुत्राः वियुक्ताः। यथा सूर्यस्य सुतः शनिः, चन्द्रस्य च बुधः उभावपि वियुक्तौ। कस्यचिन्नक्षत्रस्य माता वियुक्ता।

यथा मङ्गलस्य माता पृथ्वी ततो वियुक्ता। कस्यचित्तनुः शरीरं वियुक्तम्। यथा राहुकेत्वोः अन्योन्यतनू वियुक्ते जाते एवं कालसर्परूपो मृत्युः प्रलयकालावरुद्धे खगोले नक्षत्राणि पीडयतीत्यर्थः।

**अनुवाद** - (प्रलय काल में) पक्षियों (नक्षत्रों) के घर में कालसर्प बलात् घुस गया है। उसने उन पक्षियों के मार्ग को रोक दिया है। अपने ब्रह्माण्ड मण्डल रूप घोसले में अनेक प्रकार की गतियों से युक्त पक्षी (नक्षत्र) उड़ रहे हैं। उनके पत्नी (चन्द्र की नक्षत्र रूप पत्नियाँ), पुत्र (सूर्य का पुत्र शनि तथा चन्द्र का पुत्र बुध), माता (मङ्गल की माता पृथ्वी) तथा शरीर (राहु और केतु का शरीर) उनसे दूर हो गये हैं।

**(८४)**

**अभिलषितमथानुचिन्तितं यो**
**हृदयगुहाशयितः शृणोत्यकर्णः।**
**तमिममवचनं च वाग्मिनं च**
**प्रभवति मन्त्रयितुं त्रयी भुजङ्गम्।।**

**अन्वयः** - हृदयगुहाशयितः अकर्णः यः अभिलषितम् अथ अनुचिन्तितं च शृणोति। त्रयी वाग्मिनम् अवचनं च तम् इमम् भुजङ्गं मन्त्रयितुं प्रभवति।

**पदार्थप्रकाशिका** - अभिलषितमिति- हृदयगुहाशयितः, हृदयमेव गुहा तत्र शयितः सुप्तः, हृदयगह्वरे सुप्तः कृतशयनो वेत्यर्थः। अकर्णः कर्णरहितो यः अभिलषितं मनश्चिन्तितम् अथ च अनुचिन्तितं मनसि विचारितं च शृणोति श्रवणविषयं करोति। हृदयस्थितो योऽसौ परमात्मा सः अभिलषितं विचारितं वा सर्वमपि अकर्णः सन् शृणोति। परमात्मा अचक्षुः सन् पश्यति अकर्णः संश्च शृणोति। तथा च श्रुतिः 'पश्यत्यचक्षुः स शृणोत्यकर्णः'। तादृशः सः भुजङ्गः परमात्मा त्रय्या एव बोधयितुं शक्यते। अवचनं मौनं वाग्मिनं वाक्चतुरं, तमिमं हृदये सुप्तं परमात्मानं वेदवाक्येनैव अनुकूलयितुं शक्यत इत्यर्थः। अथवा

भुजङ्गः सर्पः सोऽपि त्रय्या मन्त्रेण अनुकूलयितुं शक्यो भवति।

**अनुवाद** – वह परमात्मा कानरहित है तथा हृदयगुहा में सोया हुआ है। वह मन में विचारे गये तथा मन में सोचे गये विषय को सुनता है, उस मौन और वाक्चतुर भुजंग (परमात्मा या सर्प) को समझाने में (उसका बोध कराने में) त्रयी (वेद या मंत्र) समर्थ होती है।

**(८५)**

**परिपिबति पयो भवाध्वनीन-**
**स्तनयकराज्जननीपयोधराच्च।**
**व्यपगतमधुना तदाशयाऽपि**
**प्रसभवशादयमाशयः शुशोष॥**

**अन्वयः** – भवाध्वनीनः जननीपयोधरात् तनयकरात् च पयः परिपिबति। अयम् आशयः व्यपगतमधुना तदाशया अपि प्रसभवशात् शुशोष।

**पदार्थप्रकाशिका** – परिपिबतीति- भवाध्वनीनः कर्मवशात् भवस्य संसारस्य अध्वनीनः पान्थः प्रथमं जननीपयोधरात् जनन्याः मातुः पयोधरात् स्तनात्, अनन्तरं च तनयकरात् पुत्रस्य हस्तात् पयः दुग्धं जलं वा परिपिबति। अयम् आशयः चेतः। आशयश्चेत इति शब्दकल्पद्रुमः। व्यपगतमधुना व्यपगतं नष्टं मधु यस्य तद् व्यपगतमधु तेन व्यपगतमधुना कर्मपरिपाकरहितेन तदाशया तस्य नानायोनिषु भ्रमणकाले पीतस्य पयस आशया तृष्णया। आशा तृष्णेति शब्दकल्पद्रुमः। प्रसभवशात् बलात् करणात् अयमाशयः कर्मगणजलाशयः शुशोष शोषितो बभूव।

**अनुवाद** – यह चित्त संसारपथ का राही है। यह माता के स्तन और पुत्र के हाँथ से पय (दूध और जल) पीता है। कर्मसंचय नष्ट हो जाने के कारण जिसका आस्वाद समाप्त हो गया है, ऐसे पय (दूध या जल) की आशा में यह आशय (कर्मसञ्चय रूप जलाशय) सूख गया।

**( ८६ )**

**स्तनकलशमुखेन वा जनन्या-**
**स्तनयकराङ्गुलिमध्यकुल्यया च।**
**चपल! पिब पयांसि यावदायु-**
**र्भवति न चेतसि चेतनासमुद्रः।।**

**अन्वयः** - हे चपल! जनन्याः स्तनकलशमुखेन तनयकराङ्गुलि-मध्यकुल्यया च यावदायुः पयांसि पिब। चेतसि चेतनासमुद्रः न भवति।

**पदार्थप्रकाशिका** - स्तनेति- हे चपल! हे चञ्चल! कलशमुखेन पयोधरघटवक्त्रेण तनयकराङ्गुलिमध्यकुल्यया तनयस्य पुत्रस्य कराङ्गुलीनां मध्यकुल्यया मध्यवर्तिन्या अञ्जलिकृतनद्या यावदायुः आजीवनं पयः दुग्धं जलं वा पिब, पानं कुरु। यावत् चेतसि मनसि चेतनासमुद्रः, चेतना एव समुद्रः न भवति। येषां कर्मणां फलरूपेण त्वं शैशवे मातुः स्तनात् दुग्धं तथा च मृत्योः अनन्तरं पुत्रस्य कराङ्गुल्योः मध्यवर्तिन्या कुल्यया जलं पीतवानसि, मृत्योरनन्तरं तर्पणं प्राप्तवानसि। तत् यावत् जीवनं वर्तते तावत् पिब सम्प्रति कर्मक्षयकारणात् स चेतनासमुद्रः शुष्कः सञ्जातः। अनन्तरं प्राप्ते मोक्षे तस्य पानं न भविष्यतीत्यर्थः।

**अनुवाद** - हे चंचल! (कर्मफलों के कारण) जननी के स्तनकलश के मुख से अथवा पुत्र के करांगुलियों से बनी मध्य कुल्या से आजीवन दूध या जल पियो। (कर्मक्षय हो जाने के बाद) मन में विद्यमान यह चेतनासमुद्र नहीं रहेगा, सूख जायेगा।

**( ८७ )**

**विधिवशमिलितो भवाध्वयात्रां**
**हरसि जगत्तिलपेषतैलिकोऽसि।**
**न तव पशुपते! विदन्ति पाशं**
**पिहितदृशः पशवः परिभ्रमन्ति।।८७।।**

**अन्वयः** – विधिवशमिलितः भवाध्वयात्रां हरसि। (त्वं) जगत्तिलपेषतैलिकः असि। हे पशुपते! पिहितदृशः पशवःपरिभ्रमन्ति (किन्तु) तव पाशं न विदन्ति।

**पदार्थप्रकाशिका** – विधिवशेति– विधिवशमिलितः भाग्यवशात् संयोगाद् वा प्राप्तः त्वं भवाध्वयात्रां भवस्य संसारस्य अध्वयात्रां मार्गगमनं हरसि दूरीकरोषि। त्वं जगत्तिलपेषतैलिकः जगद्रूपाणि यानि तिलानि तेषां पेषणतैलिकः असि वर्तसे। यथा संयोगात् मार्गे मिलितस्तैलिकः जनानामध्वयात्रां हरति। तद्दर्शनमशुभं मत्वा जना गमनात् विरमन्ति तथैव त्वमपि संसारयात्रां हरसीति भावः। हे पशुपते! पिहितदृशः पिहितानि दृशो येषां ते पिहितदृशः, तादृशाः पशवः जीवाः तव शिवस्य पाशं जालं न विदन्ति। ते तु तव लीलया केवलं भ्रमन्ति। यथा तैलिकः वृषभस्य अक्षिणि पटं बद्ध्वा तमहर्निशमेकस्मिन्नेव स्थले भ्रामयति। स च वृषभस्तद्बन्धनं न जानाति। तद्वत्तव लीलया पिहितदृशः प्राणिनः भवे भ्रमन्ति। ते लीलापाशं न जानन्ति। यथा तैलिकपाशेन एकस्मिन्नेव लघुस्थले भ्रमन् तैलिकवृषभोऽन्यत्र गन्तुं न शक्नोति तथैव त्वन्मायामोहिताः नानायोनिषु भ्रमन्तः प्राणिनोऽपीति भावः।

**अनुवाद** – संयोग से राह में मिल जाने पर तुम संसार की यात्रा को दूर कर देते हो। तुम संसार रूपी तिल को पेरने वाले तेली हो। (जैसे मार्ग में तेली को देखकर लोग अपशकुन मानते हुए अपनी यात्रा स्वयं रोक देते हैं वैसे संसार की यात्रा में राह में मिलकर तुम उस यात्रा को समाप्त कर देते हो।) हे पशुपते! (माया द्वारा) जिनकी आँख बन्द कर दी गयी है, ऐसे पशु (प्राणी) तेरे पाश को नहीं जानते। केवल नाना योनियों में घूमते हैं।

## (८८)

**मयि फलकधिया त्वया कियत्यः**
**प्रतिकृतयो लिखितास्तथा विलुप्ताः।**

**विरम बत निसर्गनिर्मलस्य**
**प्रमृज रजो मम पश्य दर्पणोऽस्मि।।**

**अन्वयः** - त्वया फलकधिया मयि कियत्यः प्रतिकृतयः लिखिताः तथा विलुप्ताः। बत विरम। निसर्गनिर्मलस्य मम रजः प्रमृज। पश्य, अहं दर्पणः अस्मि।

**पदार्थप्रकाशिका** - मयीति- त्वया शिवेन फलकधिया फलकस्य चित्रलेखपटस्य बुद्ध्या। अहम् आत्मा फलकः चित्रलेखनपट्टः अस्मीति धिया बुद्ध्या कियत्यः बहव्यः प्रतिकृतयः शरीरप्रतिरूपाणि चित्राणि लिखिताः उट्टङ्किताः। आत्मानं मां चित्रफलकं मत्वा मयि बहूनि चित्राणि लिखितान्यभवन्। तेनैव मम तत्तद्योनौ जनिर्मरणं चाभवदिति स्मारयति। तासु काश्चन विलुप्ताः नष्टास्तेषां स्मृतिरेव नास्ति। पूर्वपूर्वयोनिस्मरणस्य पश्चादसम्भवात्। बत खेदे। सम्प्रति चित्रलेखनात् विरम। निसर्गनिर्मलस्य स्वभावेन पवित्रस्य मम रजो दोषान् प्रमृज दूरीकुरु। मां पश्य। अहं दर्पणः अस्मि। सर्वविधदोषरहितत्वात् अहमात्मा दर्पण इव निर्मलोऽस्मीति त्वं मयि तव प्रतिच्छविं द्रष्टुं शक्नोषीति भावः। अमृतोदये तु तृतीयचरणे 'रजसि विगलिते विभूतियोगात्' इति पाठः।

**अनुवाद** - तुमने फलक (चित्रफलक) समझ कर मुझ में कितनी ही प्रतिकृतियों को लिख दिया। उनमें से बहुत विलुप्त हो गयी। अब रुको। मुझ निसर्गनिर्मल आत्मा की धूल को साफ करके देखो, मैं दर्पण हूँ (तुम्हे अपना प्रतिबिम्ब दिखाई पड़ेगा)।

**( ८९ )**

**क्षितिबिलपतितं जरायुपेशी-**
**स्थगितमथाण्डसमुद्गके निगूढम्।**
**अविवृतमपि धातुसञ्चयं ते**
**भव! भवता हृतविग्रहो हरामि।।**

**अन्वयः** – हे भव! भवता हृतविग्रहः क्षितिबिलपतितं जरायुपेशीस्थगितम् अथ अण्डसमुद्गके निगूढम् अविवृतम् अपि ते धातुसञ्चयं हरामि।

**पदार्थप्रकाशिका** – क्षितिबिलेति– हे भव! हे शिव! भवता हृतविग्रहः हृतः दूरीकृतः विग्रहः शरीरं मूर्तिर्वा यस्य स तादृशोऽहं क्षितिबिलपतितं क्षितिः पृथ्वी एव बिलं रन्ध्रस्तत्र पतितम्। 'बिलं रन्ध्रे गुहायां च' इति हैमः। जरायुपेशीस्थगितम्, जरायोः गर्भाशयस्य पेश्यां स्थगितम् आच्छादितम्। 'पेशी कोषोद्विहीनेऽण्डम्' इत्यमरः। अथ च अण्डसमुद्गके अण्डमेव समुद्गकं 'सन्दूक दोना वा इति भाषायाम्' निगूढं स्थगितम् अविवृतम् अस्फुटितम् अपि ते धातुसञ्चयं श्लेष्मादि रसरक्तादि हरामि वहामि।

**अनुवाद** – हे भव! तुम्हारे द्वारा मेरे विग्रह का हरण कर लिया गया है तथापि मैं पृथ्वी के रन्ध्र में पड़ा हुआ, गर्भाशय की पेशी से आच्छादित, अण्डे की सन्दूक में बन्द और अस्फुट होकर भी तुम्हारे ही धातुसंचय (रस, रक्त, मज्जा आदि) को वहन करता हूँ।

**( ९० )**

**परिमितसुखदं कषायपाकं**
**विरसतरं विषयान्तरं विहाय।**
**निरवधिमधुरे समे समन्ता–**
**त्त्वयि पुरुषोत्तम! विश्रमोऽस्तु वाचाम्।।**

**अन्वयः** – हे पुरुषोत्तम! परिमितसुखदं कषायपाकं विरसतरं विषयान्तरं विहाय समन्तात् समं निरवधिमधुरे त्वयि वाचां विश्रमः अस्तु।

**पदार्थप्रकाशिका** – परिमितेति– परिमितं स्वल्पं सुखं ददातीति परिमितसुखदं तत्, कषायपाकं कषायो दुःखद एव पाकः परिणामो यस्य तद् विरसतरं च विषयान्तरं त्वदतिरिक्तं संसारे यत्किमपि अस्वादुतत्त्वं वर्तते तत्सर्वं

विहाय परित्यज्य समन्तात् सर्वतः समे समाने भेदादिरहिते निरवधिमधुरे अनन्तमाधुर्योपेते त्वयि शिवे मम गोकुलनाथकवेः वाचां वाणीनां विश्रमः विरामः अस्तु भवतु। सांसारिकं सर्वं विहाय त्वयि शिव एव मम वाणी विश्रमं लभेत इति भावः। अमृतोदये तु 'निरवधिविबुधे समे समन्तात्त्वयि पुरुषोत्तम चित्तविभ्रमोऽस्तु' इति पाठः।

**अनुवाद** – हे पुरुषोत्तम! परिमित सुख देने वाले, कषायपाक, अत्यधिक विरस अन्य विषयों को छोड़कर सर्वतः सम और असीम मधुर तुझ में मेरी वाणी विश्राम प्राप्त करे।

## ( ९१ )

**अपगतपदपाटवोऽपि गर्भा-**
**दुपनिषदामधुनोत्थितः प्रबन्धः।**
**जनयतु तव कौतुकं कलेन**
**प्रतिपदविस्खलितेन जल्पितेन॥**

**अन्वयः** – अपगतपदपाटवः अपि अधुना उपनिषदां गर्भात् उत्थितः प्रबन्धः प्रतिपदविस्खलितेन कलेन जल्पितेन तव कौतुकं जनयतु।

**पदार्थप्रकाशिका** – अपगतेति– अपगतपदपाटवः अपगतं निरस्तीभूतं पदानां पाटवं चातुर्यं यस्य तादृशः। अधुना उपनिषदां वेदान्तानां गर्भात् अन्तःस्थलात् उत्थितः समुत्पन्नः प्रबन्धः शिवशतकरूपो वाक्यबन्धः, प्रतिपदविस्खलितेन प्रतिपदं विशृंखलितं यस्मिंस्तत्तादृशं तेन कलेन जल्पितेन मधुराव्यक्तेन स्वरेण तव शिवस्य कौतुकं कुतूहलं जनयतु उत्पादयतु। यद्वा उपनिषदां गर्भात् सपद्येव लब्धजनिरयम् अपगतपदपाटवः पादविन्यासेऽप्रवीणः अयं मम प्रबन्धरूपः शिशुः प्रतिपदं विस्खलितेन पतन्नितस्ततश्चलनेन जल्पितेन स्वरेण च तव कौतुकं जनयत्वित्यर्थः।

**अनुवाद** – यद्यपि मेरे इस प्रबन्ध में पदपटुत्व नहीं है तथापि यह अभी ही उपनिषदों के गर्भ से निकला है। ऐसा मेरा यह प्रबन्ध (रूप शिशु) प्रतिपद विस्खलन से युक्त मधुर भाषण से तुम में कुतूहल उत्पन्न करे।

**( ९२ )**

**प्रकृतिमलिनमृक्षलक्षलिक्षा-**
**चयचितमम्बरचीवरं वसानम्।**
**प्रकटितबृहदण्डमत्रपं त्वां**
**पुरुषमुदीक्ष्य हसामि चोल्लसामि।।**

**अन्वयः** – प्रकृतिमलिनम् ऋक्षलक्षलिक्षाचयचितम् अम्बरचीवरं वसानं प्रकृटितबृहदण्डम् अत्रपं त्वां पुरुषम् उदीक्ष्य हसामि च उल्लसामि च।

**पदार्थप्रकाशिका** – प्रकृतीति – शिवं वृद्धत्वेन परिकल्प्य वदति-प्रकृतिमलिनं प्रकृत्या कलुषितम्, स्वभावेन मलिनवर्णम्। अथवा प्रकृत्या मायया मलिनम्। यद्वा प्रकृतिमलिनमित्यम्बरचीवरस्य विशेषणम्। अम्बरस्य श्यामत्वेन प्रकृतिमलिनत्वम्। ऋक्षलक्षलिक्षाचयचितम् ऋक्षाणां नक्षत्राणां लक्षं तदेव लिक्षाचयः यूकाण्डसमूहस्तेन चितं व्याप्तम् अम्बरचीवरं आकाशवस्त्रखण्डं परिदधानम्, असंख्यलघुनक्षत्रलिक्षाव्याप्तमाकाशमेव चीवरत्वेन वस्त्रत्वेन परिदधानमित्यर्थः। प्रकटितबृहदण्डम्, विश्वबृहदण्डस्य प्रकटयितारम्, अत्रपं निर्लज्जं, तादृशं त्वां पुरुषम् उदीक्ष्य दृष्ट्वा हसामि उल्लसामि च।''ऋक्षः पर्वतभेदे स्याद्भल्लूके शोणके पुमानावेधनेऽन्यलिङ्गं नक्षत्रे च नपुंसकम्'' इति मेदिनी। भवान् मलिनः, नानानक्षत्रलिक्षाचयमम्बरमेव भवतो वस्त्रम्, बृहदण्डं भवान् प्रकटितवानथ च लज्जारहितोऽपीति सर्वं त्वयि पुराणपुरुषे दृष्ट्वा हसन्नहमानन्दमनुभवामि। अथवा लक्षलिक्षाः लक्षसंख्याकानि यूकाण्डानि ताभिश्चितं व्याप्तं अनावरणक्षमं वस्त्रं दधानम्, निर्लज्जं विशालाण्डकोशं जरन्तं पुरुषं दृष्ट्वा हसामि।

**अनुवाद** - तुम स्वभाव से मलिन हो, लाखों छोटे नक्षत्रों के समूह रूप लिक्षा वाले आकाशवस्त्र को (अथवा लाखों लीख और चीलरों से भरे कपड़े को) धारण करते हो, तुमने विशालतम अण्ड (ब्रह्माण्ड या अण्डकोश) को प्रकट किया है, लज्जा रहित हो, ऐसे तुझ पुरुष (पुराणपुरुष या बूढ़े) को देखकर मैं हँसता हूँ और प्रसन्न होता हूँ।

**( ९३ )**

**व्यरमदवसरः स यत्र कर्म-**
**प्रकरमकार्षममर्त्यलेह्यलोभात्।**
**न पुनरपि पिबामि सोमपात्रा-**
**मृतदधि राहुविडालपीतशेषम्।।**

**अन्वयः** - अमर्त्यलेह्यलोभात् यत्र कर्मप्रकरम् अकार्षं सः अवसरः व्यरमत्। पुनः अपि राहुविडालपीतशेषं सोमपात्रामृतदधि न पिबामि।

**पदार्थप्रकाशिका** - व्यरमदिति- अमर्त्यलेह्यलोभात् अमर्त्यम् अमृतमेव लेह्यं तस्य लोभात् यत्र यस्मिन् स्थाने कर्मप्रकरं यागसमूहानामनुष्ठानमकार्षं सः अवसरः कालो व्यरमत्, गतः। इदानीं मया मोक्षो लब्धः। पुनः अपि राहुविडालपीतशेषं राहुरेव विडालः मार्जारस्तेन पीतशेषं सोमपात्रामृतदधि सोमपात्रस्य अमृतमेव दधि दधिवद्घनीभूतत्वात् तन्न पिबामि।

**अनुवाद** - अमृत रूप चाटने योग्य पदार्थ की लालच से जिसमें यज्ञ समूहों का अनुष्ठान किया था, वह समय बीत गया। (अब मैं मुक्त हो गया हूँ) अब फिर से राहुरूप विडाल के पीने से शेष बचे सोमपात्र के अमृत रूप दही को नहीं पी रहा।

( ९४ )

**स्वयमयमवलेढि होतुराज्यं**
**तदनु तमाशयते सुधाम्बुबिन्दून्।**
**अजनि तु जननीपयस्तृषार्ति-**
**क्षयमवमुञ्चति याज्यमिज्यवर्गः।।**

**अन्वयः** - अयं स्वयं होतुः आज्यम् अवलेढि। तदनु तं सुधाम्बुबिन्दून् आशयते। (अयं) तृषार्तिक्षयं जननीपयः अजनि। इज्यवर्गः तु याज्यम् अवमुञ्चति।

**पदार्थप्रकाशिका** - स्वयमयमिति- अयं शिवः स्वयं होतुः हवनकर्तुः आज्यं घृतम् अवलेढि, होतुः हवनार्थं सञ्चितस्य घृतस्य लेहनं करोति। तदनु लेहनानन्तरं तं होतारं सुधाम्बुबिन्दून् अमृजलकणान् आशयते भोजयति। अयं शिव एव स्वयं तृषार्तिक्षयं तृषोऽर्तेस्तृट्पीडाया क्षयं विनाशकारि जननीपयः जनन्या दुग्धम् अजनि संवृत्तम् इति कृत्वा इज्यवर्गः पूजकसमूहः याज्यं यागम् अवमुञ्चति परित्यजति। जननीदुग्धेनैव तृषार्तिक्षयान्न इज्यवर्गो यागाय समुत्सुको भवतीति भावः।

**अनुवाद** - यह (शिव) स्वयं होता के घी को चाटता है तदनन्तर उसे सुधारूपी जलबिन्दु का पान कराता है। यह शिव ही तृषा की पीड़ा को नष्ट करने वाला जननीदुग्ध बन गया। अतः पूजकवर्ग याग को छोड़ रहा है।

( ९५ )

**भ्रमयसि नवधा खमण्डलानि**
**द्रढयसि सप्तपुटानि भूतधात्र्याः।**
**उपदिशसि च षड्गतीर्ग्रहाणां**
**ध्रुवमसि तद्ध्रुवयोरपि ध्रुवस्त्वम्।।**

**अन्वयः** – खमण्डलानि नवधा भ्रमयसि। भूतधात्र्याः सप्तपुटानि द्रढयसि। ग्रहाणां षड्गतीः च उपदिशसि। तत् त्वं ध्रुवयोः अपि ध्रुवः असि (इति) ध्रुवम्।

**पदार्थप्रकाशिका** – भ्रमयसीति– खमण्डलानि आकाशस्थितानि नक्षत्रादि–मण्डलानि नवधा नवप्रकारेण भ्रमयसि। सूर्यचन्द्रभौमबुधगुरुप्रभृति–ग्रहरूपेण सञ्चारयसि। खशब्द आकाशवाचकस्तथापि लक्षणयाऽत्र नक्षत्रमण्डलं बोधयति। विभुरूपस्याकाशस्य नवधात्वाभावात्। अथवा 'खमण्डलानि' इत्यत्र भमण्डलानीति पाठः। नवधाभमण्डलं यथा–

नक्षत्रत्रयवर्गैराग्नेयाद्यैर्व्यवस्थितैर्नवधा,
भारतवर्षे मध्यप्रागादिविभाजिता देशाः। (बृहत्संहिता)

यद्वा – एवं पृथक्मानवदेवजैवपत्रार्क्षसौरेन्दवसावनानि।
ब्राह्मं च काले नवमं प्रमाणं ग्रहास्तु साध्या मनुजैः स्वमानात्।। (कालाध्याये, ३२)

भूतधात्र्याः भूतानि धरतीति, भूतानां धात्री भूतधात्री तस्याः। पृथिव्या इत्यर्थः।'भूतधात्री पृथ्वीति त्रिकाण्डशेषः। सप्तपुटानि, पृथिव्यास्तले विद्यमानान् सप्तलोकान् दृढीकरोषि, दृढतरं विदधासि। तानि च सप्तपुटानि सन्ति–

दध्नो घृतस्येक्षुरसस्य तस्मान्मद्यस्य च स्वादुजलस्य चान्त्यः।
स्वादूदकान्तर्वडवानलोऽसौ पातालालोकाः पृथ्वीपुटानि।।

अथवा 'सप्तपुटानि' इत्यत्र 'सप्तपुराणि' इति पाठः। तानि च सप्तपुराणि–

लवणजलधिरादौ दुग्धसिन्धुश्च तस्माद–
मृतरश्मिः श्रीश्च यस्माद् बभूव।
महितचरणपद्मः पद्मजन्मादिदेवै–
र्वसति सकलवासो वासुदेवश्च यत्र।।

अथवा अतलवितलादयः पृथिव्या अधोभागे विद्यमानाः सप्तलोकाः, तान्।

ग्रहाणां षड्गतीः वसन्तादिषड्तुरूपा गतीः उपदिशसि शिक्षयसि। ज्योतिषशास्त्रे ग्रहाणां वक्रातिवक्रादिगतयः प्रसिद्धास्ताः अष्टधा। अन्या अपि पञ्चधा गतयोऽतिशीघ्रशीघ्रादयः। न तत्र गतीनां नवत्वमिति ऋतुरूपेण व्याख्यातमिह। तत् तस्मात् कारणात् त्वं ध्रुवयोः अपि ध्रुवः असि इति ध्रुवम् निश्चितम्। ध्रुवयोः याम्यसौम्ययोर्ज्योतिषशास्त्रोक्तयोः। तथा च भुवनकोशे–

सौम्यं ध्रुवं मेरुगताः खमध्ये
याम्यं च दैत्या निजमस्तकोर्ध्वे।
सव्यापसव्यं भ्रमदृक्षचक्रं
विलोकयन्ति क्षितिजप्रसक्तम्।।

त्वं शिव एव सर्वमेतत्करोषि। न त्वदतिरिक्तः कश्चन कर्तेति भावः।

**अनुवाद** – तुम नवप्रकार से नक्षत्रमण्डल को घुमाते हो। पृथ्वी के दधि, घृत आदि धातुओं या अतल वितल आदि लोकों को दृढ़ करते हो। ग्रहों की छः गतियों (ऋतुओं) का उपदेश देते हो। इस प्रकार तुम याम्य और सौम्य ध्रुवों के भी ध्रुव हो यह निश्चित है।

## ( ९६ )

**गुणमपि तव निर्गुणत्वपक्षे**
**गमयति दोषकुलाकुलः प्रबन्धः।**
**मलिनयति नवेन्दुसुन्दराणि**
**स्फटिकशिलाशकलानि काचसङ्गः।।**

**अन्वयः** – दोषकुलाकुलः प्रबन्धः तव गुणम् अपि निर्गुणत्वपक्षे गमयति। काचसङ्गः नवेन्दुसुन्दराणि स्फटिकशिलाशकलानि मलिनयति।।९६।।

**पदार्थप्रकाशिका** – गुणमपीति– दोषकुलाकुलः दोषाणां कुलः समूहस्तेन आकुलः व्याप्तः प्रबन्धः मम शिवशतकरूपः काव्यप्रबन्धः तव गुणमपि पुरुषोत्तमस्य तव गुणसमूहमपि निर्गुणत्वपक्षे रूपादिरहितत्वपक्षे एव गमयति, योजयति। दोषकुलाकुलः काचसङ्गः काचस्य सङ्गतिः नवेन्दुसुन्दराणि अभिनवचन्द्रमनोहराणि स्फटिकशिलाशकलानि स्फटिकशिलायाः खण्डानि मलिनयति मलिनीकरोति। मादृशस्य साधारणजीवस्य अयं प्रबन्धः त्वां निर्गुणमेव प्रतिपादयति। काव्यमालासंस्करणे 'दोषकुलाकुलम्' इति पाठः।

**अनुवाद** – दोषों से युक्त मेरा यह प्रबन्ध तुम्हारे गुणों को भी निर्गुण बनाता है। काँच की संगति से नवीन चन्द्रमा के समान सुन्दर स्फटिकशिला के टुकड़े भी गन्दे हो जाते हैं।

**( ९७ )**

**किमपि निविशते प्रकाशराशौ**
**त्वयि यमुनेव रवौ विधाविवाङ्कः।**
**असिततनुचतुर्भुजस्वरूपं**
**यदवतरा हृदयं हरन्ति रामाः।।**

**अन्वयः** – किमपि असिततनुचतुर्भुजस्वरूपं प्रकाशराशौ त्वयि रवौ यमुना इव, विधौ अङ्कः इव निविशते। रामाः यदवतराः हृदयं हरन्ति।

**पदार्थप्रकाशिका** – किमपीति– अनिर्वचनीयम् असिततनुचतुर्भुज-स्वरूपम् अश्वेतशरीरं विष्णुस्वरूपं प्रकाशराशौ प्रकाशस्य राशिस्तस्मिन् त्वयि शिवे। रवौ सूर्ये यमुना इव, विधौ चन्द्रे अङ्कः मृगाङ्क इव निविशते, प्रविशति। रामा मत्स्यनृसिंहरामकृष्णादिविविधरूपत्वेन लीलाया दुरवगाहतया वक्राः वल्गवो रमणीया वा, यदवतराः यस्य चतुर्भुजस्य विष्णोः मत्स्यादयोऽवताराः स्त्रियोऽथवा परशुरामप्रभृतयो रामपदवाच्या हृदयं भक्तानां मनो हरन्ति कर्षन्ति। परमात्मनि किमपि श्यामं चतुर्भुजं च कालीकृष्णादिशरीरं प्रविशदिव प्रतिभाति मे, यस्याः

काल्या अवतारभूताः रामाः स्त्रियः कृष्णस्य चावतारभूताः सर्वानानन्दयन्ति। उपासकैः परमे ब्रह्मण्यध्यस्तः कालीविग्रहः कृष्णविग्रहो वा ध्यातव्य इत्युपदेशोऽत्र दत्तः। अथवा गृहीतनानावतारो हरिरपि तवैवांश इति भावः। अंशस्यांशिनि प्रवेश उचित एव। निर्णयसागरीयसंस्करणे 'यदरतराल' इति प्रश्नचिह्नाङ्कितः पाठः। अमृतोदयमुपजीव्य अत्र 'यदवतरा' इति पाठं मत्वा कथञ्चिदर्थयोजना कृता।

**अनुवाद** – अनिर्वचनीय असिततनु चतुर्भुजस्वरूप विष्णु तुझ शिव रूप प्रकाश राशि में प्रविष्ट हो रहा है तथा सूर्य में यमुना की तरह तथा चन्द्र में अङ्क की तरह एकीभूत हो रहा है। उस विष्णु के विविध रमणीय अवतार भक्तों के हृदयों को हर लेते हैं।

**( ९८ )**

**इदमपरपुरं तदेव यस्मि–**
**न्नसकृदहर्निरगान्निशि प्रविश्य।**
**विगलितवरणाद्बहिर्विहीनात्**
**कथमधुना सदनादितो निरीयाम्।।**

**अन्वयः** – इदं तदेव अपरपुरं (वर्तते) यस्मिन् असकृत् निशि प्रविश्य अहः निरगात्। अधुना विगलितवरणात् बहिः विहीनात् इतः सदनात् कथं निरीयाम्।

**पदार्थप्रकाशिका** – इदमिति– इदं मत्पुरो विद्यमानं तदेव अपरपुरम् अपरमन्यत् पुरं नगरं वर्तते यस्मिन् असकृत् बहुबारं निशि रात्रौ प्रविश्य अहः दिवसो निरगात्। निरुपसर्गपूर्वकात् इण् गतौ धातोर्लुङि। 'इणो गा लुङि' इति गादेशे रूपम्। विगलितवरणात् विगलितः वरणः प्राकारः यस्य तत् विगलितवरणम्, तस्मात्। 'प्राकारो वरणः साल' इत्यमरः। बहिः विहीनात् बहिर्द्वाररहितात् इतः सदनात् भवनात् कथं निरीयाम् गच्छेयम्। जीवो हि

सुषुप्तिकाले निर्वाणलभ्यसुखसजातीयं निर्वृतिनामकं सुखमासाद्य जातायां सुषुप्तेः समाप्तौ पुनः संसारं प्रविशति स तादृश एवार्थोऽत्र विवक्षितः।

**अनुवाद** - यह वही दूसरा नगर है जिसमें अनेक बार रात में प्रवेश करके दिन चला गया। अब प्राकाररहित तथा द्वारदेश रहित इस भवन से कैसे निकलूँ।

**( ९९ )**

**यदभिलपसि पुद्गलानजीवा-**
**स्रववरनिर्जरजीवबन्धमोक्षान्।**
**नयसि च यदनावृतान्विहङ्ग-**
**प्रकृतिमतस्तदुपास्यसे जिनेन्द्रः।।**

**अन्वयः** - यत् पुद्गलान् अजीवास्रववरनिर्जरजीवबन्धमोक्षान् अभिलपसि, यत् च अनावृतान् विहङ्गप्रकृतिं नयसि, अतः तत् जिनेन्द्रः उपास्यसे।

**पदार्थप्रकाशिका** - यदभिलपसीति- यत् यस्मात् कारणात् पुद्गलान् रूपादिमद्द्रव्याणि अजीवास्रववरनिर्जरजीवबन्धमोक्षान्, अजीवश्च आस्रवश्च वरः संवरश्च निर्जरश्च जीवश्च बन्धश्च मोक्षश्चेति अजीवास्रवरनिर्जर-जीवबन्धमोक्षास्तान्। जैननये जीवोऽजीव आस्रवः संवरो निर्जरा बन्धो मोक्षश्चेति सप्ततत्त्वानि स्वीकृतानि सन्ति। तत्र चेतनालक्षणो जीवः। चेतनारहितोऽजीवः। शुभाशुभकर्मागमद्वाररूप आस्रवः। आत्मकर्मणोरन्योन्यप्रदेशानुप्रवेशात्मको बन्धः। आस्रवनिरोधलक्षणः संवरः। एकदेशकर्मसंक्षयलक्षणा निर्जरा। कृत्स्नकर्मवियोगलक्षणो मोक्षः। तान्येव बन्धमोक्षयोः कारणानि अभिलपसि कथयसि। तत्त्वार्थसूत्रे स्पर्शरसगन्धवत्त्वं पुद्गललक्षणं निरूपितम्। अयं पुद्गल एव जीवस्य बन्धमोक्षकारणं तथापि नियमाचारादिभिः कर्मसंस्काररहितो जीवोऽनावृतान् पुद्गलान् प्राप्योर्ध्वगमनं करोति। आवरणरहिता जीवा मुक्ता

उर्ध्वगतिं लभन्त इति भावः। स एव सिद्धावस्थां प्राप्तः शुद्धचैतन्यस्वरूपो जीवः जिनेन्द्र इति शब्देनोच्यते। यत् यस्मात् कारणात् अनावृतान् पुद्‌गलान् प्राप्य जीवं विहङ्गप्रकृतिं नयसि, ऊर्ध्वगमनं कारयसि। अतः तत् तादृशस्त्वं जिनेन्द्रः शुद्धचैतन्यस्वरूपो जीव उपास्यसे पूज्यसे। निर्णयसागरीय संस्करणे 'पुङ्गलानजीवासुरवर' इति पाठो लभ्यते। प्रकृते असुरशब्दस्यानुपयोगित्वमेव। जैनमते तादृशस्य कस्यचिदपि तत्त्वस्यानुल्लेखात्। 'असुर' इत्यस्य स्थाने 'आस्रव' इति पाठोऽत्र निर्दिष्टः। वरः संवर इत्यर्थः। छन्दोऽनुरोधात् समुपसर्गस्य परित्यागः।

**अनुवाद** – तुम पुद्गलों को अजीव, आस्रव, संवर, निर्जर, जीव, बन्ध और मोक्ष कहते हो। पुद्गलों से अनावृत शुद्ध संस्कारवान् जीव को विहंग स्वभाव प्राप्त कराते हो, इसलिए वह तुम जिनेन्द्र (शुद्ध चैतन्य जीव या वर्द्धमान महावीर आदि के) रूप में पूजे जाते हो।

**( १०० )**

**प्रकृतिरियमनश्वरस्वरूपा**
**सृजति महान्तमसौ यतो विकारम्।**
**अविकृतमपि पश्यतः सतस्ते**
**सह रमते ह्यनया सखा त्वदीयः।।**

**अन्वयः** – इयम् प्रकृतिः अनश्वररूपा (अस्ति) यतः असौ महान्तं विकारं सृजति। सतः ते अविकृतम् अपि पश्यतः त्वदीयः सखा हि अनया रमते।

**पदार्थप्रकाशिका** – प्रकृतिरिति– इयं प्रकृतिः सांख्यशास्त्रसिद्धा साम्यावस्थापन्ना गुणत्रयात्मिका प्रकृतिः माया अनश्वररूपा विनाशरहिता अस्ति। असौ प्रकृतिः महान्तं विकारं महदादि सृजति। सतः नित्यस्य ते अविकृतं विकृतिरहितं स्वरूपं पश्यतः। अनादरे षष्ठी। पश्यन्तं त्वामनादृत्येति भावः।

त्वदीयः सखा जीवो हि अनया प्रकृत्या रमते रमणं कुरुते। सांख्यदर्शने प्रकृतिर्नित्यतत्त्वं वर्तते। गुणत्रयस्य साम्यं यावदस्यां भवति तावदियमव्यक्ता तिष्ठति। गुणवैषम्यविक्षोभेण प्रकृतिरियं सर्गे प्रवर्तते। अनन्तरं महदादीन्युत्पद्यन्ते। पुरुषोऽत्र प्रकृतिविकृत्यादितत्त्वभिन्न–श्चैतन्यः। जीवरूपः पुरुषःप्रकृतौ रमते। शिवस्तु स्वसखं रममाणं जीवं पश्यति। इदं 'द्वा सुपर्णा सयुजा सखाया' इत्यादिश्रुतौ स्फुटम्।

**अनुवाद** – यह प्रकृति अनश्वररूपा है। यही महदादि विकारों की सृष्टि करती है। नित्य पुरुष (शिव) के अविकृत स्वरूप के देखते हुए तुम्हारा सखा (जीव) इस प्रकृति के साथ रमण करता है।

## ( १०१ )

**यदि मम सहसा तवाभिसारा–**<br>
**त्कुलगुरुभिर्निगमैर्निवारिताऽसौ।**<br>
**स्वयमभिसर तर्हि वाचमेनां**<br>
**परपुरुषं निगमो न पश्यति त्वाम्।।**

**अन्वयः** – कुलगुरुभिः तव निगमैः यदि असौ सहसा अभिसारात् निवारिता, तर्हि एनां मम वाचं स्वयम् अभिसर। परपुरुषं त्वां निगमः न पश्यति।

**पदार्थप्रकाशिका** – यदि ममेति– कुलगुरुभिः तव शिवस्य निगमैः वेदैः यदि असौ वाणी अभिसारात् अभिसरणात् निवारिता तर्हि मम एनां प्रबन्धरूपां वाचं स्वयम् अभिसर, परपुरुषं परं पुरुषं निर्गुणं निराकारं त्वां निगमः वेदः न पश्यति, अत एव 'नेति नेति' इति कृत्वा तव स्वरूपं निषेधति।

**अनुवाद** – कुलगुरु तुम्हारे वेदों के द्वारा अगर मेरी यह वाणी तुम तक पहुँचने से रोक दी गयी है तो तुम मेरी इस वाणी का स्वयं अभिसरण करो।

तुझ मेरे अभिसार परपुरुष को वेद नहीं देखते।

**( १०२ )**

**मम वचनजलानि कर्णशुक्तौ**
**तव पतितानि गतानि मौक्तिकत्वम्।**
**विगुणविलुलितानि लाजबुद्ध्या**
**रसयतु कुण्डलकुण्डलिप्रकाण्डम्।।**

**अन्वयः** – कुण्डलकुण्डलिप्रकाण्डं तव कर्णशुक्तौ पतितानि मौक्तिकत्वं गतानि विगुणविलुलितानि मम वचनजलानि लाजबुद्ध्या रसयतु।

**पदार्थप्रकाशिका** – मम वचनेति– कुण्डलं कर्णाभूषणरूपो यः कुण्डली सर्पः स कुण्डलकुण्डली। स चासौ प्रकाण्डं चेति कुण्डलकुण्डलीप्रकाण्डम्। कुण्डलीभूतः श्रेष्ठः सर्प इति यावत्। 'कुण्डली वरुणे सर्पे मयूरे कुण्डलान्विते' इति मेदिनी। तव कर्णशुक्तौ, तव शिवस्य कर्ण एव शुक्तिस्तस्यां पतितानि मौक्तिकत्वं मुक्तारूपतां गतानि प्राप्तानि, विगुणविलुलितानि विगुणानि गुणरहितानि विलुलितानि इतस्ततो विकीर्णानि। मालापक्षे सूत्राभावे इतस्ततो विकीर्णानि। अर्थप्रतिपादने त्वत्स्वरूपप्रतिपादने वा असमर्थानीति भावः। तादृशानि मम गोकुलनाथस्य यानि वचनजालानि वाक्यसमूहास्तानि लाजबुद्ध्या भृष्टधान्यबुद्ध्या। 'लावा' इति भाषायाम्। शुक्तौ पतित्वा जलबिन्दवो मौक्तिकत्वं यान्तीति लोकप्रसिद्धिः। अत्र तव शिवस्य कर्णशुक्तौ पतितानि मम वचनजलानि मौक्तिकत्वं प्राप्तान्यभवन्। सूत्राभावे इतस्ततो विकीर्णानि तानि च भृष्टधान्यबुद्ध्या तव कुण्डलभूतः सर्पः आस्वादयतु।

**अनुवाद** – तुम्हारी कर्णशुक्ति में पड़ कर मेरे वचन मोती बन गये हैं। सूत्ररहित होने के कारण इधर उधर बिखरे हुए मेरे उन वचनमोतियों को लावा समझ कर आपके कान का कुण्डलभूत श्रेष्ठ सर्प आस्वादन करे।

**( १०३ )**

**अपटुभिरभिधित्सितार्थबुद्धा-**
**वनभिमतानपि बोधयद्भिरर्थान्।**
**पुरमथन! पराहतैरमीभिः**
**कथय कदा विहसिष्यसि प्रलापैः।।**

**अन्वयः** - हे पुरमथन! अभिधित्सितार्थबुद्धौ अनभिमतान् अपि अर्थान् बोधयद्भिः पराहतैः अपटुभिः अमीभिः प्रलापैः कदा विहसिष्यसि (इति) कथय।।१०३।।

**पदार्थप्रकाशिका** - अपटुभिरिति- हे पुरमथन! त्रिपुरविनाशक! अभिधित्सितार्थबुद्धौ, अभिधित्सितः कथयितुमीप्सितः योऽर्थस्तस्य बुद्धौ ज्ञाने अनभिमतान् अनिष्टान् अपि अर्थान् पदार्थान् बोधयद्भिः अवगमयद्भिः पराहतैः परास्तैः व्याहतैर्वा अपटुभिः अप्रवीणैः अमीभिरुक्तैः मम प्रलापैः तव स्तुतिरूपैर्निरर्थकवचनैः कदा कस्मिन् काले विहसिष्यसीति कथय, वद।

**अनुवाद** - हे पुरमथन! विवक्षित अर्थों को कहने में असमर्थ तथा समर्थ न होने के कारण अनभिमत अर्थों का ज्ञान कराने वाले मेरे परास्त (व्याहत) चातुर्यरहित इन प्रलापों से कब हँसोगे, यह कहो।

**( १०४ )**

**न तव पुरि शिलादपुत्रवेत्र -**
**प्रततिनिरुद्धतया लभे प्रवेशम्।**
**शिवसहचरि! गौरि! गोपुरेभ्यो**
**बहिरुपविश्य वसामि नौमि च त्वाम्।।**

**अन्वयः** - हे शिवसहचरि! गौरि! शिलादपुत्रवेत्रप्रततिनिरुद्धतया तव पुरि प्रवेशं न लभे। गोपुरेभ्यः बहिः उपविश्य वसामि त्वां नौमि च।

**पदार्थप्रकाशिका** - शिवसहचरीति- हे शिवसहचरि! गौरि! शिलादपुत्रवेत्रप्रततिनिरुद्धतया तस्य। शिलादपुत्रो नन्दी। तस्य पिता शिलादमुनिरासीदिति पुराणेषु प्रसिद्धम्। शब्दकल्पद्रुमेऽप्ययं 'शैलादि:' कथित:। तथा च हरविजये- 'शैलादिना नतशिरस्सु निवेदितुषु (२.१८)' इति स्थले नन्दी शिलादपुत्र: कथितष्टीकाकारेण। सोऽयं नन्दी प्रतिशिवमन्दिरं द्वारि प्रतिष्ठापितो भवतीति तेन वेत्राणां प्रततिभिर्यष्टिभि: व्रततिभिर्वा निरुद्धतया निरोधताकारणात् तव पुरि मन्दिरे प्रवेशं न लभे। गोपुरेभ्य: बहि: द्वारेभ्य: बहि: एव उपविश्य स्थित्वा वसामि भवामि। तव द्वाराद् दूरे स्थितो भूत्वा त्वां नौमि। तव कृपया भवतु शिवपुरे मम प्रवेश इति भाव:।

**अनुवाद** - हे शिवसहचरि! पार्वति शिलादपुत्र नन्दी की वेत्रयष्टियों से निरुद्ध होने के कारण मैं तुम्हारे पुर में प्रवेश नहीं कर पा रहा। अत: गोपुर द्वार के बाहर बैठ कर तुम्हें नमस्कार करता हूँ।

**( १०५ )**

**न दहति सगरान्वयं न पादात्**
**प्रभवति नाऽप्यलिकादुदेति चक्षु:।**
**न च किमपि शृणोति नेत्रवर्गो**
**मम कथमस्तु तव स्तवेऽधिकार:।।**

**।। इति महामहोपाध्यायश्रीगोकुलनाथविरचितं शिवशतकम्।।**

**अन्वय:** - (मम) चक्षु: सगरान्वयं न दहति, न पादात् प्रभवति, नापि अलिकात् उदेति। नेत्रवर्ग: च किमपि न शृणोति। मम तव स्तवे कथम् अधिकार: अस्तु।

**पदार्थप्रकाशिका** - न दहतीति- चक्षु: मम नेत्रं सगरान्वयं सगरवंशजं न दहति। कपिल: सगरान्वयं ददाह। अत: नाहं कपिल: स तवोपासक आसीत्।

मम नेत्रं तथा पादात् अपि न प्रभवति न उत्पद्यते। तवोपासकस्य अक्षपादमुनेरेव पादे नेत्रमासीत्। अलिकात् मस्तकात् अपि न उदेति। ''ललाटमलिकं गोधि:'' इत्यमर:। शिवस्य शैवानां मस्तकान्नेत्रजनि: श्रूयते। मम तु तथा नास्ति। मम नेत्रवर्ग: नेत्रसमूह: किमपि न शृणोति। अतो नाहं शेषनाग:। तवोपासकानां तु तादृशा गुणा: श्रूयन्त इति तथात्वरहितत्वान्मम सामान्यपुरुषस्य तव स्तवे स्तुतौ अधिकार: कथं स्यात्। नाऽहं कपिल: गौतम: प्राप्तशिवस्वरूप: शैवो वाऽस्मि। अत: कुतस्तव स्तवेऽधिकार:, कपिलादय, एव तव स्तुतौ समर्था:। किञ्च ममेन्द्रियवर्ग: शक्तिरहित:, मूले नेत्रशब्दस्य इन्द्रियोपलक्षकत्वात्। अतोऽहं न तव स्तुतौ समर्थ इति भाव:।

**।। इति विद्यावतीसुतरमाकान्तप्रणीता पदार्थप्रकाशिका शिवशतकटीका।।**

**अनुवाद** – मेरी आँख सगर के पुत्रों को नहीं जलाती, पैर से भी उत्पन्न नहीं होती, मस्तक से उदित नहीं होती। मेरा नेत्रवर्ग कुछ सुनता भी नहीं, अत: तेरे स्तवन मे मेरा अधिकार कैसे हो।।१०५।।

**नयन्ती सारल्यं शिवशतकवाचोऽतिकठिना:**
**दिशन्ती वैदग्ध्यं दिशि दिशि मुदा गोकुलकवे:।**
**हरन्ती सन्देहं विलसतु विनोदे मतिमताम्**
**पदार्थानां पुण्यं प्रथयतु सदेयं मम कृति:।।१।।**
**गोकुलस्य कृतौ बद्धा रमाकान्तेन श्रद्धया।**
**समर्प्यते शिवायैषा पदार्थानां प्रकाशिका।।२।।**

✷✷✷

# शिवशतकम्

### ( मूलपाठः )

( १ )

विततविविधसम्प्रदायशाख -
व्यतिकरवेष्टितमूर्तये नमोऽस्तु।
बहुतरजगदण्डबीजपूर-
प्रसवफलेग्रहिपादपाय तुभ्यम्।।

( २ )

न धरणिसलिलानला न वायु-
र्न खमत एव न खानि नापि वर्ष्म।
न समयककुभौ न चिन्न चित्तं
पुरुषपुरन्दर! पूरुषस्तवास्मि।।

( ३ )

अविरतपरिवृत्तदण्डकाष्ठा-
कुलमतुलव्यतिवर्तमानवेगम्।
भ्रमयसि जगदण्डगोलमाला-
कलशकलापकुलाल! कालचक्रम्।।

( ४ )

भुवनपुटकुटीरहट्टयन्त्र-
भ्रमणसहध्रुवतर्कुतः क्रमेण।
सृजसि समयसूत्रमत्र माया-
मयपटवानविधानतन्तुवायः।।

( ५ )

निगमवनवनस्पते! प्रसूषे
कति जगदण्डमयान्युदुम्बराणि।
दधति बहलजन्तुजालमन्तः
पुनरपि तानि लयं त्वयि प्रयान्ति।।

( ६ )

बहुतरजगदण्डभारभर्तु-
र्नहि महिमानमहं तवाऽवयामि।
मशक इव शलाटुगर्भजन्मा
विटपबृहत्त्वमुदुम्बरद्रुमस्य।।

( ७ )

प्रविशति मम चित्तवेश्म सर्वे-
न्द्रियविकलः श्रुतिशिष्यमाणवर्त्मा।
विधिगृहतिलबिन्दुजालबर्ही
गलितवपुः प्रपितामहः प्रजानाम्।।

( ८ )

विगलितवपुषं विकारवार्ता-
रहितमनिन्द्रियमक्रियं पुराणम्।
त्वमसि तदिति चेतनाविशेषं
निजपितरं निगमाः प्रबोधयन्ति।।

( ९ )

जगदिदमुपदीपयत्यविद्या-
तिमिररिपौ त्वयि न स्वमप्यवैमि।
प्रतपति तपनातपे तपर्तौ
भजति यदान्ध्यमसावुलूकलोकः।।

( १० )

विषमनिगमकाननान्तशाखा-
ततिषु निलीय परान्निरीक्षमाणः।
परिणतिविदलज्जगत्कपित्थ-
ग्रसनकपे! सुचिरान्निरूपितोऽसि।।

( ११ )

सकलमपि मया स्वकर्मबीजं
त्वयि वृषवाह! समर्पयाम्बभूवे।
तव मम च न चेत्फलं प्रसूते
कथमधुनाऽप्यहमेव दोषभूमिः।।

( १२ )

नट इव वशगो भवामि यासा-
महमपहस्तितसर्वभूतपूर्वः।
प्रकृतिचरितनाट्यसूत्रधार !
भ्रमयसि मामियतीषु भूमिकासु।।

( १३ )

भवदभिरुचितासु मे क्रियासु
व्यवहरतोऽनुदिनं हिताहितासु।
जननिधनबन्धमोचनेषु
प्रभुरसि भूतपते! तवाऽस्मि दासः।।

( १४ )

भवदभिमतमेव सेवमानो
हितमहितं च तथा वृथाऽस्मि बद्धः।
तदपि कतममाश्रये शरण्यं
बत परवानितरः पतिस्त्वमेव।।

( १५ )

वरमुपहसनीयवर्णकोऽयं
विविधविकारविडम्बितस्वरूपः।
तदपि कृतकहासमात्रहेतो-
र्विरम निवारय निःसहोऽस्मि मायाम्।।

( १६ )

क्व जगति कतमाह्नि कस्य हेतो-
रहमिह बद्ध इति त्वमेव वेत्थ।
स्वमपि यदि न चेतये न च त्वां
मम करुणामय! तत्र कोऽपराधः।।

( १७ )

अविदितगतिना प्रमादनिद्रा -
मुषितमतिः कितव! त्वयाऽस्मि बद्धः।
कथमपि मम दृष्टिवर्त्मवर्ती
भव पथतस्करबन्धने प्रभुः स्याः।।

( १८ )

बहुविधभवभूमिकाभिराभि-
र्नटयसि नाथ! यथा तथा नटामि।
कृपण! गमयिता भवानविद्या-
जवनिकयाऽन्तरितःकियन्त्यहानि।।

( १९ )

वपसि विगतभोगभाग्य! दूरा -
न्मयि वृषवाह! तवाहमुर्वरास्मि।
स्वपदमुपदधासि यत्र तस्मिन्
भवति कडङ्गर एव कर्मबीजम्।।

( २० )

प्रभवति मतये पदप्रबन्धो
न तव निरत्यय! नित्यचेतनस्य।
न भजसि करुणामतः पुरारे!
मम कृपणैः परिदेवितप्रपञ्चैः।।

( २१ )

सरसमपि वरं न भोक्तुमीहे
हर! मम शम्बलसञ्चयं गृहाण।
उपदिश कतरद्धि दूरयात्रा-
श्रमशमनं भववर्त्मनोऽवसानम्।।

( २२ )

मम भवपथिकस्य कर्मभोग्यं
प्रलयनिशि त्वमवेक्षथाः शयालोः।
त्वयि सकलमकिञ्चनो बुभूषुः
प्रहरकवेतनमेतदर्पयामि।।

( २३ )

श्रुतिजनक ! रटत्यसौ कुमारी
तव दुहिता बहिरेत्य नेति नेति।
व्यवहित! निकटस्थितेऽपि तस्मा-
त्त्वयि मिलितेऽपि ममातिथेः क्व भोगः।।

( २४ )

अपरिमितविभागभूमिरेक-
स्त्वमसि ततो जगदण्डबिन्दुरासीत्।
इति भुवनभरैकधुर्य! जाने
दश ककुभो गणितक्रमेण सिद्धाः।।

( २५ )

कथय क इति दिग्विपर्ययेऽपि
          प्रभवति गन्तुमतः क्व संसरेयम्।
भव! भवपथिकस्य कोऽप्यपूर्व-
          स्त्वमहमिति प्रसृतो मम प्रमोहः।।

( २६ )

मयि परमविभौ विशुद्धसत्त्वे
          यदिह शरीरतदात्मतामधासीः।
निगमपुरुष! तत्प्रतिक्रियायै
          त्वयि निदधामि समस्तवस्त्वभेदम्।।

( २७ )

निबिडजडतदात्मताप्रमोहं
          विमलयति त्वदभेदविभ्रमो माम्।
प्रकृतिमुपनयन्ति वारिधानीं
          कतकरजांसि रजोऽन्तरापकर्षात्।।

( २८ )

पुरि पुरि विहरामहे भ्रमन्तः
          पुरहर! पश्यसि भोगवञ्चितोऽस्मान्।
किमिति न विहरेम नाथवन्तो
          वयमितरे त्वमनाथ एक एव।।

( २९ )

स्वपिषि न परकर्मसु प्रसक्तः
परमुपभोजयतस्तव क्व भोगः।
परचरितमवैषि निर्निमेषः
प्रकृतिदरिद्र! न कोऽपि पश्यति त्वाम्।।

( ३० )

प्रकृतिचटुल! सूक्ष्मभूतशेषे
प्रकृतिविकारनिकोचभाजि काले।
अविरतपरिवृत्तिखेदखिन्ने
स्वपिति जने प्रतिबुध्यसे त्वमेकः।।

( ३१ )

प्रलयदहनदग्धशेषपीलु-
प्रकरशिलोञ्छपवित्रवृत्तिरादौ।
घटयसि भुवनानि तेषु जीव-
प्रकृतिचलैः परमाणुभिः शरीरम्।।

( ३२ )

जनशरण! शरीरिणां प्रवृत्तैः
करणगणैरुपलभ्यचेतनानाम्।
कतिचन जनुरन्तरानुभूति-
प्रसृमरवासनया स्मृतीः प्रसूषे।।

( ३३ )

अतिशयितविबुद्धवत्पुराणः
स्मरति मुनिर्निगमं हिरण्यगर्भः।
गगनपवनसन्निपातकर्ता
कथयसि वा करणानपेक्ष एव।।

( ३४ )

अथ कृतककलेवरद्वयेन
व्यवहरता च निदेशदायिना च।
अवगमितपदप्रवृत्तिमादौ
कवयसि लोकहिताय सम्प्रदायम्।।

( ३५ )

हितविधिकपटान्निसर्गमूढ-
प्रकृतिरसावहितान्निवर्तनीयः।
इति विषमतमेऽपि संविधाने
गणयतु कस्तव नाथ! कौशलानि।।

( ३६ )

भवतु विधिरपूर्वकार्यतत्त्वा-
शयहितसाधनताभिधासु कश्चित्।
तदपि मुषितदोषमन्तरा त्वां
न भवितुमर्हति चोदना प्रमाणम्।।

( ३७ )

प्रभवति परमाप्त! यो दुरन्ता-
दपसरणाय हिते प्रवर्तनाय।
सह चरति चतुर्भिरर्थवादै-
र्निगमकवे! स तवैव सूक्तसारः।।

( ३८ )

अजिनमुसलवेदियूपशम्या-
दृषदुपलस्फ्यहविःकपालशूर्पैः।
अथ गुरुयजमानगातृहोतृ-
प्रभृतिभिरध्वरकर्मसु त्वमिज्यः।।

( ३९ )

विकिरति परितो घनावलीव
श्रुतिरमृतानि तवाशयादुदस्य।
विलयमयमुपैति चित्समुद्र!
त्वयि जगतो निगमस्य चित्प्रवाहः।।

( ४० )

अभिसरति परं परं पुरारे!
विषयमनेकमपास्य पूर्वपूर्वम्।
वरुणनिलयमापगेव यावद्
भजति भवन्तमसौ न चित्तवृत्तिः।।

( ४१ )

गुणगणमपनीय चित्तकूपे
मम निगमैः सहसा निपातितोऽसि।
अमृतकलश! तिष्ठ तिष्ठ मन्ये
पुनरपि जीवनमुद्धरिष्यसे नः।।

( ४२ )

प्रथमसमयसङ्गमाय नैत-
ज्जगदुपजीवति केवलं भवन्तम्।
भवतु सततसन्तमन्तरा त्वां
कथमनिदम्प्रथमाऽपि वस्तुसत्ता।।

( ४३ )

प्रवहपवनवेगघट्टितोऽपि
स्खलति न यज्जगदण्डपिण्डभारः।
लघुगुरुतुलनातुलाप्रकाण्ड!
द्रढिमगुणः स भवद्गुणत्रयस्य।।

( ४४ )

त्वमखिलजगदीश! षड्भिरङ्गै-
रुपचितवेदमजीजनः षडङ्गम्।
कथय कथमसावुपैत्वसत्तां
सततसतो भवतः स्वतः प्रपञ्चः।।

( ४५ )

विशकलितमनुव्रजन्निचित्य
स्थपतिरिव त्वमजीघटः प्रपञ्चम्।
विभुरसि न च युज्यसे विकारै-
स्त्वयि समवैतु कथं स भूतसर्गः।।

( ४६ )

न जगदिदमहेतुतो न शून्या-
दवधिमतां कथमुद्भवोऽस्त्वकस्मात्।
प्रकृतिरियमधर्मधर्मरूपा
पुरुषगुणः कथमारभेत विश्वम्।।

( ४७ )

स्वपरपरिचयान्ध्यहेतुमेतं
शिव! भवदावरणीयमन्धकारम्।
शमयति जगदण्डबिन्दुवृन्दा-
म्बुद! भवदेकपदा विवेकविद्युत्।।

( ४८ )

स्मरसि कथमनन्यदेव! वृत्तां
प्रभवकथाविधुरां निजामवस्थाम्।
पुनरपि न चिराज्जनार्दन! त्वां
न परिचरिष्यति चेतनो द्वितीयः।।

( ४९ )

निमिषपरिचितो हरे! समूलं
हरसि विशेषगुणव्रजं परस्य।
प्रथयसि खलतामिमामपूर्वां
कथयसि यद्विगुणत्वमात्मनोऽपि।।

( ५० )

अलमवगलितेन्द्रियप्रवृत्ते-
स्तव जरतः पुरुषस्य जागरेण।
अयमहमधुना प्रबुध्यमानः
पुरुषविकारकरीं निहन्मि मायाम्।।

( ५१ )

असकृदनटदस्मिता नटी मे
निहितपदा मशके मतङ्गजे च।
ध्रुवमुपरि तवाधिरोक्ष्यतीयं
भव! महतोऽपि महानणोरणीयान्।।

( ५२ )

विलयमुपजगाम चेदखण्ड-
स्त्वयि जरठो जगदण्डगुल्मपिण्डः।
क्षपयसि तदपि क्षपामनिद्रः
कतिभिरसौ हि बुभूषति प्ररोहैः।।

( ५३ )

विकिरति परदृष्टिवञ्चनाय
त्वदुपरि विष्टपसर्षपानविद्या।
तदपि निमिषमात्रनिर्गतोऽपि
प्रविशति भूतगणो भवन्तमेव।।

( ५४ )

असकृदुपरमद्भिरङ्कभेदै-
र्नटगणनिष्क्रमणाद्विविक्तरङ्गः।
अविदितमुखसन्धिरामुखान्तो
निगमकवेस्तव नाटकप्रबन्धः।।

( ५५ )

भ्रमयसि जगतस्त्वमेव संज्ञा-
परिचयसंस्कृतिरूपवेदनाभिः।
सदसदतदपोढवस्तुचिन्ता-
कृतिरिति कल्पयसे विवेकवेद्यम्।।

( ५६ )

त्वममृतविषयप्रवेशभूमौ
भवसि दृशः पथि यस्य स द्वितीयम्।
जगति न परिपश्यतीति जिह्मा
स्मरहर! दृष्टिविषाधिका गतिस्ते।।

( ५७ )

द्रुहिणभवनपद्मबीजमाला–
मणिपरिवर्तनतत्परात्मनस्ते।
ग्रसितुमखिलमेव जन्तुजातं
विजनयतो विदिता विडालवृत्तिः।।

( ५८ )

अपरिमितकृतेर्निराश्रयस्य
भ्रमरहितस्य निरस्तचेष्टितस्य।
दृषदुदरदरीषु दर्दुराणां
घटनपटोस्तव कीदृशं शरीरम्।।

( ५९ )

भुवनभवनभासनप्रदीप!
न्यपतदसौ त्वयि चेतनापतङ्गी।
क्षणमधिकमदीप्यत ज्वलन्ती
पुनरजहात्प्रथमामपि स्वसत्ताम्।

( ६० )

ध्रुवमियमपवर्गरात्रिसन्ध्या
भवति यतस्त्वयि निर्भरोऽनुरागः।
रुचिमय! चरमोऽयमञ्जलिस्ते
ननु नचिराद्भविता भवानदृश्यः।।

( ६१ )

यदपि तव वशे ममेन्द्रियाणि
श्रुतिविषयावधिवर्तमानदृष्टेः।
मुखमसि जगतस्तथापि नाथ!
श्रुतिमुकुरेण विना न वेदितासे।

( ६२ )

मतिधनमितरे सुदीर्घनिद्रा-
प्रवणधियस्त्वयि निक्षिपन्त्यतन्त्रे।
उपहरणसुसञ्चितो न जातु
व्ययमुपगच्छति चेतनानिधिस्ते।।

( ६३ )

क्वचिदपि विषमे त्वया वियुज्य
स्थितिमनवाप्य चिरस्य संसरामि।
भवगिरिसरिदस्मि चित्समुद्र!
स्वमपि जहामि तदा लभे यदि त्वाम्।।

( ६४ )

भगवति नियते विदूरयात्रा-
सहचरि! संसरणाध्वनोऽयमन्तः।
जरति! विरम निःसहासि संवि-
न्नगरमतः परमद्वयोपभोग्यम्।।

( ६५ )

विलिखतु कथमक्षराणि भाले
स विधिरदृष्टपदार्थलेखदक्षः।
मम हि मिलितमक्षपादपाद-
प्रणिपतनेन ललाटसीम्नि चक्षुः।।

( ६६ )

उडुनि मयि रवे! प्रकाशलेशं
व्यवधिवशादपरीक्षितो न्यधासीः।
तमपहरसि सन्निकर्षमेत्य
त्वदुपरि तर्हि निजं वपुस्त्यजामि।।

( ६७ )

भवपथपथिकोऽस्मि वाटपाट-
च्चर! मिलितोऽसि विलुण्ठ्य सम्पदो मे।
अहमपि भवदन्तरं प्रविश्य
ध्रुवमचिरेण हरामि ते विभूतीः।।

( ६८ )

श्रुतिरसि पुरुषार्थसन्निबद्ध-
स्तव चरणे प्रथमे विरौमि वत्सः।
अमरगवि! स दोग्धि कस्य हेतो-
रमृतमभोक्तरि पूर्तिभाजि भाण्डे।।

( ६९ )

शिव! तव मम चान्तरालभूमौ
विविधविधां व्यवधां व्यधाद्विधाता।
तदपि हि पिहितोऽहमेव भित्ति-
र्भवति वृतिः सदनस्य नाजिरस्य॥

( ७० )

अवधिरुपरराम भूर्विभक्ता
प्रभवसि गूढमतिर्न मां प्रहर्तुम्।
तदहमहमिकाह्वदेकशेषा-
वधिरधुना ध्रुवमावयोर्विमर्दः॥

( ७१ )

न धरणिरुपरि प्रयाति नाऽधः
पतति न च प्लवते न बम्भ्रमीति।
न च दिवि वसति स्वशक्तियोगा-
दपि तु भवानचलास्थिरत्वहेतुः॥

( ७२ )

अविषमचतुरस्त्रषड्विभागां
न सृजसि कन्दुकनिस्तलां न सूषे।
घटयसि पृथिवीमिमां स्वचक्र-
भ्रमणकुलाल! विशालदर्पणाभाम्॥

( ७३ )

पुरहर! परदृष्टिदोषशान्त्यै
कति जगदण्डकगण्डकान्बिभर्षि।
त्वदुपरि परिपातयन्ति दृष्टिं
विजहति सर्वमकिञ्चना भवन्ति।।

( ७४ )

परपुरमभिविश्य सर्वलोकं
भ्रमयसि सर्वदिनेषु भूतवर्गः।
भवपितृवनवाटबोधिवृक्ष!
प्रलयनिशासु निलीय सेवते त्वाम्।।

( ७५ )

ग्रहगृहसरसीरुहस्य राहु-
भ्रमरविमर्दसहार्ककर्णिकस्य।
भ्रमणमिदमभिव्यनक्ति लीलां
तव घटितां ध्रुवनालघट्टनाय।।

( ७६ )

सकलगुणगणो ममोर्णनाभे-
र्विलयमुपैति वितायते च भूयः।
पटुजनजडतापहारहेतो!
क्षणमपि न क्षमसे क्षयं गुणानाम्।।

( ७७ )

न खलु विघटिताः पुनर्घटन्ते
न च घटिताः स्थिरसङ्गतां श्रयन्ते।
पिपतिषुमवशं रुजन्ति वंश्या-
स्तटतरुमाप इवापगागणस्य।।

( ७८ )

विगतविपरिलोपदृष्टि पश्यन्
वशयसि यां पुरुषप्रकाण्ड! मायाम्।
प्रकृतिचपलया तया विकारै-
र्बहुविधवर्णिकया वशीकृतोऽस्मि।।

( ७९ )

प्रकृतिचपलपीलुबीजवर्गे
दलति खगोलकुशूलविप्रकीर्णम्।
अघटितमितरेतरेण कल्प-
क्षयरजनौ समचीकलस्त्वमेकः।।

( ८० )

स्वपुटपटलमभ्यजीर्यदाशा
वृतिरदलन्निरवाद्रविप्रदीपः।
प्रलयमवनिवास्त्वगात्तथापि
क्व जगदगारगृहस्थ! निश्यवात्सीः।।

( ८१ )

प्रसरति विषयेषु येषु रागः
　　परिणमते विरतेषु तेषु शोकः।
त्वयि रुचिरुचिता नितान्तकान्ते
　　गुणपरिपाकशुचामगोचरोऽसि।।

( ८२ )

प्रतिगृहमतिथिर्गृहीतदण्डो
　　धृतजगदण्डकमण्डलुप्रकाण्डः।
भुवनवहन! पात्रमात्रशेषं
　　सतृणमिदं जगदत्ति कालभिक्षुः।।

( ८३ )

प्रसभनिविशमानकालसर्प-
　　प्रतिहतनिर्गमने स्वगोलनीडे।
बहुविधगतयो विविक्तजाया-
　　सुतजननीतनवः खगा भ्रमन्ति।।

( ८४ )

अभिलषितमथानुचिन्तितं यो
　　हृदयगुहाशयितः शृणोत्यकर्णः।
तमिममवचनं च वाग्मिनं च
　　प्रभवति मन्त्रयितुं त्रयी भुजङ्गम्।।

( ८५ )

परिपिबति पयो भवाध्वनीन-
स्तनयकराज्जननीपयोधराच्च।
व्यपगतमधुना तदाशयाऽपि
प्रसभवशादयमाशयः शुशोष।।

( ८६ )

स्तनकलशमुखेन वा जनन्या-
स्तनयकराङ्गुलिमध्यकुल्यया च।
चपल! पिब पयांसि यावदायु-
र्भवति न चेतसि चेतनासमुद्रः।।

( ८७ )

विधिवशमिलितो भवाध्वयात्रां
हरसि जगत्तिलपेषतैलिकोऽसि।
न तव पशुपते! विदन्ति पाशं
पिहितदृशः पशवः परिभ्रमन्ति।।८७।।

( ८८ )

मयि फलकधिया त्वया कियत्यः
प्रतिकृतयो लिखितास्तथा विलुप्ताः।
विरम बत निसर्गनिर्मलस्य
प्रमृज रजो मम पश्य दर्पणोऽस्मि।।

( ८९ )

क्षितिबिलपतितं जरायुपेशी-
स्थगितमथाण्डसमुद्गके निगूढम्।
अविवृतमपि धातुसञ्चयं ते
भव! भवता हृतविग्रहो हरामि।।

( ९० )

परिमितसुखदं कषायपाकं
विरसतरं विषयान्तरं विहाय।
निरवधिमधुरे समे समन्ता-
त्त्वयि पुरुषोत्तम! विश्रमोऽस्तु वाचाम्।।

( ९१ )

अपगतपदपाटवोऽपि गर्भा-
दुपनिषदामधुनोत्थितः प्रबन्धः।
जनयतु तव कौतुकं कलेन
प्रतिपदविस्खलितेन जल्पितेन।।

( ९२ )

प्रकृतिमलिनमृक्षलक्षलिक्षा-
चयचितमम्बरचीवरं वसानम्।
प्रकटितबृहदण्डमत्रपं त्वां
पुरुषमुदीक्ष्य हसामि चोल्लसामि।।

( ९३ )

व्यरमदवसरः स यत्र कर्म-
प्रकरमकार्षममर्त्यलेह्यलोभात्।
न पुनरपि पिबामि सोमपात्रा-
मृतदधि राहुविडालपीतशेषम्।।

( ९४ )

स्वयमयमवलेढि होतुराज्यं
तदनु तमाशयते सुधाम्बुबिन्दून्।
अजनि तु जननीपयस्तृषार्ति-
क्षयमवमुञ्चति याज्यमिज्यवर्गः।।

( ९५ )

भ्रमयसि नवधा खमण्डलानि
द्रढयसि सप्तपुटानि भूतधात्र्याः।
उपदिशसि च षड्गतीर्ग्रहाणां
ध्रुवमसि तद्ध्रुवयोरपि ध्रुवस्त्वम्।।

( ९६ )

गुणमपि तव निर्गुणत्वपक्षे
गमयति दोषकुलाकुलः प्रबन्धः।
मलिनयति नवेन्दुसुन्दराणि
स्फटिकशिलाशकलानि काचसङ्गः।।

( ९७ )

किमपि निविशते प्रकाशराशौ
त्वयि यमुनेव रवौ विधाविवाङ्कः।
असिततनुचतुर्भुजस्वरूपं
यदवतरा हृदयं हरन्ति रामाः।।

( ९८ )

इदमपरपुरं तदेव यस्मि-
न्नसकृदहर्निरगान्निशि प्रविश्य।
विगलितवरणाद्बहिर्विहीनात्
कथमधुना सदनादितो निरीयाम्।।

( ९९ )

यदभिलपसि पुद्गलानजीवा-
स्रववरनिर्जरजीवबन्धमोक्षान्।
नयसि च यदनावृतान्विहङ्ग-
प्रकृतिमतस्तदुपास्यसे जिनेन्द्रः।।

( १०० )

प्रकृतिरियमनश्वरस्वरूपा
सृजति महान्तमसौ यतो विकारम्।
अविकृतमपि पश्यतः सतस्ते
सह रमते ह्यनया सखा त्वदीयः।।

( १०१ )

यदि मम सहसा तवाभिसारा-
त्कुलगुरुभिर्निगमैर्निवारिताऽसौ।
स्वयमभिसर तर्हि वाचमेनां
परपुरुषं निगमो न पश्यति त्वाम्।।

( १०२ )

मम वचनजलानि कर्णशुक्तौ
तव पतितानि गतानि मौक्तिकत्वम्।
विगुणविलुलितानि लाजबुद्ध्या
रसयतु कुण्डलकुण्डलिप्रकाण्डम्।।

( १०३ )

अपटुभिरभिधित्सितार्थबुद्धा-
वनभिमतानपि बोधयद्भिरर्थान्।
पुरमथन! पराहतैरमीभिः
कथय कदा विहसिष्यसि प्रलापैः।।

( १०४ )

न तव पुरि शिलादपुत्रवेत्र -
प्रततिनिरुद्धतया लभे प्रवेशम्।
शिवसहचरि! गौरि! गोपुरेभ्यो
बहिरुपविश्य वसामि नौमि च त्वाम्।।

( १०५ )

न दहति सगरान्वयं न पादात्
प्रभवति नाऽप्यलिकादुदेति चक्षुः।
न च किमपि शृणोति नेत्रवर्गो
मम कथमस्तु तव स्तवेऽधिकारः।।

**परिशिष्टम्**

## श्लोकानुक्रमणिका


| क्र. | श्लोक | संख्या | क्र. | श्लोक | संख्या |
|---|---|---|---|---|---|
| १. | अजिनमुसलवेदि | ३८ | १८. | उडुनि मयि रवे! | ६६ |
| २. | अतिशयितविबुद्ध | ३३ | १९. | कथय क इति | २५ |
| ३. | अथ कृतककलेवर | ३४ | २०. | किमपि निविशते | ९७ |
| ४. | अपगतपदपाटवो | ९१ | २१. | क्वचिदपि विषमे | ६३ |
| ५. | अपटुभिरभिधित्सितार्थ | १०३ | २२. | क्व जगति कतमाह्नि | १६ |
| ६. | अपरिमितकृतेर्निरा | ५८ | २३. | क्षितिबिलपतितं | ८९ |
| ७. | अपरिमितविभागभूमि | २४ | २४. | गुणगणमपनीय | ४१ |
| ८. | अभिलषितमथानु | ८४ | २५. | गुणमपि तव | ९६ |
| ९. | अभिसरति परं परं | ४० | २६. | ग्रहगृहसरसीरुहस्य | ७५ |
| १०. | अलमवगलितेन्द्रिय | ५० | २७. | जगदिदमुपदीपयत्य | ९ |
| ११. | अवधिरुपरराम | ७० | २८. | जनशरण! शरीरिणां | ३२ |
| १२. | अविदितगतिना | १७ | २९. | त्वमखिलजगदीश! | ४४ |
| १३. | अविरतपरिवृत्तदण्ड | ३ | ३०. | त्वममृत! प्रवेशभूमौ | ५६ |
| १४. | अविषमचतुरस्र | ७२ | ३१. | द्रुहिणभवनपद्मबीज | ५७ |
| १५. | असकृदनटदस्मिता | ५१ | ३२. | ध्रुवमियमपवर्गरात्रि | ६० |
| १६. | असकृदुदरमद्भि | ५४ | ३३. | न खलु विघटिताः | ७७ |
| १७. | इदमपरपुरं तदेव | ९८ | ३४. | न जगदिदमहेतुतो | ४६ |

| क्र. | श्लोक | संख्या | क्र. | श्लोक | संख्या |
|---|---|---|---|---|---|
| ३५. | नट इव वशगो | १२ | ५४. | प्रभवति परमाप्त यो | ३७ |
| ३६. | न तव पुरि शिलादपुत्र | १०४ | ५५. | प्रभवति मतये | २० |
| ३७. | न दहति सगरान्वयम् | १०५ | ५६. | प्रलयदहनदग्ध | ३१ |
| ३८. | न धरणिरुपरि | ७१ | ५७. | प्रवहपवनवेग | ४३ |
| ३९. | न धरणिसलिलानला | २ | ५८. | प्रविशति मम | ७ |
| ४०. | निगमवनवनस्पते | ५ | ५९. | प्रसभनिविशमान | ८३ |
| ४१. | निबिडजडतदात्मता | २७ | ६०. | प्रसरति विषयेषु | ८१ |
| ४२. | निमिषपरिचितो | ४९ | ६१. | बहुतरजगदण्ड | ६ |
| ४३. | परपुरमभिविश्य | ७४ | ६२. | बहुविधभवभूमि | १८ |
| ४४. | परिपिबति पयो | ८५ | ६३. | भगवति नियते! | ६४ |
| ४५. | परिमितसुखदं | ९० | ६४. | भवतु विधिरपूर्वकार्य | ३६ |
| ४६. | पुरहर! परदृष्टिदोष | ७३ | ६५. | भवदभिरुचितासु | १३ |
| ४७. | पुरि पुरि विहरामहे | २८ | ६६. | भवदभिमतमेव | १४ |
| ४८. | प्रकृतिचटुल | ३० | ६७. | भवपथ पथिको | ६७ |
| ४९. | प्रकृतिचपलपीलु | ७९ | ६८. | भुवनपुटकुटीर | ४ |
| ५०. | प्रकृतिमलिनमृक्ष | ९२ | ६९. | भुवनभवनभासन | ५९ |
| ५१. | प्रकृतिरियमनश्वर | १०० | ७०. | भ्रमयसि जगतस्त्व | ५५ |
| ५२. | प्रतिगृहमतिथिर्गृहीत | ८२ | ७१. | भ्रमयसि नवधा | ९५ |
| ५३. | प्रथमसमयसङ्गमाय | ४२ | ७२. | मतिधनमितरे | ६२ |

| क्र. | श्लोक | संख्या | क्र. | श्लोक | संख्या |
|---|---|---|---|---|---|
| ७३. | मम भवपथिकस्य | २२ | ९०. | विशकलितमनुव्रज | ४५ |
| ७४. | मम वचनजलानि | १०२ | ९१. | विषमनिगमकान | १० |
| ७५. | मयि परमविभौ | २६ | ९२. | व्यरमदवसरः | ९३ |
| ७६. | मयि फलकधिया | ८८ | ९३. | शिव! तव मम | ६९ |
| ७७. | यदपि तव वशे | ६१ | ९४. | श्रुतिजनक! रटत्य | २३ |
| ७८. | यदभिलपसि | ९९ | ९५. | श्रुतिरसि पुरुषार्थ | ६८ |
| ७९. | यदि मम सहसा | १०१ | ९६. | सकलगुणगणो | ७६ |
| ८०. | वपसि विगतभोग | १९ | ९७. | सकलमपि मया | ११ |
| ८१. | वरमुपहसनीय | १५ | ९८. | सरसमपि वरं न | २१ |
| ८२. | विकिरति परदृष्टि | ५३ | ९९. | स्तनकलशमुखेन वा | ८६ |
| ८३. | विकिरति परितो | ३९ | १००. | स्मरसि कथमनन्ददेव | ४८ |
| ८४. | विगतविपरिलोक | ७८ | १०१. | स्वपरपरिचयान्ध्य | ४७ |
| ८५. | विगलितवपुषं | ८ | १०२. | स्वपिषि न पर | २९ |
| ८६. | विततविविधसम्प्रदाय | १ | १०३. | स्वपुटपटल | ८० |
| ८७. | विधिवशमिलितो | ८७ | १०४. | स्वयमयमवलेढि | ९४ |
| ८८. | विलयमुपजगाम | ५२ | १०५. | हितविधिकपटा | ३५ |
| ८९. | विलिखतु कथमक्ष | ६५ | | | |


✷✷✷